पीतवासा जनार्दन॥५७॥ तं दृष्ट्वा वेनते यस्य मायुर्भूतं च वेपतिः॥ पपात पादयोर्भूमौ दंडवद्भक्तिसंयुतः॥
तुष्टाव च वज्रगं नाथं वाग्भिरष्टाभिरच्युतं॥ कृतांजलिपुटो भूत्वा भक्तिनम्रायशार्ङ्गिणेः॥५९॥ विसृष्टो मित्र
भावाय तुभ्यं ब्रह्मात्मनेन मः॥ त्रयीमयाय हृदये कर्मनिष्ठात्मचेतसां॥६०॥ सांख्ययोगात्मनिश्चैव नमस्त

ब्रह्मांडपु. चिंत्यरूपिणे ॥ नमस्तुभ्यं भगवते विशुद्धज्ञानरूपिणे ॥ ६३ ॥ परावरात्मने भूतमहिम्ने परमात्मने ॥ ब्रह्मा
दीनामपि विभो नमस्तद्रूपचिंतये ॥ ६२ ॥ अनिश्चेयतया चेन्निर्वचनत्वेन मूढता ॥ वाङ्मनोगोचरातीतं च
४८ रूपं च यतः प्रभो ॥ न संकल्पयितुं शक्नुम भवनं द्विभवादयः ॥ निश्चिताशेषशास्त्रार्थयोगिनामपि मानसं ॥
६४ ॥ नैव शक्नोति विज्ञातुं सद्रूपं ते महात्मनः ॥ वाचः सनंदनादीनां नहि ते महिमास्पदाः ॥ ६५ ॥ नालं तेन विमू
ढोहं कथं त्वां स्तौमि केशव ॥ नज्ञानेकास्तुतिस्तुभ्यं निराबाधा हि शोभा भवेत ॥ ६६ ॥ शब्दब्रह्ममयं रूपं भवतो नृ
नमच्युत ॥ तस्माद्यद्वाचिकं कर्म मम यच्चापि मानसं ॥ ६७ ॥ स्यात्तु सर्वास्तिवस्तावकतवपादांबुजार्पणं ॥ एताव
ते च भगवन् कृतार्थोहं त्वया कृतः ॥ दिव्येनानेन वपुषा यन्मे प्रत्यक्षतां गतः ॥ ६९ ॥ नारद उ० एवमस्तुत दातेन
राज्ञा तं प्राह केशवं ॥ वरं वृणीष्व यन्मे त्वं कांक्षसे राजसत्तमः ॥ ७० ॥ इत्युक्तो देवदेवेन प्रहृष्टात्मा कृतांजलिः ॥
नमस्कृत्य जगन्नाथं वरं वव्रे तदा नृपः ॥ पुत्रमिच्छामि देवेश मदन्वयविवर्धनं ॥ स्थितिश्च धर्मे सुदृढां त्वप्रसादे
न केशव ॥ ७२ ॥ इति तस्य वचः श्रुत्वा प्राह तं भगवान्पुनः ॥ सर्वं संपद्यते तुभ्यं मत्प्रसादेन पार्थिव ॥ ७३ ॥ किं
तु ते पितरस्तुष्टा भगवन्नाद्यतायतः ॥ यस्माहृदं ते तपसा गच्छ राज्यमकंटकं ॥ ७४ ॥ पितॄंस्तोषय यत्नेन राज्यं च
परिपालय ॥ आगंतासि च मत्पार्श्वं काले तीतिं पुनर्नृपः ॥ ७५ ॥ नतस्तुष्टोखिलाभीष्टमापतिं मयिलक्ष्य
ते ॥ तमेवमुक्त्वा भगवानत्रैवांतरधीयत ॥ राजा च स्वमधिष्ठानं जगाम्मातीमुदान्वितः ॥ ७६ ॥ ॥ इतिश्री
ब्रह्मांडपुराणे मध्यमखंडे सप्तविंशोध्यायः २७ ॥ नारद उ० ॥ स पुरं समनुप्राप्य राजा धर्मभृतां वरः ॥
शशास वसुधां सर्वां मंत्रिभिः सहितो बली ॥ १ ॥ ततः संचिंतयामास मनसा मनुनंदनः ॥ तुष्यंति पितरो म ४८
ह्यं कर्मणा केन वा कथं ॥ २ ॥ कस्मिन्काले च वै दर्भिस्तोषयामि पितॄनहं ॥ मम मातामहैर्दैवेन पूजयस्त्वपि
तृप्नोति ॥ ३ ॥ मया केन विधानेन भवंति पितरोर्चिताः ॥ एवं संचिंतयानस्य स भार्यां तस्य संनिधौ ॥ ४ ॥ सन

त्कुमारो भगवान् आविरासीद्यदृच्छया ॥ तं दृष्ट्वा मंत्रिभिः सार्धमभ्युत्थाय कृतांजलिः ॥ ५ ॥ अर्घ्यपाद्यादिभिः
सम्यक् पूजयामास भक्तितः ॥ तां सभां समुपावेश्य दत्वा दिव्यं च विष्टरं ॥ ६ ॥ विनीतात्मा नरपतिर्यथावत
समवर्तत ॥ इत्थं नाविहितां पूजां प्रतिगृह्याशिषार्चितं ॥ ७ ॥ योजयित्वासने दिव्ये ज्ञाने मुनिरुपाविशत ॥ तच्चाति
हृष्टवदनमवलोक्य महामुनिः ॥ विधाय कुशलं प्रश्नं राजानमिदमब्रवीत ॥ ८ ॥ सनत्कुमार उ० कुशलं न नृते
राज्ये बाह्याभ्यंतरवर्तिषु ॥ जनेषु वा गुणैः स्वीयैरपि रंजयसे जगत ॥ ९ ॥ अपि शाससि धर्मेण भुवमुद्धृत्य कंट
कं ॥ परस्पराविरोधेन यथाक्रममतंद्रिभिः ॥ १० ॥ अप्यनुत्रितयं राजन् संप्रवर्तयसे सदा ॥ इत्यादि कुशलं प्रश्नं कृ
त्वा तु मुनिपुंगवः ॥ इत्थं राजानमालोक्य भूयो पादमुवाच ह ॥ सुप्रसन्नमुखांभोजो भवान् संलक्ष्यसे नृप ॥ १२ ॥
तेन मन्येस्ति भवतो दुःखं किमपि मानसं ॥ तत्कथ्यतामहं तात्वात तव दुःखस्य कारणं ॥ ततस्तच्छमने व्यामि
शक्यं चेन्मम सांप्रतं ॥ १३ ॥ नारद उ० ॥ इति पृष्टो मुनींद्रेण राजा तस्मै मुदान्वितः ॥ यथावदात्मनः सर्वं माच
रो दुःखकारणं ॥ १४ ॥ ययानपत्यता दुःखपरिखिन्नात्मचेतसा ॥ तपसाराधितो विष्णुः प्राह प्रत्यक्षतां गतः ॥
धर्मनित्यो यथान्याय्यं पितॄन्देवांश्च संततं ॥ आराधयतु तो भीष्टं योक्ष्यसे त्वमति प्रभो ॥ १६ ॥ तमुपायं न
पश्यामि येन सर्वान्हं पितॄन् ॥ प्रीणयानीह मात्राणि तन्मे दहति संततं ॥ १७ ॥ तच्छ्रुत्वा वचनं तस्य प्राह भूयो
महामुनिः ॥ अलं शोकेन राजेंद्र करिष्ये यद्धितं तव ॥ १८ ॥ इत्युक्त्वा निखिलं तस्मै कथयामास विस्तरात ॥ पि
तृपूजां समुद्दिश्य श्राद्धकल्पमशेषतः ॥ निशाकरोक्षितः पूर्वं सिसृक्षुरखिलं जगत ॥ सर्वान्द्रक्तान्हितान्
कश्चित्ससर्ज मनसा विभुः ॥ २० ॥ ते तु सर्वे महाचार्यास्तपसोग्रेण भाविताः ॥ सर्वलोकहिताः शांताः सर्वज्ञाः स
र्वभावनाः ॥ २१ ॥ तेषां तु सर्वलोकानां उपरिष्टाद्सितामहः ॥ स्थानं संकल्पयामास किंचिदक्षिणतः स्थितं ॥ २२
गणाः सप्तविधास्तेषां कथितो नृपसत्तम ॥ मूर्तिमंतस्त्रयस्तस्मिन् अपरे योगमूर्तयः ॥ २३ ॥ अग्निष्वात्ता

ब्र.खां.उ.पु. बर्हिषदः साग्नयोनग्नयस्तथा॥ अग्न्यपाः सोमपाश्चैव मधुपाश्चेति ते स्मृताः॥२४॥ तयोर्वीर्यबलोपेताः
सर्वोद्रिक्तामहायशाः॥ महांतः सर्वभूतानां निग्रहानुग्रहे क्षमाः॥२५॥ मर्त्येनास्ते भुविनॄणामायुरारोग्यसंप
दः॥ दास्यंति वित्तं पुत्रांश्च परत्र तु शुभां गतिं॥२६॥ विद्यादत्तेः समभवत विश्वाख्यातं पुरा महान॥ विबुधानां
५०. परं श्रेष्ठानो भूयमिति पार्थिव॥ दाक्षायण्यां तु धर्मस्य विश्वायां तनयाहृशः॥ समुत्पन्नाः स्मृताः सोहि विश्वेदे
वा महाबलाः॥२८॥ ते तप्यंत तपो घोरं सुचिरं नियतेंद्रियाः॥ मेरुपृष्ठं समासाद्य निराहारा यतव्रताः॥२९॥
तान्पश्यद्भिर्धिश्चैव पूर्वं स्रष्टारस्तु ये स्मृताः॥ संस्थितास्तं तरे तीरे सरसो मानसस्य तु॥३०॥ ज्वाज्वल्यमानवपुषस्तपसा
द्योतितप्रभान्॥ विश्वान्देवान्महाराज धिक्ष्मस्थानिच पावकान्॥ ततस्तेषां समासाद्य समीपं ब्रह्मणः सुताः॥
पृच्छितास्ते यथान्यायं इदं वचनमब्रुवन्॥३२॥ कुशलं मनु सर्वत्र सर्वेषां वस्तपस्यतां॥ भवतां दर्शनार्था
य समायाताः स्म पुत्रकाः॥३३॥ दिष्ट्या भवद्भिर्नियमैः कर्षयद्भिः स्वकां तनुं॥ सर्वाभिभावकं ज्ञातं तपसाम
हतार्जितं॥ इति तेषां वचः श्रुत्वा विश्वेदेवास्तपस्विनः॥ पुत्रा इति समाहूता ऊचुः क्रोधसमन्विताः॥३५॥ ते यू
यमहतप्रज्ञा भ्रष्टांप्रज्ञाभिमानिनः॥ आत्मसंभावितात्मानो नापयुक्ता विचक्षणाः॥ संमंतः कीदृशोस्माकं
पितृपुत्रादिसंश्रयः॥ आयांत इति वित्ताः स्म तपसा स्वयमात्मनः॥३७॥ इति तेषां विवदतामन्योन्यश्रै
ष्ठ्यकारणात्॥ परस्परं महाराज विवादः सुमहानभूत्॥३८॥ ततः सर्वे निजं श्रैष्ठ्यं निहगाविलानगोरवा
त्॥ निश्चित्येति च कर्तव्यं ययुर्धाम स्वयंभुवः॥३९॥ तत्र गत्वा नमस्कृत्य वेधसे सर्वमात्मनः॥ समीहि
तमथाचख्युर्विवादास्पदतां गताः॥४०॥ विवादमखिलं तेषामाकर्ण्य कमलोद्भवः॥ सर्वसंदेहनिर्णेता ता ५०
न्बुद्धाचेति सादरं॥४१॥ पूर्वमन्मनसो जाता पूर्वानुग्रहतत्पराः॥ ज्यायांसः सर्वभूतानां इमे वै मात्र संश
यः॥४२॥ किंतु यूयं न तपसो ज्यायस्त्वं समुपागताः॥ तस्मात्तैः सह यतध्वं वैश्वदेवा महात्यया॥४३॥ पुत्रि

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारक

का इति यदूयं ते राहूता महात्मभिः॥ तस्मात्ते सर्वलोकानां भविष्यंति पितरोर्चिताः॥४४॥ पुत्रा इति समाहूय पुण्यां
स्ते देवसत्तमाः॥ पितृसंज्ञां प्रयास्यंति लोके पूज्यांश्च शाश्वती॥ यत्र यत्र तु वत्पूजा भवेल्लोकेषु शाश्वती॥ अभ्यंगभा
गिनो पूर्वं तेभ्यो यूयं भविष्यथ॥४६॥ पितॄनुद्दिश्य ये कव्यं दास्यंत्यपि यथाक्रमं॥ युष्मान्विना सुरश्रेष्ठास्तेषां निः
ष्फलं भवेत्॥४७॥ यश्चैव मसि देवानां अमृतां गमदाहृतं॥ तत्र पुष्पासचरसंभवत्वं श्राद्धे पैतृकः॥ इत्यन्योन्याविभ
क्तास्त द्रव्यकव्यामृताशनाः॥ यूयं तैः सह लोकेषु वर्तध्वं शाश्वतीसमाः॥४९॥ सुप्रीताः पूजकश्चापि कांक्षितार्थ
प्रदाः सदा॥ यथा वदिदूयके चिन्मानुषाः पितृपूर्वकाः॥५०॥ पितृलोकं प्रयास्यंति मृतास्तेनात्र संशयः॥ तान्पूज
यस्व यत्नेन यथाहं सोसि विस्मना॥ तेषां प्रज्ञाविधिमतो यथावच्छृणु भूपते॥ यथाविधिकृतैः श्राद्धैरिह स्वकुल
जैर्नरैः॥५२॥ ते मोदमानाः स्वे लोके वसंति पितरः स्वयं॥ श्राद्धैराप्यायिता नित्यं पितरस्ते स्ववंशजान्॥५३॥ संव
र्धयंति तत्कर्तॄन् भाग्यैर्योजयंति च॥ देशे काले च पात्रे च श्राद्धं यो विधिनार्चयत्॥ पितॄनुद्दिश्य विप्रेभ्यो दत्तं श्रा
द्धमुदाहृतं॥ नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धं च पार्वणं॥५५॥ श्राद्धं पंचविधं प्रोक्तं पितृणां तृप्तिकारणं॥ वैश्व
देवार्चसाने तु पित्र्यर्थं यद्यथाविधि॥५६॥ प्रदीयते तिथिभ्योन्नं नित्यं तच्छ्राद्धमुच्यते॥ एकोद्दिष्टविधानेन यद्धूय
प्रतिमासिकं॥५७॥ प्रत्यब्दं भावयेद्राजं स्तन्नैमित्तिकमुच्यते॥ ऊर्ध्वमेकादशाहात्तु सापिंडीकरणं विधिः॥५८॥
तत्कृत्श्राद्धं स्मृतं तस्मात्परं नैमित्तिकं भवेत्॥ देयं मृताह्न भ्रातृपुत्राद्यैर्दर्भसंस्तरे॥५९॥ उद्दिश्याहदं रः प्रेतं
पिंडं संवत्सरावधि॥ ततः संवत्सरे पूर्णे सपिंडीकरणक्रिया॥६०॥ कर्तव्या विधिवत्साद्धि प्रेतप्रीतिप्रदापरा॥
द्वादशाहे त्रिपक्षे वा षण्मासे वत्सरेपि वा॥६१॥ अधिकारविशेषोक्तः कालस्तस्यां तु नांतरा॥ सापिंडीकरणं
नाम प्रेतस्य पितृभिः सके॥ संयोजनं स्मृतं तद्धि कर्तव्यं सम्यगेव तु॥ प्रेतः पितृत्वमापन्नः पितॄनुद्दिश्य पार्थि
वः॥६३॥ प्रत्यब्दमेव कर्तव्यं स श्राद्धं सम्यमृतेहनि॥ न तत्कलं समुद्दिश्य नक्षत्रेषु तिथिष्वपि॥६४॥ श्राद्धं हि कि

एतेयत्तुकाम्यमुक्तंविशांपते॥ कन्यापुत्रविवाहाद्यैपितॄन्नांदीमुखाभिधान॥ ६५॥उद्दिश्यदिवसेयत्तुश्राद्धमभ्यु
दयात्मकं॥ यादिहोरेर्कसंयोगेपितॄन्नुद्दिश्यपार्थिवे॥ ६६॥त्रि,एतेपार्वणंयत्तुश्राद्धमुक्तंमनीषिभिः॥ संक्रांत्यामपरा

गेचयुगादौवाग्रयेद्द्रांणे॥ ६७॥ त्रीनपिंडान्वर्तयेत्प्राज्ञोमृतेदूव्येकमेवतु॥ प्रतिसंवत्सरंराजन्नन्नाग्रहायणकर्मणा॥
६६ध्वंपितॄणांकर्तव्यंतत्तयेन्नृपतेत्वया॥ त्रिविधासाचयासद्भिरुद्दितारात्तसत्तम॥ ६९॥ शाकापूपासिताद्येस्तुद्रव्यै
र्मांसविशेषतः॥ भाद्रपद्यांश्वपूज्याश्चमाघेवापियथाविधि॥ ७०॥ कर्तव्याष्टकाराजन्पितॄणांतृप्तिमिच्छता॥ नभ
स्यासितपंचम्यामारभ्यादशदूर्नृप॥ ७३॥ प्रकुर्यात्पंचदश्यान्तुअष्टकाश्राद्धमहतः॥ विभवेत्पंचदश्यांतुप्रतिपत्तिप
दादिकं॥ प्रकुर्याद्वाविधानेनपितृभ्यःप्रीतिमाचरन्॥ श्राद्धोचितंयदाद्रव्यांविशिष्टंपात्रमेवच॥ संप्राप्यदेशकालौ
वाकुर्याच्छ्राद्धंतदानृप॥ देशकालविधिश्रद्धाद्रव्यपात्रविशेषतः॥ ७४॥ तृप्तियास्यंतिविपुलांपितरःश्राद्धकर्म
णि॥ कुरुक्षेत्रेसुग्रहेविश्वोर्मोदूरेवाविशांपते॥ ७५॥ नदीसमुद्रतीरेषुहृदेगोष्ठेथपर्वते॥ समुद्रगानदीतीरेसिं
धुसागरसंगमे॥ नद्योर्वासंगमेराजन्शालग्रामशिलांतिके॥ पुष्करेचाकुरुक्षेत्रेप्रयागेनैमिषेपिवा॥ ७७॥
शालग्रामेतुगोकर्णेगयायांतुविशेषतः॥ क्षेत्रेष्वेतेषुयःश्राद्धंपितृभक्तिसमन्वितः॥ करोतिविधिवन्मर्त्यःकृत
कृत्योविधीयते॥ ७९॥ ॥ इतिश्रीब्रह्मांडपुराणेमध्यमभागेअष्टाविंशोध्यायः २८ ॥ सनत्कुमारउ०
पितृनुद्दिश्ययःश्राद्धंकरोतिनियमोनरः॥ भवेदाप्यपितंतेनजगत्स्थावरजंगमं॥ १॥ श्राद्धयोग्यंयदाद्रव्यं
क्षेत्रंचापात्रमेववा॥ समुपैतुयदाराजंस्तत्कर्तव्यंविजानता॥ २॥ अमावास्याव्यतीपातेग्रहणेविषुवेज
ने॥ युगादिषुचसर्वेषुसंक्रांत्यावादिनक्षये॥ ३॥ ग्रहनक्षत्रपीडासुदुःस्वप्नेषुविशेषतः॥ अमावास्या
यदायुक्ताचित्रार्क्षपरिसंयुतः॥ ४॥ तदास्यवार्षिकींतृप्तिमायांत्यपिपितरोर्चिताः॥ रोद्रऋक्षान्वयेयद्दमा
वास्यायदातदा॥ ५॥ पूजितास्तेनुसंयांतितृप्तिंद्वादशवार्षिकीं॥ वासवाग्नेकपादर्क्षेवारुणेवाद्यासिता॥ ६

भवेत्पंचदशीसाध्यदेवानामपिदुर्लभः॥ तदासंपूजिताःश्राद्धैःपितरःसपितामहाः॥ ७॥ मोदंतेपितृलोक
स्याःसम्यग्वर्षाणिषोडश॥ वैशाखमासस्यासितातृतीयाचैवकार्तिके॥ ८॥ नवोदशीनभस्यंतुकृष्णमाघेश्रा
शिस्मयः॥ अष्टकात्रितयेतद्वदयनग्रहणद्वये॥ ९॥ करिष्येतेषुयोमर्त्यःपितृप्रीतिमभीप्सति॥ कुर्याच्छ्राद्ध
मथातश्चेदापिदद्यात्तिलोदकं॥ शाकमूलफलान्नैर्वापितॄन्संतर्पयेत्तदा॥ यःसतेनकृतंश्राद्धंभवेद्वर्षसहस्र
कं॥ ११॥ वारुणेनसहर्षेण अमापंचदशीनृप॥ असितानल्पपुण्यैःसालभ्यतेपरमातिथिः॥ १२॥ कनिष्ठावाभ
वेत्तस्मिन्यदातिलजलादिकं॥ तदादत्तंप्रणयतिनृपवर्षायुतंपितॄन्॥ १३॥ पूर्वाभाद्रपदाचीतत्तस्मिन्योगमुपे
ष्यति॥ तदाश्राद्धंप्रकर्तव्यंजन्मसाफल्यमिच्छता॥ -- यांकेनदत्तेनतदापितृगणाःसुखं॥ स्वपंतिकुललोकेस्विन्नृप
यावच्चतुर्युगं॥ १५॥ तदास्नात्वाब्धिगायांतुनद्यांतिलजलाक्षतैः॥ मिश्रंदद्यात्पितॄणांतुपिंडंयोदर्भआस्तरे
॥ १६॥ पितरस्तेनपिंडेनप्रदत्तेनस्वयंद्विजैः॥ प्रीतिमायांतिविपुलांभवंतिचनिरामयाः॥ सुखंस्वतेनचान्नेन
तत्कालेभक्तितःक्षुधाः॥ श्राद्धंदद्यातद्विजाप्रीणांतन्मात्रविभवोपिसन्॥ अन्नपानादिकंकिंचितवन्यंवामांस
मेवच॥ प्रदद्याद्द्विजविप्रेभ्यःस्वशक्त्यानैवदक्षिणां॥ १९॥ दद्याद्द्विजायवाद्यंवाश्राद्धेभक्त्याद्विजातये॥ न
चर्वध्याद्दिनंराजन्कथंचिदपिकुर्वता॥ २०॥ पितृभक्तिमनाभाव्यंपुरुषेणविजानता॥ शशश्वकरमल्पेनन
कुलच्छागरोरवैः॥ २१॥ आमिषेस्तृप्तिमायांतिश्राद्धेषुपितरोक्षयां॥ स्वधोक्तीराजतंपात्रंदौहित्रःकुतप
स्तिलाः॥ २२॥ वस्तश्चपालनीयानित्रिदंडीयोगिरेवच॥ पूर्वेन्हिरात्रौविप्राग्र्यान्कृतसायंतनान्नरः॥ २३
गत्वान्निमंत्रयेदेवविप्रंवेदसमन्वितं॥ क्रोधायासत्तितोभूत्वातस्मिन्रात्रिद्वयेन्नृप॥ २४॥ व्यवायीरेतसं
कूपेमज्जयत्यात्मनःपितॄन्॥ तस्माद्दिपूर्वमेवाह्निविप्रमुख्याननिमंत्रणं॥ २५॥ अन्यथाब्रह्मचर्यादिलोपात्
प्राप्नोतिकिल्बिषं॥ संस्कृत्यभक्ष्यभोज्यादिशक्त्यादेशेसमाहितः॥ २६॥ एकांतेजनसंमर्दरहितेभोजयेद्द्विजा

 श्राद्धे पंचविधे राजन् विश्वे नाम दशामराः ॥ २७ ॥ द्वौ द्वौ तेषु प्रयोक्तव्यौ पितृभिः सह भक्तितः ॥ क्रतुर्दक्षौ वसुः स
त्यकालकामौ धरारुचिः ॥ २८ ॥ पुरूरवा द्रवाश्चैते विज्ञेया धर्मसूनवः ॥ श्राद्धे नैमित्तिके राजन् क्रतुर्दक्षौ नियो
जयेत् ॥ २९ ॥ अष्टकायां कालकामौ श्राद्धे नांदीमुखे तथा ॥ वसुसत्यौ कालकामौ समुद्दिष्टौ धरारुचिः ॥ ३० ॥ पुरूर
 वाद्रवाश्चैव तथैव च पितामहाः ॥ अनर्धकनाया: श्राद्धेषु यथा व्यवस्थित रो द्विजाः ॥ मातामहानामप्येवं कर्तव्यमिति
पार्थिव ॥ श्राद्धं श्रद्धावतां प्राहुः पितृभ्यस्तृप्तिमिच्छता ॥ ३२ ॥ अप्रज्ञो सति सामर्थ्ये समुद्दिश्येति केचन ॥ वदंति भो
जयेत्तातान् उद्दिश्य पितृपूर्वजान् ॥ ३३ ॥ द्विजाग्र्याणां च संपत्तौ भोज्यस्य च विशेषतः ॥ युग्मान्वै भोजयेद्विप्रान्
दैविके स्वेच्छया नृप ॥ ३४ ॥ सामर्थ्येपि न चन्यो वांकृ भोजयेत्तु तिवैद्विजान् ॥ नोर्ध्वं कर्तव्यमित्याहुः केचित्तत्क्षम
दर्शिनः ॥ द्विजाग्र्याणामभावे च सामर्थस्यापि चानृप ॥ युग्मायुग्मविधानेन विप्रान्यच्चैव भोजयेत् ॥ ३६ ॥ द्वैदैवे
पितृकार्ये च एकैकमुभयत्र वा ॥ भोजयेत् सुसमर्थोपि न कुर्याद्विस्तरं सुधीः ॥ आम्रास्यभारुतगिरिं वेदस्वाध्या
यतत्पराः ॥ मनोज्ञ वपुषः शांतान् ऋद्धवालान्निमंत्रयेत् ॥ ३८ ॥ तरुणादिक्रमात्सर्वोपिवादिषु नियोजयेत् ॥ त
त्रापि तरुणावेव द्वौ दैवे विनिवेशयेत् ॥ सत्क्रियां देशकालौ च शौचं ब्राह्मणसंपदः ॥ इति पंचगुणानेतानः
विस्तरस्तन्न कारयेत् ॥ ४० ॥ स्तेनः क्लीबो नास्तिकश्च यो द्वयं प्राणसंस्थयः ॥ पुरुषाग्नो मनोदुष्टोऽथ मानाभि
यान्वकः ॥ द्विषत्सुपतिश्चैव दधिषूपतिरेव च ॥ संबंधिनश्च येतेषां दातारोयाचकास्तथा ॥ ४२ ॥ मृतेवासति वा
तस्मिन् भ्रातुर्भार्याविदूषकः ॥ अन्यत्पूर्वापतिश्चैव कन्यादूषण एव च यः ॥ ४३ ॥ स्त्रीग्रामयाजकोचापि मद्दिषो
ष्ट्राभिरक्षकः ॥ परस्त्रीनिरतो यश्च भार्यायस्यान्यसंगिनी ॥ कुंडश्च गोलकश्चैव मीसमानप्रवराभिगः ॥ पुत्राग्नि ५२
ष्यमित्रस्त्रीषु सगोत्रा पंच योरताः ॥ ४५ ॥ पतिताभिरतश्चैव प्राणिहिंसारतश्च यः ॥ परिवित्तिः परिवेत्ता यया
द्दिस कल्यच ॥ ४६ ॥ सर्वानिष्टाश्च एतेषां दातारोयाज्ञकाश्च ये ॥ मादस्त्रीग्रास्त्रपाणिश्च हीन प्रजननस्तथा ॥ ४७ ॥

रंगलोपसेवी यंगश्च कुनखी श्यामदंतकः ॥ अजयः स्वैरिणीपुत्रो व्यसनी नास्तिकस्तथा ॥ ४८ ॥ पिशुनो राजसेवी च
छद्मनाव्यवहारकः ॥ निक्षेपहारी वै स्तोवंचकः शूद्रसेवकः ॥ शूद्रोत्पतिः स्त्रीजितश्च स्त्रीप्रेष्यो नाश्रमी खलः ॥
कुसाक्षी भूमिहर्ता च कुष्ठी चापत्यविक्रयी ॥ चित्रशल्य धनुः शल्यवेणुवीणोपजीवकः ॥ गीतनृत्योपजीवी च त्वमाता
पितृगुरुद्विषः ॥ ५१ ॥ साध्वीभार्यापरित्यागी रसविक्रयकृत्तथा ॥ नृत्यं सानिंदितक्लीच स्त्रीग्रामगुरुयाजकाः ॥ ५२
एते निंदितकर्माणः श्राद्धे नार्हंति सत्क्रियां ॥ यज्ञकर्मणि सोमस्य विक्रेतारोयथा नराः ॥ श्राद्धार्हगुणयोगेपि नैतज्ज्ञा
गु कथंचन ॥ निमंत्रणाया: श्राद्धेषु सम्यकृफलमभीप्सता ॥ ५४ ॥ निर्दोषं गुणवंतं च दैवे पित्र्ये च केवलं ॥ भोजयेदेकमे
वापि सदोषान्त बहूनपि ॥ विप्रे सदोषे गुणिनि सति वा विप्रमात्रके ॥ संपूज्यो विप्रसामान्यो न तु दोषा कथंचन ॥ ५६ ॥ द्वा
वेकं वा द्विजवरं भोजयेच्छ्राद्धकर्मणि ॥ सदोषान्निर्गुणान्वापि न बहून्विनिमंत्रयेत् ॥ श्राद्धे नियुक्तः श्रद्धा च स्वाध्यायमै
थुनं तथा ॥ वर्जयेन्नु तथायासं प्रवासं च प्रतिग्रहं ॥ ५८ ॥ ॥ इति श्रीब्रह्मांडपुराणे मध्यमभागे नवविंशोध्यायः
॥ २९ ॥ ॥ ७ ॥ सनत्कुमार उ० ॥ ये पंक्तिपावना: श्राद्धे तान्निबोध नरेश्वर ॥ यथा तु सन्निधौ श्राद्धे दोषान्निर्दोषतां व्रज
त ॥ १ ॥ त्रिनाचिकेतस्त्रिमधुस्त्रिसुपर्णः षडंगवित् ॥ वेदविद्धर्मशास्त्रज्ञः पंचयज्ञरताः सदा ॥ २ ॥ चतुर्दशानां वि
द्यानामेकः स्यापारगोपि यः ॥ ब्रह्मदेयानुसंतानाएते वै पंक्तिपावना: ॥ ३ ॥ वेदविद्याव्रतस्नातायेवाद्वादशपूर
र्णं ॥ कुलज्ञः श्रोत्रियो वंश उभयोः सोपितद्गुणः ॥ ४ ॥ चतुर्मेधास्त्रिवेदा चाविद्वान राज्ञसेनायकः ॥ एषामन्यतमः श्रा
द्धे यस्मिन्मुक्तो द्विजोत्तमः ॥ ५ ॥ श्राद्धे तस्मिन् पितृगणा देवाश्च स्युः सुपूजिताः ॥ सा यत्र भुक्ते सगुणान्निर्गुणान्वा
खिलाद्विजान् ॥ संभावयित्वाविधिवत्पादशौच समाचरेत् ॥ कुलिकृद्दौहित्रजामातृस्वास्त्रियः श्वशुरश्च यः ॥ ७ ॥
शिष्यसंबंधिनश्चैव तपस्वी मातुलस्तथा ॥ एतान्निमंत्रयेच्छ्राद्धे सद्गुणान्दोषवर्जितान् ॥ तत्र मातामहश्राद्धं वैश्व
देवसमन्वितं ॥ एथक्कर्तव्यमित्येके ब्रुह्निरन्ये सहेतिच ॥ ९ ॥ प्राङ्मुखान्भोजयेद्विप्रान्दैवे पित्र्ये उदङ्मुखान् ॥ उदङ्

मुखान्प्राङ्मुखांवासर्वान्देवानिवेशयेत॥३०॥ अनतिक्रमणीयश्च कुतपाख्यः कथंचन॥ कालःश्राद्धकृतः पात्रे
सति सोऽद्विजएवच॥३१॥ पितृदेवकृतोद्देशान्मंत्रयेभ्यागतान्द्विजान॥ संभावयित्वाविधिवत्पादशौचं समा
चरेत॥ उपलिप्य शुचौदेशे गोमयेनोदकेनच॥ विन्यस्य पीठपुरतस्तस्मिन्दर्भान्विनिक्षिपेत॥३३॥ प्राग्दर्भाति
तैर्युक्तान्गंधपुष्पाक्षतान्भुवि॥ विकीर्य विधिवत्कुर्यात्द्विजपादावसेचनं॥३४॥ उदङ्मुखोपविष्टानां द्विजानां
काम्यकृद्विधौ॥ प्रकुर्यात्प्राङ्मुखःसर्वं देवानां तिलवर्जितं॥ अन्यत्राचमनार्थाय परिपीठं च कल्पयेत॥ पादशौच
मथाशौचं विद्वान्नैकारयेद्द्विजान॥३६॥ यावद्विभाति भूमिष्ठं पादनिर्णेजनोदकं॥ तावत्पितॄणामाल्हादः कमला
न किल जायते॥३७॥ रक्षोघ्नमन्यतस्मात्तु नैवचाचोभयं बुधः॥ कुर्यादेकत्र कमलस्तत्कृत्वा पाद्यमवाप्नुयात॥३८॥
पवित्रपाणिराचांतानासनेषूपवेशयेत॥ साग्रान्दर्भान्विष्टरार्थं दद्यात्तेषां पृथक्पृथक॥ ततोभ्यनुज्ञाय देवानपि
तॄनपि यथाक्रमं॥ आवाह्यार्थं तथा दद्यान्मंत्रपूर्वं यवांबुना॥२०॥ गंधपुष्पाक्षतैस्तांस्तान्संपूज्य तदनुज्ञया पि
तॄन्नावाहयेत्पश्चात्समंत्रं दक्षिणामुखः॥२१॥ तिलांबुना पितॄणां तु दद्यादर्घं समंत्रकं॥ अपसव्यक्रमादेव तेषां
सर्वं प्रकल्पयेत॥२२॥ अर्घ्यादि धूपदीपांतं पूजयित्वा यथाक्रमं॥ पात्रान्नसंस्कृतिं कुर्याद्दाज्येन तु सकृत्सकृत॥२३
रक्षोघ्नमंत्रपठनं प्रकुर्याच्च समाहितः॥ तिलैर्विकिरणं कुर्यात्रक्षार्थं तत्र सर्वतः॥२४॥ अतिथिर्यदि तत्कालेस
मायाति बुभुक्षितः॥ विप्रैस्तत्राभ्यनुज्ञाय सम्यक्तमपि पूजयेत॥२५॥ ततस्तानभ्यनुज्ञाप्य यज्ञं नक्षारवर्जि
तं॥ पितॄन्ध्यात्वानले सम्यक्जुहुयाच्चाहुतित्रयं॥२६॥ अग्नये कव्यवाहनाय पितृभ्यश्च स्वधायुतं॥ पितामहे
भ्यः सोमाय यथा पितृमते तु तां॥२७॥ कुर्यात्पूर्वं ज्ञात्वा श्वाद्यमायेत्यग्निनायुतं॥ उत्तरं सर्वविप्रपात्रेष्वयोजये
च्च पृथक्पृथक॥ ततोऽन्नपायसापूपं मधुमांसादिकं जनेः॥ दत्वा समर्पयित्वान्नं दद्यादुदकमेव च॥२९॥ ततो
ध्यात्वाच पितरं गंधपुष्पाक्षतोदकैः॥ नमस्कृत्य प्रकर्तव्यं जुषध्वमिति सादरं॥३०॥ तस्मिमायां तु तेनाद्य श्राद्धेषु द्वि

जरूपिणः॥ ध्यायन्निति सकृत्सेषु द्विजेषु तेषु भक्तितः॥३३॥ अथ शेषं प्रविकिरेद्दर्भेषु विधिवन्नृप॥ उदङ्मुखेषु
विप्रेषु देवानां सयवोदकं॥३२॥ सम्यक्क्रमेण पिंडं तु दद्याद्विविष्मु सन्निधौ॥ अमन्त्र पतितं शेषमन्नस्य विकिरेति
च॥ असोमपानां देवानां तेन स्यात्तृप्तिरुत्तमा॥ पितॄणां मनुजश्रेष्ठ तत्कथं हि विजानता॥३४॥ ततस्तेषां सकृत्सानां त्व
गसंभ्रमवर्जितं॥ दद्याद्वाचमनार्थं च जलं राजन्सकृत्सकृत॥३५॥ उपलिप्य ततो भूमौ गोमयेन ततः शुभे॥ दर्भान्पारि
स्तरेत्साग्रान्दक्षिणाग्रान्मुखो द्विधा॥ गंधपुष्पाक्षतैः सम्यक्पूजयित्वा यथाविधि॥ पितृभ्यः पितृतीर्थेन दद्याच्चे
वतिलोदकं॥३७॥ तिलाज्यमधुसंमिश्रं प्रदद्याद्दर्भसंस्तरे॥ पिंडत्रयं स्वपित्रादिनामगोत्रयुतं बुधः॥ मातामह
नामपि चविधिरेषः प्रकीर्तितः॥ पिंडमूलेन शेषेण कुर्यात्लेपाघमर्षणं॥३९॥ गंधपुष्पाक्षतैः सम्यक्पूज
यित्वा यथाक्रमं॥ पितॄन्नयादिजानां तु दद्यादाचमनं नृप॥४०॥ ततस्तिलोदकं तेषां दत्वा दत्वा पृथक्पृथक॥
पात्राण्युद्धृत्य तत्रापि यथावद्वाचयेत्स्वधां॥४१॥ कृतस्वधेति श्रवं पिंडान्सेचयेत्तेन वारिणा॥ अस्तु स्वधेति तेन
श्चापि वक्तव्यं विधिवन्नृप॥ वैश्वदेविकमंत्रेण दत्वा हस्ते यवोदकं॥ विश्वेदेवास्ततः सम्यक्प्रीयंतामिति कीर्त
येत॥४३॥ तथेत्युक्ते च तैस्तेषां यथाशक्ति च दक्षिणां॥ दत्वा विसर्जयेत्पूर्वं पितॄन्देवांस्ततः परं॥४४॥ संप्र
स्थितान्यथाशक्ति पूजयित्वा द्विजोत्तमान॥ आद्वारं तमनुव्रज्य निवर्तेत नृपोत्तम॥ ततो वैश्वाक्रियां चास
माप्य नियतो नरः॥ यथा सकृत्प्रभुंजीत सार्धं स्वजनबंधुभिः॥४६॥ एवं यः पूजयेच्छ्राद्धे पितॄन्भक्तिसम
न्वितः॥ नस्येष्टमखिलं तेद्धि प्रदास्यंति न संशयः॥ यथा संतानसंसिद्धिः समाकुलितचेतसां॥ तत्प्रवक्ष्या
मि कर्मान्यत संततिर्येन लभ्यते॥४८॥ सामर्थ्ये सति वर्षाणां त्रयं नित्यमतंद्रितः॥ एकैकवृद्धिदासाभ्यां
कुर्यात्पिंडभोजनं॥४९॥ कर्मणा तेन महता स नरो राजसत्तमः॥ संतानं कुलवृद्धिं च संप्राप्नोति न संशयः
५०॥ नारद उ०॥ कथयित्वेति तं भूयो मुनिः प्राह नृपोत्तम॥ अनेन विधिना सम्यक्पूजय स्वपितॄन्त्र

ब्रह्मांडपु- मात्॥ ततस्तल्लभ्यते भीष्टं तत्सौनात्र संशयः॥ पितृपूजाविधेः सम्यक् अनंतरमहं पुनः॥५३॥ भवंतमागमि
ष्यामि विज्वरो भव माश्रुतः॥ ओमित्युक्त्वाथ देवर्षी राजस्तौ प्रणतिस्थितं॥ तत्रैवांतर्दधे राजन् क्षणेनन्नृपः
संसदि॥५४॥ ॥ इति श्रीब्रह्मांडपुराणे मध्यमभागे त्रिंशोऽध्यायः ३०॥ ॥७॥ नारद उ०॥ ततो रा
५३ जा महाबुद्धिः समं कुलिकुपुरोहितः॥ पितॄंनाराधयामास यथाविभवविस्तरं॥१॥ पितॄन्संवत्सरस्यास्मारभ्याह्न
भोजनं॥ एकैकवृद्धिह्रासाभ्यां चक्रे वर्षत्रयं नृपः॥२॥ श्राद्धैरनेकैः सापत्नृन्तर्पयानस्य भूपतेः॥ वर्षत्रये यतीते तु संतु
ष्टाः पितरो भवत॥३॥ ततोस्य जज्ञिरे पुत्राः त्रयः परमधार्मिकाः॥ उत्कीर्तिपश्च्याविनतो नाम्नांते देवसंप्रभाः॥४॥ पुत्रज
न्मसुदं प्राप्य स राजा धर्मतत्परः॥ ईयाज्यैर्जयर्यज्ञैर्विविधैः समाप्तवरदक्षिणैः॥५॥ प्रशशास च धर्मेण समर्दामवनीम
ही॥ भक्तिन्नरे च देवेशे बभाराननयगामिनीं॥६॥ तस्य वृद्धस्तति भूर्लोकमिलेतस्य पितुः सुतः॥ बभूवुरपरे राजन् इक्ष्वाकु
प्रमुखा दश॥७॥ प्रशंसानैव वक्तुं सच राजा महामतिः॥ गुणैरुदारैरखिलारंजयामास वै प्रजाः॥८॥ यज्ञैरनेकैर्वि
धिवत सर्वयज्ञेश्वरं हरिं॥ भक्त्या संपूजयामास वर्षाणां च शतत्रयं॥९॥ एतस्मिन्नेव काले तु मार्कंडेयो महामुनिः॥ अ
भ्याजगाम तं द्रष्टुं राजानं भृगुनंदनः॥१०॥ तं दृष्ट्वाभ्युपसंगम्य पाद्यार्घ्यैर्विधिवन्नृपः॥ मार्कंडेयं महात्मानमुपचारैरपू
जयत॥११॥ तौ तत्र सुचिरं कालं कथयंतौ कथाः शुभाः॥ रंभायां सुखमासीनौ प्रीयमाणौ परस्परं॥१२॥ प्रणम्य तत्पुरः
स्थित्वा तुष्टाव च महीनृपः॥ संभावयित्वा तौ सम्यक् राजानं प्राह केशवः॥१३॥ किमिच्छसि महीपाल मत्तस्तद्ब्रूहि माचिरं॥ दा
स्याम्यभिमतान्तुभ्यं देवानामपि दुर्लभं॥ ततो वव्रे हदा भक्ति राजा नत्वा रणं बुजे॥ कीर्तिं च धर्मसततं स्वर्गवासं तथाक्षयं
॥ ततस्तदखिलं दत्वा वंशश्रियो ब्रवीद्धरिः॥ भक्तिं चांजस्त्वे वैश्रेयस्तस्मात्वं मत्प्रसादतः॥१६॥ प्राप्स्यसे तन्नसंदेहो यद ५३
पि स्यात् दुर्लभं॥ गत्वा महीं महीपाल सम्यग्धर्मपरो भवत॥१७॥ ममैव प्रतिमां लोके प्रतिष्ठाप्याभिपूजय॥१८॥ ना
रद उ०॥ इत्यादिष्टो भगवता तं प्रणम्य नरेश्वरः॥ अभ्यानुज्ञाप्य च पुनर्जगाम स नरं प्रति॥१९॥ प्राप्य स्वपुरं राजा सु
हृद्भिरभिनंदितः॥ चकारानंदिनं पूज्यां भक्तियुक्तो जगत्पतेः॥२०॥ ग्रामे पुरे जनपदे तत्र तत्र महीपतिः॥ प्रतिमां स्थाप

यामास यथावज्जगदीशतुः॥२३॥ शंखचक्रगदापद्महस्तायाः केशवादिकाः॥ मूर्तयस्तु चतुर्विंशत् भेदभिन्ना
जगत्पते॥२२॥ ताभिर्भुवमशेषां तु स्थापिताभिरशोभत॥ अलंचकार राजेंद्रः यथाशास्त्रमतंद्रितः॥ अश्वमेधा
दिभिर्यज्ञैस्त्रैतैरपि च वैष्णवैः॥ निनाय कालं विधिवत एवं स स्थिरयौवनः॥२४॥ स कदाचिन्महीपालो बलेन म
हतावृतः॥ मृगयार्थं ययौ श्रीमान् हिमाद्रिगहनं वनं॥२५॥ नानामृगगणाकीर्णं तरुखंडोपमंडितं॥ लतागुल्मा
दिभिर्दुर्गं बहुनिर्झरकंदरं॥ संप्रविश्य वनं तत्तु राजा सबलवाहनः॥ निघ्नन् विलोकयामास क्रूरसत्वान्यनेकशः २७
परिवार्य वनं सर्वं बलैर्नानाविधैरपि॥ निहतप्रायद्विंसौघं चकार निशितैः शरैः॥२८॥ रुरुसारंगसरभद्वारि
शूकरजातयः॥ निहन्यमाना नितरां बभूवुर्भ्रांतचेतसः॥२९॥ सितसायकनिर्भिन्ना गवाः केसारिणा वने॥ आर्त
नादं विमुंचंतो न्यपतन् भुवि केचन॥३०॥ वराहरुरवश्चैव वनेषु च विदारिताः॥ प्रदृश्यंते च शतशो रुधिरारु धावमानाः
णाः॥३१॥ एवं निघ्नन् मृगगणान् विचरन् वनगह्वरे॥ विवेशाश्वद्वितीयोसौ वनमभ्यछ्रमान्वितः॥३२॥ फलप्र
सूनाघनताः प्रशाखैरवेष्टिताः॥ कुष्मफलादिभिर्वृक्षैः समंतादुन्नतायशाखैः॥ रलंकृतं शाद्वलभूप्रदेशं
नीलारुणानेकविचित्रवर्णैः॥ पत्रप्रवालप्रसवैः प्रसन्नैः संलक्ष्यते यत्तु उदिदंदुचाय॥३४॥ समेतनीरंध्रवनो
पमानं यस्मिन् वने पुष्पितमालतीनां॥ गुल्मानि मंदानलजीवितानि आश्रित्य गायत् भ्रमराणि सिद्धु॥३५॥ गंध
र्वयध्वा मुदिता रमंति यस्मिन् वने मंदमरुद्विकीर्णा विचित्रपुष्पोत्करसंदितेषु॥ स्थलेषु लाक्षारसरंजितानि प
दानि राजंति सुरांगणानां॥३६॥ गणामुखेभ्यो विरमंति यस्मिन् वने समंताद्रुनदेवतानां॥ यस्मिन् वने किन्नर
तारतानान्याकर्णमानिः कंपभृतानिकीर्णे॥३७॥ यस्मिन् पुरा दुश्चरं अमंदुमौलेभक्तिं वदंत्याचरणारविंदे॥ अ
नन्यसामान्यपदेप्स यो च्चैस्तप्तं तपः पर्वतराजपुत्र्या॥३८॥ अनन्यभाक्त्वं भगवान्मुरारिर्वितापसंप्रीत
मना स्तपोभिः॥ यस्मिन् समासाद्य वरप्रदानं चक्रे प्रसन्नो दुहितुर्हिमाद्रेः॥३९॥ यस्मिन् गिरीशेन समं भवानि

निषेव्यमानावनमारुतेन ॥ मुदात्मनारोपितकल्पवृक्षछायासुरेमे परिसंचरंती ॥ ४०॥ तपोवनं तद्गिरिपुराकदा
चिदुमाद्वितीयः प्रविवेशसर्वः ॥ कालेवसंतेमधुरं पिनाकेचूतावलीव्याकुलमाल्यपत्रे ॥ ४१॥ मनोहरेसमूर्छति

किंनरीणांसतारनादेनघनाकुलानां ॥ पुष्पद्रुमेषुद्रुतरागभावंभ्रमद्भ्रांसुसंप्रीतसमाकुलेषु ॥ ४२॥ उमापति
स्तत्रमनोसरब्धुःश्रियंसमग्रामततिवीक्ष्यरम्यां ॥ वसंतवंधत्तसवमावभूवन्नावापसर्वामहतीरिरम्यां ॥ ४३
तस्मिन्कालेसुराःसर्वेकेनचित्कारणेनतु ॥ दिदृक्षवोभवंदूरादुपाःसर्प्यतसत्वराः ॥ ४४॥ तानथोवजतोदूराद
यस्यदमरानुमा ॥ बभूवसाध्वसोपेतातपयावनतातदा ॥ ४५॥ ससंभ्रमंसमुत्थायवसनावसनंशुभं ॥ अलक्ष
तस्करेर्दैवातिरोभावमियेछति ॥ तावत्संकाकुलादेवादूरादेवभयान्वितः ॥ विनिवृत्यभयात्तस्मादभिसस्युर्वृह
द्रियः ॥ ४७॥ तयाभिभूतांगिरिजांदृष्ट्वापशुपतिस्तदा ॥ तत्त्वसयेशापनकुद्धोरतिभंगप्रधार्षितः ॥ ४८॥ अद्य
प्रभृतियःकश्चिद्वनमेवप्रविश्यति ॥ संप्राप्नोतिपुमान्सद्यःस्त्रीभावंनात्रसंशयः ॥ ४९॥ इतिसर्वस्यविचरतप्र
भृतिनसुरादिषु ॥ प्रवेशात्तद्वनंकोपिस्त्रीभावंसमगछति ॥ ५०॥ ततस्तत्सर्वलोकेषुख्यातमार्यातपोवनं ॥
पुंस्त्वभावभयात्पुंसःसदापरिहरंतिहि ॥ ५१॥ अश्वद्वितीयोन्यपतिर्दैवयोगेनतद्वनं ॥ प्रविवेशमहाबाहुर्मृ
गयाश्रमकर्षितः ॥ ५२॥ प्रविष्टमात्रएवाशुशार्वशापबलात्ततं ॥ योविद्वावंसमापेदेमनुसूनुर्महायशाः ॥
ततःस्त्रीभावविहतिंसराजावपुरात्मनः ॥ विलोक्याबापविपुलंशोकंविस्मयमेवच ॥ ५४॥ शशांकशुभ्रवदनपी
नोन्नतपयोधराः ॥ सबभूवतदानारीसर्वाभरणभूषिता ॥ वीणेवमधुरारावसंतस्तकनकप्रभा ॥ सुकुमारत
राशेषयुवानेत्रमनोहरा ॥ ५६॥ कान्हंकस्यागमिष्यामिकुचेतिमनसास्वयं ॥ विवभ्रामचनेतस्मिनआत्मानय
विजानती ॥ ५७॥ एवंस्त्रीभावमासाद्यसभूयोमनुनंदनः ॥ चचाराश्रमपर्यंतेबुधस्यतपतस्ततः ॥ यःसदे
वगुरोःक्षेत्रेकामिनःप्रीतरोचिषः ॥ जातोद्विदयितःपुत्रःश्रीमानन्वयवर्धनः ॥ ५९॥ सत्वाश्रमपदंकृत्वा

तपस्वीनिभृतेंद्रियः ॥ प्रचचारतपोघोरंपादेहिमवतःपुरा ॥ ६०॥ तस्याश्रमपदोपांतेवनंकुसुमितद्रुमे ॥ च
चारेलात्वनेराजनकुसुमानिविचिन्वती ॥ तयोवनगतांतांतुसोमसूनुर्महायशाः ॥ ददर्शगहनेतस्मिनवंचिते
हियदृछया ॥ ६२॥ सदृष्टातांवरारोहांपृथुचार्वाचितेक्षणं ॥ विस्मयंतवधेतस्यरूपद्रविणसंपदा ॥ वरांविलो
क्यतांतस्याहावभावविमोहितः ॥ बुधःस्त्रीभोगतृष्णात्मासबभूवविधेर्बलात् ॥ ६३॥ आव्हयामासकामा
र्तस्तांबुधःसाचतंप्रति ॥ सानुरागासमापेदेतत्पार्श्वमविलंबिता ॥ ६४॥ रममाणाचिरंतेनत्यवसत्तातदाश्र
मे ॥ विहायनियमंसापिकामात्मासमपद्यत ॥ ततस्तस्यामभूत्पुत्रोबुधस्यन्रपसत्तम ॥ पुरूरवामहाबाहुः
सोमवंशधरंधरः ॥ ६६॥ एवमाद्येभवद्राज्ञावंशानांसोमसूर्ययोः ॥ इतःसूर्यान्वयेश्रेष्ठसोमस्यापिचतः
स्मृतः ॥ ६७॥ ॥ इतिश्रीब्रह्मांडपुराणेमध्यमभागेएकत्रिंशोध्यायः ॥ ३३॥ नारदउ॰ ॥ निवसत्यांततस्त
स्यामिलायांतुबुधाश्रये ॥ दिनानिकतिचिद्राजनगतायुक्तास्ससंभ्रमाः ॥ १॥ यत्नेनमहतासर्वेविचरंतोवना
द्वनं ॥ मार्गेणयत्नमातस्थुर्दिवारात्रिमतंद्रिताः ॥ २॥ तस्यामात्येनन्रपतिर्गहनेषुविमार्गेता ॥ आसादितोदै
वयोगात्तदयस्तोबुधाश्रमे ॥ ३॥ सतमादायसहितःसेनिकेश्रमसामातिः ॥ राज्यच्युततयातस्यानिनायपि
तुरंतिकं ॥ ४॥ नदास्येव्रतमादिश्यशंभुप्रीतिकरंमनुः ॥ तपसेप्रेषयामासपुनरेवतपोवनं ॥ ५॥ सतुसंचोदि
तःपित्रास्त्रीभावस्यापनुत्तये ॥ शंभुमाराधयामासवकृत्वषंगणान्तपः ॥ ६॥ स्त्रीभावंसमनुप्राप्यतपोव
नमिलेगते ॥ मनुःकनीयसंपुत्रंयोवराज्येभ्यषेचयेत ॥ ७॥ ईलायास्तपसाराजनप्रसन्नोवृषभध्वजः ॥ प्रत्य
क्षतामुपागम्यप्रसादादिदमब्रवीत ॥ ८॥ किमिछसिवसंभद्रेमतस्तद्रूहवशेषतः ॥ तपसातवतुष्टोहंप्रदास्या
मिसुदुर्लभं ॥ ९॥ ततःप्रणम्यदेवेशंशूलपाणिमुमापतिं ॥ यद्यचेळावरंराजनअभिसृत्यप्रसाद्यच ॥ १०॥
इलोवाच ॥ दैवयोगेनमेप्रासंस्त्रीभावमतिचापलं ॥ तद्विप्रमोक्षभगवनप्रसंनोदातुमर्हसि ॥ ११॥ शंकरउ॰

अस्कांउपु· मच्छापेनैवेप्राप्तं स्त्रीभावमनिवर्तितं॥ तथापितपसा तुष्टस्तव कर्तास्म्यनुग्रहं॥३२॥ मासमर्धं प्रभृत्येव पुमान भ
वमहामते॥ तावत स्त्रीत्वं पुनः पुंस्त्वं पर्यायेन भविष्यसि॥३३॥ एवं प्रवर्तमानस्त्वं कंचित्कालं निजे पुरे॥ भुंजानो विवि
धान भोगान स्वराष्ट्रं परिपालय॥३४॥ निर्विद्य राज्यभोगास्य पुनश्च तपसा त्वच॥ एष्यामि भवते प्रीतो यथाभिल
५५ षितान्वरान॥ इति दत्वा वरं तस्मै भगवान भक्तवत्सलः॥ क्षणेन पश्यतस्तस्य पुरतोंतरधीयत॥३६॥ इति लब्धवरः शं
भोः संप्राप्यं पितुरंतिकं॥ तस्मै सर्वं यथावृत्तमामतिः - - - - सतु पुंस्त्वं समासाद्य गिरिशेन यथोदितं॥ शशास
पृथिवीं सर्वां समृद्धामकंटकां॥३८॥ स्त्रीभावे नतिनीषंतमायुषोर्धं महेश्वरः॥ स्त्री पूर्वं जननत्वाच्च ह्यनुरज्यंत
ताः प्रजाः॥३९॥ गुणैरुदारैरिक्ष्वाकुर्भर्त्रा मुदितमानसः॥ तमाच कांक्षिरे राजन शासितारं भुवः प्रजाः॥४०॥ जनैष
नभिद्वैनं नृपौरजान परीक्षिति॥ स्त्री पूर्वत्वेन चात्मानं चिंतयामास वै तदा॥४१॥ प्रजानां रंजनत्वेन नृपाणां राजशब्द
ता॥ सार्थकास्यात्तु सद्दृशे केवलं शब्दकौतुकी॥ प्रजारंजनशोभित्स्यरहितस्य प्रयोजनं॥ किमेराज्येन भोगैश्च प्रा
णैर्वासाधु निंदितैः॥४३॥ इत्थं निरण्य मनसा वचः शंभोश्च पार्थिवः॥ पुनरेव तपश्चर्तुं गंतुमैच्छत पोवनं॥ रा
ज्यलक्ष्मीमपाहाय समृद्धं भोगमेव च॥ आरिराधयिषुः शंभुं प्रजगाम तपोवनं॥४५॥ तत्र कृत्वाश्रमपदं नि
यतो नियतेंद्रियः॥ तपस्तेपे निराहारः शंभुमुद्दिश्य भक्तितः॥ तपस्तस्मिं गतेरण्यमिक्ष्वाकुं समुपागतः॥ पुनश्च का
रराजान मिक्ष्वाकुमखिलैर्जनैः॥४७॥ इक्ष्वाकुपितपसा राजन भक्त्या परमया पुनः॥ व्रतैर्नानाविधैश्चापि स्तोषय
मास शंकरं॥४८॥ तस्य तुष्टो महादेवस्तपसा भक्तवत्सलः॥ प्रत्यक्षमागमद्राजन कुमारसिद्धसमन्वितः॥४९
सतु दृष्ट्वा महादेवं भक्तिप्रणतकंधरः॥ सच वव्रे वरं राजा न दाव्याहृत पुंस्त्वतां॥५०॥ धर्मे स्थितिं च सततं मतेयोगं ५५
च शंकरं॥ इति तेन व्रतः शंभुर्दत्वा तस्मै यथोप्सितं॥५१॥ यथा मतं जगामाशु सहसिद्धमहोरगैः॥ इति लब्ध्वा
वरं शंभोरिक्ष्वाकुराजा निजं पुरं॥५२॥ जगाम राज्यमाकांक्षन सभूयोपि महीपते॥ तस्मिन्काले तु महति राज्ये

पित्राभिषेचितः॥५३॥ इक्ष्वाकुरजासतसर्वां पृथ्वीं सहसहोदरैः॥ ततस्तेर्वै ग्रहस्तस्यापितु र्राया हमिच्छतः
बभूव समरे कश्चिन्निषेध्वाना भवद्भुवि॥ ततो मनुः कृतान्सर्वान विनियंतुमशक्नुवन॥५५॥ प्रययौ सहितः पु
त्रैर्वसिष्ठस्याश्रमं प्रति॥ संनिवार्य वसिष्ठस्तु तानाज्ञापूर्वं महामुनिः॥५६॥ अनुमेनेखिलं राज्यमिक्ष्वाकोरखि
रं ततः॥ मनुनाच वसिष्ठेन एवं तदनु शांतितः॥५७॥ विग्रहाद्दनुजैः सार्धं न्यवर्तत महामतिः॥ स्त्रीभावपूर्व
जननान्नप्राप्ये इत्सुराधरां॥५८॥ यथार्थदर्शा राज्यार्थे निर्वेदं परमं ययौ॥ प्रतिष्ठानं तु नगरं वसिष्ठप्रेरितो म
नु॥ इलायप्रददौ राजा सचतत्राव सत्कृतः॥ सतु तस्मिन्वसन राजा सर्वशास्त्रार्थतत्त्ववित॥६०॥ प्रमाणं सर्व
लोके षु सोभवद्धर्मनिश्चये॥ व्रतोपवासा नियमैर्यज्ञैश्चैवासदक्षिणैः॥ वर्षाणि कतिचिद्राजन निन्ये मति
मतांवरः॥ साम्राज्यर्धिः समृद्धार्थः सर्वैकः सुरेश्वरः॥६२॥ भूत्वा देवबलात्तस्मात निर्वेदमुपजग्मिवा
न॥ ततः प्रकृत्यंतरजं पुत्रं संस्थाप्य तत्पदे॥६३॥ गंतुं सदारतनयस्तपोवनमियेष सः॥ पुत्रं ततः पुरि पुरूरव
सं तु तस्यां सम्यग् दुहिनु सहितो नृपतेभिषिंच्य॥ संस्थाप्य तं स्वबलवाहन कोशरत्नजातायशेषमथ संप्र
दर्श्य च तस्मै॥६४॥ संप्रस्थितस्तदनु पौरजनाभ्यनुज्ञा लब्ध्वा कथंचिदिव सस्वमतं निवेद्य॥ पौरैः कृतेन
सतदानुगतः स्वदारभृत्यैः समं पुरवरान्निरगान्नरेंद्रः॥६५॥ निर्याय पौरसहितं तनयं वियोगदुःखाभि
तप्तमनुशास्य निवर्तयित्वा॥ पुत्रैरथात्म परिवारजनैश्च शाकं द्रष्टुं जगाम पितरं मनुवंशकेतुः॥ गत्वा
ततः पितुरुदारमतिर्निवासं दृष्ट्वा च तच्चरणयोरभिवंद्य मूर्ध्ना॥ क्षेत्राणि गंतुमथ तेन कृताभ्यनुज्ञः कुक्षादि
वस्व सुत दार युतः प्रतस्थे॥६७॥ इक्ष्वाकुध्वजनभगाद्यमुखास्तु सर्वे सामात्य पौरसहिता भृशदुःखत
प्ताः॥ पार्श्वे प्रयाय परितः प्रणिपत्य मूर्ध्ना तस्याभितो विरचितांजलयोभितस्थुः॥६८॥ ऊचुश्च तेनमितरा
ज्यवरं प्रसाद्य सर्वे वयं तु भवतापरवंत एव॥ यत्तेन पूर्ववदिमामखिलां धरित्रीमार्येण युक्तमनुपालयितुं

च्चिरं य॥४९॥ इत्थंविहृत्यतपसोनिजराज्यलक्ष्मीमारण्यवासगमनायाविवक्षदीनं॥ तेप्रार्थयंतोबहुशोनिवेद्य
एवंतपोवननिवासनिरुत्नकामाः॥५०॥ राजासतांनिजसहोदरसंप्रयुक्तांसंभावनामगणयंस्तृणवत्तदानीम्॥
सम्यग्गृहस्थधर्मस्यज्ञानैर्नैपांस्तान्प्रस्थापयत्पुनगरंप्रतिभूयएव॥५१॥ लब्ध्वाभ्यनुज्ञांप्रतिशास्तुउर्वीप्रतिप्र
यातेषुसहोदरेषु॥ क्षेत्रप्रयागेविभवोपयोच्चततोप्रयागाद्रिसुखामनस्वी॥५२॥ तस्मिन्यथावद्विधिपूजित
देवविप्रपित्रादिकस्तादनुपुत्रकलत्रभृत्यैः॥ क्षेत्राणियान्यखिलपापहराणितानिसर्वाणिसप्रतिजगामनरेंद्र
वर्यः॥५३॥ एवंक्रमेणदुरितक्षयकारिभूरितीर्थादिकाप्लवनपुण्यपुनीतदेहः॥ भूमिंपरीत्यजनकैःपुरुषोत्त
माख्यंक्षेत्रंजगामदयितंमधुकैटभारेः॥ अन्वावगाह्यनयतोनियमोपवासध्यानस्तुतिव्रतसमाधिजपोर
जस्रं॥ कालंमहांतमवसन्नृपतिस्त्वविप्रपूजापरोनुदिवसंपुरुषोत्तमेत्र॥५५॥ भक्त्यासतत्रपुरुषोत्तमपाद
पद्मकिंजल्करंजितमनोमधुपित्वमेयः॥ तस्मान्निरत्यनिखिलघहरान्नरेंद्रः॥ क्षेत्रंजगामनृपपुष्करनाम
धेयं॥५६॥ तस्मिन्स्नात्वासरस्वत्यामुपवासपरायणः॥ भक्त्याचाभ्यर्चयामासयथावत्पितृदेवताः॥
५७॥ तस्मिन्निवसतांचैवमुनीनामाश्रमाणिसः॥ गत्वामुनीन्नमश्चक्रेविधिवद्भक्तिनम्रधीः॥५८॥ वर्षा
णिकतिचित्तस्मिन्अभिमंत्र्यमहामुनीन्॥ कुरुक्षेत्रंप्रतिययौतीर्थयात्रासमुत्सुकः॥ स्नात्वातीर्थेषुसर्वेषु
पूजयित्वाचदेवताः॥ तस्मिंश्चन्यवसद्राजावर्षाणिकतिचित्सुखी॥६०॥ तस्मान्निवर्त्यभूयोपितीर्थया
त्रापरायणः॥ प्रागुक्तंप्रतिययौक्षेत्रंत्रैलोक्यविश्रुतं॥६१॥ तत्रस्नात्वाचगंडक्यांपितृदेवादितर्पणं॥
पूजयामासभक्त्याचभगवान्रूपयार्णव॥६२॥ ततोजगामराजर्षिर्दिशमाग्नेयमाश्रितं॥ सर्वसंसारिख
रिणांश्रेष्ठंपुण्यंक्षेत्रंदिदृक्षया॥ यस्मिन्सन्निहितोनित्यंभक्त्यानुग्रहहृद्धरिः॥ प्रख्यातःसर्वलोकेषुदेव
देवःस्वसंज्ञया॥ आराध्यदेवदेवेशंतपसाचमहत्तरा॥ पारमेष्ठ्यपदंप्रापपूर्वंहृगोपिस्वयंभुवः॥६५॥ त

स्मिन्तीर्थेपुण्यतमेस्नात्वाभ्यर्च्यजनार्दनं॥ दत्त्वादानानिविप्रेभ्योब्रह्मार्पणधियान्नृप॥६६॥ व्रतोपवासनियमै
र्देवपूजापरायणः॥ क्षेत्रेसेवाकृतेतस्मिन्उवासकृतमाश्रयं॥६७॥ ततोचतीर्थसह्याद्रेब्राह्मणैर्बहुभिर्वृतः
कलत्रभृत्यपुत्रार्थैरन्वितःनानेकैरपि॥ पादैतस्यनगेंद्रस्ययोजनद्वितयान्वितं॥ पश्चिमांदिशमुद्दिश्यज
गामसन्नृपोत्तमः॥६९॥ यस्मिन्त्रैलोक्यविख्यातंत्रैवंक्षेत्रमनुत्तमं॥ गोकर्णनामराजेंद्रस्मृतमात्राघनाश
नं॥७०॥ पश्चिमस्योदधेःतीरेसार्धक्रोशांतरेस्थितं॥ मुनिनृसर्वगणोपेतंसर्वदेवनमस्कृतं॥ जगतांचैतरा
गाणांमपिसर्वार्थकामदं॥ सिद्धक्षेत्रमितिप्राहुर्यद्विशेषेणसूरयः॥७२॥ यत्रप्रतिपियासूनामपिपापकृ
तांनृणां॥ पापान्याशुविनश्यंतिसर्वाणिसहपातकैः॥७३॥ क्षेत्रस्यतस्यमाहात्म्यात्प्राप्तानांतत्रवैरिणां॥
दुरितानिविनश्यंतिप्रवातेशुष्कपत्रवत्॥७४॥ सार्धकोटित्रयंयस्मिन्तीर्थानामव्रह्मारिणां॥ ऋष्याश्रमाणि
तावंतिलिंगानिप्रथितानिच॥७५॥ तरुतोपद्मिलारूपीभूत्वायस्मिन्महेश्वरः॥ तमृतेसततंसोमःसहभूत
गणैर्मुदा॥७६॥ ॥इतिश्रीब्रह्मांडपुराणेक्षेत्रखंडेमध्यमभागेद्वात्रिंशोध्यायः ३२ नारदउवाच॥
सतुसंप्राप्यगोकर्णमिलोधर्मभृतांवरः॥ सस्तोतीर्थेषुचतथायथाक्रममतंद्रितः॥ मौनेनैतितासनोभूत्वात
त्रतत्रचदेवताः॥ पूजयामासविधिवत्ब्राह्मणांश्चमहात्मनः॥२॥ तपस्यतोमुनिवरान्क्षेत्रेतस्मिन्क्व
चितक्वचित॥ गत्वाप्रमाणमकरोत्करसिद्धगणैःसह॥३॥ गुहंधर्ममगस्त्यंचवसिष्ठंताक्ष्यमेवच॥ मार्कंडे
यपुलस्त्यौचकमित्रादीस्तथापरान्॥४॥ तान्नमस्कृत्यविधिवत्तैश्चसंभावितःसुखं॥ तीर्थस्नानपरस्त
स्मिन्उवाससमाहरु॥५॥ ततआमंत्र्यतान्सर्वान्ऋष्यांदेवगणैःसह॥ उत्तरांदिशमुद्दिश्यजगामस्व
जनैर्वृतः॥६॥ एवंक्रमेणनिखिलेषुसपुंण्यकीर्तिस्तीर्थेषुसम्यगभिषेकविधिंविधाय॥ गच्छन्नवापभु
विनैमिषनामधेयमारण्यमक्षतमसोमुनिदंदजुष्टं॥७॥ कृत्वासतत्रसकलयारयुतोनिवासतस्मिन्नशेषमुनि
सत्कृतचारुचेष्टः॥ यज्ञानियाजकबहूनथविप्रसाच्चचक्रेधनानिसतुयत्रसतांपुरोगः॥८॥ सत्रंसहाय्यन

अध्यां३७ सहस्रमुदारकीर्तिप्रारब्धमीप्सुरधनोबहुवित्तसाध्यं॥ चिंतामवापकथमद्यमनोरथोयंसंसाध्यतेह्रदिमयेति
चिरंनरेंद्रः॥१९॥ संचिंतयनबहुविधंमनसामनीषी संधानपूर्वकमुपायमपश्यदस्य॥ तोयुद्धविजित्यनृपशो
५८ र्यनिधिर्निधीनामीशानवंप्रचकिरंचकमेपहर्तुं॥३०॥ इत्यासयेनरपतिर्मनसोगतिरुत्पांनिश्चित्यसम्यगभि
पूज्यगुरुंश्चदेवान॥ जैत्रंरथंसमधिरुह्यगृहीतचापोभेजेदिशंनरपतिःसययामुदीचीं॥ प्राप्यसकांतुनगरी
तरसाकुबेरंयुद्धेससैन्यमवलिप्तमहास्त्रजालैः॥ प्रातिनतेनयुधिराजवरस्तथोकंवस्तव्यमेतदपिकांक्षितमि
त्युदारं॥३२॥ आकर्ण्यतस्यवचनंनृपतिस्ततोस्मान्दधौनिधिंनिधिपतेस्ततदेवदोषं॥ शश्वत्सपूर्णकनको
त्तमदिव्यरत्नशांतंमनोरथगतंप्रतिरपकंच॥३३॥ अदेहूपातविभवप्रदयेप्यदत्तंतुभ्यंभवेदितिमयाप्रतिप
न्नभूप॥ स्वावासमापवसतेनवृताभ्यनुत्तःसंप्राप्यचस्वभवनंविधिवन्नरेंद्रः॥३४॥ सत्रंसमारभतचित्रवरैरु
पेक्षःवित्तेनतेनसयथाविहिताधिकार्थः॥ बिस्राणनादखिललोकपरिस्फुतोभूद्वित्तंसभूमिजयदुर्लभसा
र्थसानु॥३५॥ कांक्षाधिकंप्रतिनिरंतरमनुसंचदान्यःसद्युम्नइत्यखिललोकजनोपनीतः॥ सत्रीबभूवचततःपर
मार्थकर्म - - - - ॥३६॥ ततोवर्षसहस्रांतेकालेतीतेमहीपतिः॥ सत्रंसमापयामासयथाविभवविस्तरं॥
तंतत्रनैमिषारण्येवसंतंद्रष्टुमाययौ॥ सनत्कुमारोभगवानकदाचिन्नृपसत्तम॥१८॥ तंदृष्ट्वोत्थाय्यसत्
प्रीतस्तस्मैपीठमनुत्तमं॥ दत्वार्घ्यंपाद्यंविधिवत्पूजयामासभक्तितः॥१९॥ अथासीनंमुनिवरंसंविचा
रितरत्नकथं॥ प्रश्रयावनतोभूमौऽपविष्टोब्रवीन्नृपः॥२०॥ धर्मानशेषान्भगवन्समाख्याहिपृथक्
पृथक्॥ सुप्रसन्नेनमनसाव्रतानिचतपोधन॥२१॥ नारद उ० इतिपृष्टोब्रवीद्राज्ञेतस्मैधर्मानशेषतः॥ व्र
तानिचविशेषेणसयथावन्महामुनिः॥ पौराणिकानिश्रौतानिस्मार्तान्यप्यखिलानिच॥ समस्ततंत्राणि
मुनिःसमाचक्षेयथाक्रमं॥२३॥ श्रुत्वाधर्मानशेषेणवैष्णवानिव्रतानिच॥ सुविस्तरंमुनिवरंभूयएवाभ्य
द्युम्नतं भाषत॥२४ ५८

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारकम्

सद्युम्नउ० श्रुत्वाबहुविधानधर्मानव्रतानिविविधानिच॥ मयाभवत्प्रसादेनचरितानिचधीमतां॥२५॥
श्राद्धकल्पश्चनिखिलोमयाविस्तरतःश्रुतः॥ तोषितश्चापिभगवानमहत्तातपसाहरः॥ दृष्टश्चदेवदेवे
शःशंखचक्रगदाधरः॥ मार्कंडेयसहायेनश्वेतद्वीपेमयाप्रभुः॥२७॥ स्तवैःसंतोषितोभक्त्यावैकुंठोभक्तव
त्सलः॥ अनुशिष्टश्चदेवेनभगवद्धर्मपरानृप॥ ममचप्रतिमांलोकेतंत्रोक्तविधिनाक्रमात॥ पूजयस्वप्रतिष्ठाप्य
भक्त्यापरमयेतिच॥२९॥ तंतथानुष्ठितंचैवयथावद्बहुविस्तरात॥ नहितेप्रत्रकारेणप्रतिष्ठाविधिरस्तिचेत॥
३०॥ तन्मेब्रूहिमहाभागश्रोतुमिच्छाम्यहंविभो॥ सनत्कुमारउ० भक्तिप्रदंमहाराजभद्रदीपाख्यमुत्तमं॥ प्र
दीपभूतस्यहरेःप्रतिष्ठाकर्मविद्यते॥३१॥ प्रल्हादेनकृतंसर्वंदैत्यराजेनधीमता॥ वसुधारोपदेशेनदेवैर
पिसुदुष्करं॥३२॥ आदौवाराहकल्पस्यभूमेःश्करमूर्तिना॥ महामक्षमहाराजविष्णुनासमुदीरितं॥३३॥
प्रल्हादायाब्रवीत्सोपिव्रतंतत्केशवप्रियं॥ अहंतुभवतेसम्यक्कथयामिनिबोधमे॥ सर्वेप्सितव्रतंदिव्यं
सर्वाशुभविनाशकं॥ सर्वैश्वर्यप्रदंचेदपरत्राप्यविशेषतः॥३५॥ आयुरारोग्यसुखदंयशसांभक्तिवर्ध
नं॥ पुरुषार्थप्रदंपुंसांमनोनिर्मलकारणं॥ नराःपापसमाचारायतस्तस्मादिदंपुरा॥ गोपितंदेवदेवेनव्रता
नामुत्तमंव्रतं॥३७॥ तत्पुनःसर्वलोकानांहितार्थंविष्णुरव्ययः॥ पृथिव्यैकथयामासमह्यंचनृपसत्तम॥
३८॥ तच्छ्रुत्वापिव्रतंपुण्यंपापाचारानराधमाः॥ नतत्रावरणंकुर्युरितिप्राग्नप्रकाशितं॥३९॥ अहंतेसंप्रव
क्ष्यामिभक्त्यातच्छ्रोतुमिच्छसि॥ तच्छ्रुत्वामोक्ष्यसेसर्वैःपातकैरयनाप्यते॥४०॥ शृणुसल्लक्षणंपूर्वमाचार्य
यजमानयोः॥ विष्णुभक्तोर्जितक्रोधःशांतःसर्वहितेरतः॥ ज्ञानवानबुधिमानवाग्मीसदाचारपरायणः॥
गुरुर्देवद्विजार्तानांहितकृतप्रियदर्शनः॥४२॥ जितेंद्रियःसत्यवादीतपःस्वाध्यायसंयुतः॥ स्वदारनिर
तःपंचयज्ञानुष्ठाननिर्मलः॥४३॥ अहिंसादिगुणैर्युक्तःशास्त्रविन्मंत्रतंत्रवित॥ आत्मासिद्धोनिरोगश्चअ

व्यंगः सांगवेदवित॥५४॥एवंविधगुणाचारआचार्योऽप्यभिधीयते॥शिष्यश्चेदृग्विधाचारोगुरुशुश्रूषणेर
तः॥ब्राह्मणःक्षत्रियोवैश्यःशूद्रःस्त्रीवाशुभप्रदा॥कुर्युर्व्रतमिदंभक्त्यागुरुणाचार्यमोदिताः॥द्रव्यात्रिय
स्त्रयोधर्मोवर्णस्योक्तोमनीषिभिः॥द्रव्यमापघतेनैवकुर्याज्ज्ञातुनचान्यथा॥५७॥त्रयोवर्णाःप्रकुर्वंतिमंत्र
पूर्वंयथाक्रमं॥गुरूणाकारयेच्छूद्रःशुभाचारस्तथांगना॥५८॥स्त्रीशूद्राणांव्रतमिदंनस्वयंकर्तुमास्तिं॥गुरुः
कुर्यात्तयोरस्यवैदिकत्वेनकर्मणः॥५९॥वर्त्मनातांत्रिकेनैवतयोर्वैकारयेद्गुरुः॥स्वयमेवाथवाकुर्याद्गुरुःस
म्यक्क्रियान्नृप॥५०॥समंत्रेकर्मणिकृतेगुरुणाप्यथवातयोः॥गुरवेदक्षिणाताभ्यांदातव्याद्विगुणाततः॥५१
यथाशास्त्रविधानेनकुर्याद्व्रतमतंद्रितः॥कारयेच्चयथान्यायंशिष्योपिगुरुणात्मवान॥५२॥प्रकुर्यात्कारये
द्वापिभक्त्याशास्त्रविधानतः॥नोन्वेत्पातकिनोस्यातांउभौतौनात्रसंशयः॥शुभानिसर्वकर्माणिदीक्षापूर्वं
प्रकारयेत॥अदीक्षितेनहिकृतंकर्मनिष्फलतांव्रजेत॥५४॥अतोदीक्षांप्रवक्ष्यामिदीपस्थापनकर्मणि॥
शुश्रूषापूर्वकंकर्तायथावद्वरयेद्गुरुं॥५५॥संभृत्यसर्वसंभारानपुरस्कृत्यचदेशिकं॥कर्तुमिच्छनव्रतमिदं
विष्णोर्मंदिरमाश्रयेत॥५६॥विष्णुक्षेत्रेविशेषेणग्रामेवासज्जनाश्रमे॥पुरःप्रदेशेविस्तीर्णपश्चिमद्वारमु
त्तमं॥सगच्छेन्मंदिरंविष्णोःसार्धस्वजनबंधुभिः॥प्रविश्यतत्रदेवेशंपरिक्रम्यप्रणम्यच॥५८॥ब्राह्मणै
रभ्यनुज्ञातःप्रार्थयेच्चगुरुंततः॥भवत्प्रसादतस्त्वेनकर्तुमिच्छनभवांबुधिं॥व्रतेनानेनतुविभोतन्मेसंपा
दयेतिच॥ततस्तथेत्यनुज्ञातस्तेनापिप्रीतिपूर्वकं॥६०॥गुरुणासहितोभूमेःसंप्रकुर्याद्विशोधनं॥विशोध्य
परितोभूमिंकेशांगारास्थिदोषकैः॥६१॥वर्जितंदेशमासाद्यकारयेत्तत्रमंडपं॥चतुरस्रंसमतलंक्षेत्रंसूत्रेण ५८
वेष्टयेत॥तन्मध्येष्टदलंपद्मंलिखित्वाचारुकर्णिकं॥विन्यसेत्कर्णिकामध्येधूपितंरत्नविभूषितं॥पूरये
त्तद्यथान्यायंसुसिद्धैरन्वितोदकैः॥साष्टगंधेनतोयेनगुजंबुद्रुमेनवा॥६४॥अक्षतौषधितोयेनपंचगव्ये
नचाघटं॥संपूर्णंविधिवच्चूतपल्लवालंकृताननं॥६५॥नवैराच्छाद्यवासोभिःपूरयेत्तंयथाविधि॥आवाह्य

कलशेविष्णुंदेमरत्नसमन्वितं॥६६॥अष्टाक्षरविधानेनविधिनाचाहितोगुरुः॥सकलीकृत्यदेवेशमुपचारैःप्रयो
जयेत॥६७॥जपेदष्टाक्षरंमंत्रमष्टोत्तरसहस्रकं॥एकाग्रमतिरव्यग्रःसंस्पृशन्कलशंगुरुः॥६८॥ततश्चस
कलीकृत्यध्यायंस्तोयमयंहरिं॥तेनाभिषेचयेच्छिष्यंमंत्रपूतेनवैगुरुः॥एवंहिदीक्षाकलशैरभिषिंचेतमा
नवः॥यत्तस्याजन्मचरितंपापंसद्योविनश्यति॥७०॥श्रीरायुःसंपदारोग्यबलप्रीतिविवर्धनं॥अभिषे
चनिकंकर्मकर्तव्यंभूतिमिच्छता॥७१॥अपुत्रोलभतेपुत्रानरोगीमुच्येतरोगतः॥यद्यदिच्छनव्रतमिदंप्रकरिष्यति
मानवः॥७२॥तत्तदाप्नोत्ययत्नेननात्रकार्याविचारणा॥७३॥ ॥इतिश्रीब्रह्मांडपुराणेमध्यमभागेत्रयस्त्रिंशो
ध्यायः ३३ ॥ ॥श्री॥सनत्कुमारउ०अथवक्ष्यामिदीपस्यप्रतिष्ठाविधिमुत्तमं॥यत्कृत्वामनुजःसम्यकसर्वान
कामानवाप्नुयात॥१॥अयनस्यतुपूर्वंतुराशावेवैकमाचरेत॥अयनद्वितयेप्यत्रप्रारभेदक्षिणायने॥२॥उक्तेरा
अहनीराजनदेवानामयनद्वयं॥पूर्वसंध्यातुदेवानामुत्तरायणसंक्रमः॥अपराचापरंप्राहुरयनंसूर्ययोरवेः॥वि
ष्णोरग्निःपरासूर्यःसर्वतेजोनिधिर्विभुः॥४॥तारामयस्त्रयीमूर्तिःसर्वतेजोमयोरविः॥प्रणवेवास्थितावेदाः
षडंगपदविक्रमाः॥५॥तत्स्वरूपस्तुभगवानपरब्रह्ममयोहरिः॥तेजसाधिष्ठितस्तस्यभानुर्भुवनभासकः॥
६॥पर्येतिमेरुंदेदीप्यज्योतिश्चक्रसमन्वितः॥निमेषादियुगांतस्यकालस्यभगवान्सदा॥७॥परिमाणमहो
रात्रव्यवस्थाभिकरोतिच॥नक्षत्रयोगधर्माणांनिमेषध्वतिभिश्रुवं॥८॥समेधयतियाल्लोकेपुष्णात्योषधय
ःकृरेः॥उदयास्तमयेकुर्वन्नेवंलोकेपुभास्करः॥सम्यकृतदविभागेदेवानाप्यायविष्यति॥क्रमेणयाति
सहितोराशेराश्रिमनंतरं॥१०॥तस्यप्रक्रमणंप्राहुःसंक्रांत्यंसूर्ययोरवेः॥सयदामकरंयातितदास्यादुत्तरा
यणं॥११॥दक्षिणायनमेतत्तुगतिकर्कटकेरवौ॥यदाद्विलोत्वरंमार्गंप्रयातिसवितापरं॥१२॥दीपप्रति
ष्ठामयनेतस्मिन्पूर्वेत्वकरारभेत॥पूजयेतत्प्रतिष्ठाप्यद्वयोरयनयोरपि॥१३॥दीपान्द्वादशसंस्थाप्यसंपूज्यो

अष्टां ३ पु.

५९

स्थापयेद्धुती॥ दीपप्रतिष्ठादिवसात्प्रागेव दिनसप्तकात्॥१५॥ बीजारोपणकं कर्म प्रकुर्यात्तत्र चोदितं॥ सद्धातु
कंकरीपात्र्यै पूरयित्वा तु पालिकाः॥ बीजानि निर्वपेत्तासु शालिकंग्वादिकानि तु॥ नवैराछाद्य वस्त्रैस्ताः पूजयेद्दि
नसप्तकं॥१६॥ देवादिकानामुद्दिश्य गणानां बलिमादितः॥ संपादितानि तान्यंतितद्रव्येस्तत्र चोदितैः॥१७॥
रक्षां विधाय कृत्वैव प्रकुर्यात्तु स्तवादिकं॥ ततो रत्निमितां स्नात्वा भूमिसंशोध्य यत्नतः॥ प्रासादस्याग्रतस्तस्य प्र
कुर्यान्मंडपं शुभं॥ सप्तहस्तेन कृतं सम्यगथवा पंचहस्तकं॥१९॥ चतुर्द्वारं च तत्स्तंभं संप्रतिद्वारतोरणं॥ दर्भमाला
कृतं तत्तु पताकाध्वजशोभितं॥ वितानवस्त्रसंछन्नं पुष्पमाल्योपशोभितं॥ चतुरस्रं समतलं मध्ये वोन्नतवेदिकं
२१॥ एवं कृत्वा मंडपं तु शुभलक्षणलक्षितं॥ तस्योत्तरे तु कर्तव्यं होमार्थं कुंडमुत्तमं॥२२॥ चतुरस्रं हस्तमात्रं स
गुणत्रयमेखलं॥ तंत्रोक्तेन विधानेन कृत्वैकं कुंडमुत्तमं॥२३॥ ततः समारभेत्कर्म गुरुस्तंत्रविशारदः॥ पंचरा
त्रोक्तविधिना स्नात्वा सम्यग्यथाक्रमं॥२४॥ कृत्वा मंत्रादिकं कर्म नियतो जितेंद्रियः॥ अहतां शुक्लसंवीतः स
पवित्रांगुलीयकः॥ गंधपुष्पादिभिः सम्यक्सोपवीतः स्वलंकृतः॥ ब्राह्मणैरभ्यनुज्ञातः स्वस्तिवाचनपूर्वकं॥
२६॥ प्रविश्य दक्षिणेनाथ तद्वास्तुं प्रपूजयेत॥ वादित्रघोषैर्विविधैः सशंखपणहस्वनैः॥ पुण्याहकार
कैः स्वस्तिमान्धार्यो यागमंडपे॥ वामेनासिंद्गात्राणां भूतसिशुद्धिमिवासनं॥२८॥ कुर्याद्भूमेश्च संशुद्धिं मा
र्जनालेपनादिभिः॥ द्विदलमेकदलं वा तस्मिन्पद्मं समुद्धरेत्॥२९॥ शुक्लसूक्ष्मशालिपिष्टेन शुभं भद्रकल
क्षणं॥ शुचिताद्य पदं पीतकर्णिकं ह्यालुकेश्वरं॥३०॥ सपीठवीथीशोभानां कारयेद्द्वारशोभितं॥ पंचव
र्णोज्ज्वलदलं ज्ञात्वा कल्पयेत्तु पंकजं॥ स्वस्तिकं चोत्तरे तस्य वर्णकैरुज्ज्वलं लिखेत॥ विलिप्य गोमयेर्भूमिः होम
कुंडं च सर्वतः॥३२॥ द्रव्याणि सादयेत्तस्मिन् कुशकौ समिधस्तथा॥ कनिष्ठिकामिता द्वादशपालाशो वि
त्रादंगुला॥३३ पालाशं प्रोक्षणीपात्रमाज्यपात्रं च चारुके॥ बर्हिश्च तु समिधाश्च दर्भशाल्याज्यमेव च॥३४ ५९

संभृत्य सर्वसंभारान् गंधपुष्पाक्षतादिकान्॥ तंत्रोक्तेन विधानेन तस्मिन् होमं समारभेत॥३५ कृत्वा स्वचरणोक्ते
न मार्गेणोल्लेखनादिकं॥ सुखासीनः शुभे पद्मे जितवाग्ज्ञानसो गुरुः॥३६॥ अंगन्यासादिकं कृत्वा कुंडमध्ये य
थाविधि॥ शांतं कुशलं यलंकारं लक्ष्मीमृदुमतीं स्मरेत॥३७॥ अरणेर्वाग्रहाद्वस्य मन्त्रमानीय यत्नतः॥ ध्यात्वा
न्मानं तु ते योन्यां निक्षिपेत्प्रणवेन तु॥३८॥ ध्यात्वा तु रत्नमात्मानं सर्वमंडलमध्यगं॥ प्रणवेन यथायोगं कुर्याद्धृ
यपंकजे॥३९॥ ततो जतो समाचाहगंधपुष्पाक्षतैः सह॥ आधारस्थानयोगेन निर्गतं ब्रह्मरंध्रतः॥ प्रणवेन धि
परंगं तो कुंडमध्ये यथाक्रमं॥ लक्ष्मीनारायणौ तत्र वन्हिमध्ये प्रपूजयेत॥४१॥ तत्सकाशात्ततो लक्ष्म्या विसृज्य
तद्भावसुं॥ संचिंत्य पूजयित्वा च कुर्याद्उद्वाहनं तयोः॥४२॥ प्रणवेन ततो वन्हिं त्रानकैः प्रत्यबोधयेत॥ अग्निप्र
ज्वलितं वन्हेर्याभेन चतुलान्नृप॥ नमस्कृत्यापादितं गंधपुष्पाक्षतादिभिः॥ पर्युक्षणादिकं कर्म पात्रान्येन प्रसा
दनं॥४४॥ कुर्यात्तंत्रोक्तविधिना द्रव्याणां प्रोक्षणं तथा॥ पलाष्टसंमितं सार्धं कुडवं वाथ कालिकं॥४५॥ आ
ज्यपात्रे घृतं गव्यं सुगंधं पूरयेन्नवं॥ यथावदाज्यं संस्कृत्य स्रुक्स्रुवौ चान्वपोत्तम॥ गंधपुष्पाक्षतैर्वन्हिं य
थावत्पूजयेत्पुनः॥ गर्भाधानादि कर्माणि यान्युक्तानि मनीषिभिः॥४७॥ तानि कुर्यात्क्रमादग्नेर्मंत्रतंत्र
विधानतः॥ षोडशाक्षरमंत्रस्य प्रणवादिनमोंतते॥४८॥ बीजैरक्तानि मंत्राणि षोडशापिकर्मसु॥ ग
र्भाधानं समुद्दिश्य दत्वैकां समिधं नृप॥ अष्टाक्षरेण मंत्रेण हुते दशैवघृताहुतिः॥ द्वादशांतेन मंत्रेण कुर्या
त्पूर्णाहुतिं पुनः॥५०॥ दत्वैकां समिधं साष्टप्रतिकर्म घृताहुतेः॥ जुहुयान्नामतः सप्तजिह्वाः संस्मृत्य पा
वकाः॥५१॥ अष्टाक्षसंख्यासंपूर्तौ कुर्यात्पूर्णाहुतिं ततः॥ द्वादशाक्षरमंत्रेण वौषडंतेन पार्थिव॥ तिष्ठन्
पूर्णाहुतिं कुर्याद्दासीनोप्यशेषतः॥ एवं घृताहुतीर्हुत्वा तत्पूर्णाहुतिं क्रमात्॥५३॥ समापयेत्कर्माणि
यथोद्दिष्टक्रमात्मतः॥ अष्टात्मना तु मनुना हुत्वा वा शेषघृताहुतीः॥५५॥ इत्येवं संस्कृते वन्हौ कुर्यात्कर्म यथोदि
तं

गंधपुष्पादिभिः सम्यक् अर्चयित्वा जनार्दनं॥ ५५॥ पद्मासनस्थितं शंखचक्रेण मायुधा क्रमं॥ ध्यात्वा देवं जगद्यो
निं संकल्प पुरुषोत्तमं॥ ५६॥ आसनादिक्रमेणैव सांगावरणमच्युतं॥ देवेशं समनुज्ञाय ततो होमं समारभेत॥
५७॥ द्वादशाक्षरमंत्रेण द्वादशाज्याहुतीर्हुनेत॥ तद्चूर्णैश्च कृतं तेन द्रव्यपञ्च समायुतैः॥ ५८॥ अष्टाक्षरेण च पु
नः कृते दक्षरसंख्यया॥ तदक्षरैः पुनर्व्यस्तैः क्रमैर्मंत्र मध्यगैः॥ ५९॥ स्वाहांतैर्जुहुयाद्राजन् एकैकं चाष्टसंख्यया॥
ततो धिश्रित्य चरुं वितन्मिन्नग्नौ यथाक्रमं॥ ६०॥ चतुर्द्व्ये र्धनैर्देहैर्होमभूयो ष्टसंख्यया॥ अष्टाक्षरेण हुत्वा
तु समिधं च रक्षमेव च॥ ६१॥ आज्यं श्वेवयथाशक्ति द्वादशाक्षरविद्यया॥ हुत्वा कल्पार्पणेनापि हुते छन्नया घृता
हुतिः॥ अंगनाश्च यथाशक्ति हुते दाज्याहुतीः पुनः॥ अष्टाक्षरेण मंत्रेण त्रिश्चतुर्वानिजेच्छया॥ ६३॥ ततो घृतेन जु
हुयान् सम्यक् त्रिष्टकृताहुतीः॥ सतावध्द्भगवते विष्वक्सेन स्विष्टकृद्युतं॥ अग्निं जायासमायतं पश्चात्तु स्विष्टकृन्म
नुः॥ मूलमंत्रेण येनापि प्रायश्चित्तहुतीं ततः॥ ६४॥ दत्वा कल्पार्पणेनापि पुनरष्टाहुतीं नतः॥ ततो महाव्याहृति
भिर्जुहुयात् प्रणवादिकं॥ ६६॥ उत्थायाग्निः परिक्रम्य प्रणम्याग्नि समाहितः॥ ब्राह्मणैश्चरनुज्ञातो वेदघोषेण भू
यसा॥ ६७॥ वादित्रघोषैर्विविधैर्विप्राशीर्वादपूर्वकं॥ नमस्कृत्य च देवेशं दीपस्थापनमाचरेत॥ ६८॥ ॥ इति
श्रीब्रह्मांडपुराणे मध्यमभागे चतुस्त्रिंशोध्यायः ३४॥ छ॥ सनत्कुमार उ॰॥ अथ मंडपमासाद्य गुरुशिष्यस
मन्वितः॥ रवेप्रागुदयाद्देव दीपद्रव्याणि साधयेत॥ १॥ कार्पासकं भवेद्रुत्नं पादहीनं पलोन्मितं॥ कन्यानिर्मित
सूत्रेण कृतं प्रक्षाल्य शोधयेत॥ २॥ कुंकुमं चैव कर्पूरमगरं श्यामकं तथा॥ कुष्टं चेति क्रमात्त त्ररण सूर्ध्वक वाह्य
तं॥ पूर्णयित्वा यथायोग्यं वस्त्रस्यैतानि देशिकः॥ वस्त्रे तस्मिन्विनिक्षिप्य सहृदपरिवर्तयेत॥ ४॥ अंगुष्ठमध्यस ६०
दृशं सरावं द्विगुणावर्तां॥ सम्यातास्वनसिक्तायां पात्रेन्यस्मिन्निधापयेत॥ ५॥ तंतुवर्तिसमादाय सरावं श्वेवम
न्मयं॥ चतुर्दशांगुलोत्सेधं वृत्तं तद्द्विगुणायत॥ ६॥ मंडपस्योत्तरे भागे सर्वमेतन्निधापयेत॥ न्यसेत्तत्र गंधं च नव

गालितं कपिलाघृतं॥ ७॥ यद्यंगेनापरावर्तिं शरावांश्च तथापरान्॥ चन्द्रिकाश्चापरावर्तं दृतिस्तोन्याश्च तु रंगुलाः॥ ८॥
एतत्सर्वं समानीय प्रोक्षयेत्प्रणवेन तु॥ उत्तानीकृत्य पात्राणि सकलानि ततः पुनः॥ ९॥ प्रोक्षयेद्विष्णुगायत्र्या प्रणवा
दिकयान्नृप॥ पयस्य कर्णिकामध्ये मापूर्य त्रीहितं दुलैः॥ १०॥ निधाय कूर्चनम्न ध्ये सरावमपि विन्यसेत॥ सगु
ग्गुलगुरसीर धूपितं प्रणवेन तु॥ ११॥ सरावमपरस्थापि विन्यसेत्स्वस्तिकोपरि॥ उत्तानीकृत्य पात्रांतु प्रोक्षयित्वा
यथाविधि॥ १२॥ सरावाविन्यसेद्वर्तिमानस्ताक्ष्याभिमंत्रितं॥ मंत्रं पठन्निदं विष्णुरिति सप्रणवं गुरुः॥ १३॥ घृतं त्रि
नाल्पलमितं सरावे परिपूरयेत॥ प्रणवेन तथा वर्तिं सौजस्थाने विधायतु॥ १४॥ घृतं श्च सार्धकुडवं तत्रापि परिपूरयेत
॥ घृतप्लुतां ततो वर्तिमन्यां संग्रह्य देशिकः॥ १५॥ विन्यस्य चात्रिमेको ध्ये मौनी नियतमानसः॥ भक्तिनम्रत्यत वार्द्धैः
शंखतूर्यरवैः समं॥ १६॥ ब्राह्मणैरभ्यनुज्ञातो यजमानसमन्वितः॥ वन्हिसमीपं व्रजतः समासाद्य कृतांजलिः॥ १७
प्रणम्य देवदेवेशं शंखचक्रगदाधरं॥ देवदेवजगन्नाथ विश्वकारणकारक॥ १८॥ प्रसीद सर्वभावेन त्वामहं शर
णंगतः॥ समस्तजीवभूतानां शरीरांतरवर्तिने॥ हिरण्यरेतसे तुभ्यं सर्वतेजोनिधे नमः॥ स्थाना दस्माज्जगन्नाथ
कृतेपात्रे तवप्रभो॥ २०॥ स्थितिं संकल्पयिष्यामि तदनुज्ञातुमर्हसि॥ इत्यनुज्ञाप्य योराजन् मंत्रैः सप्रणवैर्हरिं॥ २१
शंखचक्रगदापद्मधारिणं वन्हिरूपिणं॥ ध्यायन्विष्णुं ततो वन्हेर्वर्तिं प्रज्वलयेच्छनैः॥ २२॥ चन्द्रिकायां ततो
दीपं प्रणवेन पुनर्नृप॥ चिंतयन्देवदेवेशं सोहंस्थाने नियोजयेत॥ २३॥ ब्राह्मणैरभ्यनुज्ञातः सशंखपणदस्वनैः॥
जितंत इति मंत्रेण प्रणम्यांजलिमुद्रया॥ २५॥ दीपात्तस्मात्ततो वर्तिमन्यं प्रज्वाल्य देशिकः॥ चन्द्रिकायां विनिक्षिप्य
संगृह्यांजलिना नृप॥ ज्वालयद्द्वर्तिं तु पुंडरीकाक्षविद्यया॥ अग्नये नरयित्युक्त्वा प्रत्यग्ज्योतिस्वरूपिणं॥ २६
दीपप्रभामध्यगतं देवदेवं नमस्मरेत॥ यजमानेन सहितो मौनी प्राग्वदनो गुरुः॥ वर्त्यग्न्यं दीपयेद्विद्वान् मंत्रेणा
नेन मंत्रवित॥ मायामय हृषीकेश मममायागतं तमः॥ २८॥ सर्वलोकप्रदीपात्मं प्रकाशय नमोस्तुते॥ लोकेश्व
र प्रसंतात्मन् लोकानामभयप्रद॥ भवार्णवे निमज्जं तं मामुद्धर नमोस्तुते॥ मंत्रेणानेन देवेशं उपस्थाप्य ततः पुनः॥ २९

प्रणम्याभ्यर्थयेद्देवं मंत्रैरेभिर्विचक्षणैः॥ वैष्णवस्य तु रभिस्थेय साष्टांगं प्रणवद्धरिं॥३०॥ वेक्षरनैकैर्विप्रैश्च
वेदवेदांगपारगैः स्वाध्यायं कारयेद्राजन्नादिनेतस्मिन्ननारतं॥३१॥ततः संपूजयेद्देवं तंत्रोक्तविधिवत्करैः॥अ
ष्टाक्षरविधानेन द्वादशांतेन वा प्रभुं॥ दीपस्य पुरतो मौनी पद्मासने स्थितः॥ प्राणायामं त्रयं कुर्यात्पूरका
दिक्रमेणतु॥३३॥न्यस्तमंत्रात्मदेहात्मा देवदेवं हि पूजयेत्॥आवाहयेति मंत्रेण मुद्रया परमेश्वरं॥३४॥दत्वा
त्वासनं प्रतिष्ठाप्य स्थापयित्वा निरुध्य च॥ततश्च सकलीकृत्य परंज्योतिः स्वरूपिणं॥विधिवन्न्यस्तमंत्रांगं ततो र्घ्यं वि
निवेदयेत्॥आसनावाहने चार्घ्यं पाद्यमाचमनं तथा॥मधुपर्कायनस्नानवस्त्राभरणभूषणैः॥स्रगंधगंधसुम
नोधूपदीपोपहारकैः॥३७॥ पूजयद्देवदेवेशं पुंडरीकाक्षविग्रहं॥ अर्घ्यादिभूषणांतेतु पूजयित्वा जनार्दनं॥
३८॥ अंगानि परितो दिक्षु परिवारांश्च पूजयेत्॥ साक्षिदीपं विना केचित आहुर्विधिमिमं बुधाः॥३९॥ पूजामे
वापरे तत्र साक्षिदीपे विनाजगुः॥ साधारणो विधिर्येष अस्माकमपि संमतः॥४०॥ प्रज्वलं तत्साक्षिदीपं स्वयं नैवो
पशांतये॥ प्रज्वले दथनश्येद्वा न तत्रार्चा प्रशस्यते॥४१॥ परंज्योतिरचिंत्यात्मा सर्वात्मा मे स्वरूपधृक्॥ हरिः
संक्रमितो यस्मात्तेन तत्र प्रपूजयेत्॥४२॥भद्रप्रदीपासनस्थं सर्वाध्यक्षं जनार्दनं॥ पूजयेदुपचारैस्तु यथाविभ
वविस्तरं॥४३॥ सांगं संपूज्य देवेशं परिवार्यन्ना धन्विनां॥ वित्तशाठ्यविनाभक्त्या गीतनृत्यादिसंयुतं॥४४॥प्रे
क्षितोत्क्षिप्तनिर्नर्दैर्दहात् सूर्यवरेण च॥ ततस्थानेषु परितो मंडपस्य यथाक्रमं॥ ४५॥ द्वारस्थातास्योद्दिशाद्यादी
न्पूजयेद्विष्णुपार्श्वगां॥ प्रणम्य देवदेवेशं तन्मंत्रैः प्रार्थयेज्जनः॥पूजाकाले यथाशक्ति भोजयेच्चद्विजान् शुची
न्॥ भक्ष्यैर्भोज्यैश्च विविधैर्मुकुंदः प्रीयतामिति॥४७॥ भुक्तेषु द्विजवर्येषु परितोंकुरपालिकान्॥ ततो दीपा
समीपे तु विप्रः स्वजनसंयुतः॥४८॥ कथाभिर्देवदेवस्य गीतनृत्यादिभिः सह॥ प्रकुर्याज्जागरं तत्र स्वप्रीति
नांतरात्मना॥४९॥ मयनीयनिशांतां तु प्रातरुत्थाय वाग्यतः॥ कुर्याद्दावस्यकं कर्म स्नानपूर्वकमादरात्॥ ५०॥

६३

ततो मंडपमासाद्य गुरुशिष्यसमन्वितः॥प्रदीपभूतं विश्वेशं विष्णुमंत्रेण पूजयेत्॥५१॥ प्रदीपभूतं भुवनैक
भासकं संपूजयेद्विष्णुमनन्यभावतः॥ त्रयीमयं भास्करमेकरूपिणं स्वतेजसाज्ञानविनिर्गतोजसां॥५२॥ प्रा
सादमध्यस्थितमेकरूपिणं ध्यायेद्धलीयान्स्वमनोस्वभावतः॥५३॥ ध्यायन्सर्वगतं विष्णुं तेजोमात्रमनोप
मं॥ गंधपुष्पोपहाराद्यैर्यथाविभवमर्चयेत्॥५५॥ राजन्ध्यायन्हृषीकेशं विकार्य कुसुमांजलिं॥ प्रणम्य देवत
न्मंत्रैः संस्तुवीत यथाविधि॥ प्रसादयं च देवेशं सम्यग्वित्तानुसारतः॥ पूजयित्वा जलाव्यर्थ्य सशंखपणदक्षिणे
॥५६॥ ब्राह्मणैरभ्यनुज्ञातो गुरुशिष्यसमन्वितः॥ निष्कलीकृत्य देवेशमात्मन्यारोपयेन्नृप॥५७॥ गंधपुष्पा
न्वितो भूयः रक्षतो प्रणवेन तु॥आवाह्यविधिवद्देवं मूर्धप्राणाहितेक्षणः॥ ५८॥पुष्पांजलिं क्षिपन्मूर्ध्नि नियं
तेकाग्र्यमानसः॥ तेजस्तद्दीप्यवेचान्हिं पूजयेदर्कमंडले॥५९॥ ततो गृहं समासाद्य विप्रस्वजनबंधुभिः॥ ब्राह्म
णान्भोजयेत्कामं सेक्षवं घृतपायसैः॥६०॥चतुर्विंशान्द्वादशो वा मूर्तिराचाद्य भक्तितः॥ स्वाध्याय कारणो वि
प्राः तांश्चापि प्रतिपूजयेत्॥ सर्वेषां दक्षिणां दद्यात् वित्तशाठ्यविवर्जितः॥क्षमाप्यो द्वाद्य विद्वांस्तान्पूजयित्वा
विसर्जयेत्॥६२॥आचार्यं पूजयेत्सम्यक् देवोयमिति भावयेत्॥ यथावद्दक्षिणां दद्यात् पूजोपकरणान्वितः
६३॥निवेद्य च तथात्मानं तस्मिन्नत्वा क्षमापयेत्॥ एवं संपूजयेद्भक्त्या प्रदीपात्मानमच्युतं॥६४॥सर्वज्ञं सर्वदेवे
ड्यं सर्वलोकैकपरुषं॥ कृतकृत्यः स वै लोके भवेदिह परत्र च॥६५॥ सर्वकर्तुमशक्तः सन्यः करिष्यति वा स्व
त॥ तस्यापि पुण्यमाहात्म्यं कर्तुं शक्तिर्न कस्यचित्॥६६॥आस्तिक्येन च भक्त्या च मीणाति भगवान्हरिः॥ गुरुभ
क्त्या विशेषेण नात्र कार्या विचारणा॥६७॥ ॥ इति श्रीब्रह्मांडपुराणे मध्यमभागे पंचत्रिंशत्तोध्यायः ३५
॥ सनत्कुमार उ० एवं संपूजयेद्देवं परंज्योतिस्वरूपिणं॥ द्वयोरनपयोः सम्यक् भव्य प्रीतिसमन्वितः॥१॥संख्या
प्यपूजयित्वा च दीप द्वादशकं क्रमात्॥पारायणं च कुर्वीत तन्क्रते विधिपूर्वकं॥२॥ वर्षैः षड्भिस्त्रिभिर्वापि तस्मि
न्नेव हितारके॥ समापयेद्व्रतं राजन् सविशेषितविस्तरे॥३॥ प्रारंभे दक्षिणस्याद्रावुत्तरे तु समापयेत्॥ अय

ब्रह्मांडपु॰ नैविधिवद्राजन्भद्रदीपाव्रतंनरः॥४॥दीपप्रभावतोरात्रौविष्णुर्वेणावभासते॥तस्मात्समारभेतस्मिन्व्रतंवैदक्षि
णायने॥५॥ततोदिनमुखंमोक्षंदेवानामुत्तरायणं॥तस्मिन्समापयेत्तेनकालेन्नृपवरंव्रतं॥६॥पारायणंयथाशा
६२ स्त्रंप्रवक्ष्यामिविशेषतः॥मंडलंसंप्रकुर्वीतनवहस्तमितंनृप॥७॥कालोच्छ्रिताभवेन्मध्येसमहस्तानुवेदिका॥च
तुरस्रासमतलादर्पणोदरसंनिभा॥८॥मंडपंचयथान्यायममलंचसमंततः॥अष्टावस्फटिकंस्तंभंचतुष्कोणंत्रिको
णकं॥उपर्यन्योन्यसंभक्तसभासंक्रांतदारुकं॥निश्छिद्रंसंवृतप्रांतर्विविक्तंसमलंकृतं॥१०॥सतोरणंध्वजछत्रपता
काहारशोभितं॥परिवीतंमेखलायांतद्वारपरितोनृप॥अनंतपरिवखेर्दोर्नानावस्त्रैर्वितानतं॥सितवस्त्रावृत
वि स्तंभैश्चकंबिरताजिरं॥१२॥सर्वतःसंप्रकीर्णंचकुसुमैःसुमनोहरैः॥नानावर्णविचित्राभिःपुष्पमालाभिरंतरा॥
१३॥स्थूलमुक्तावलीभिश्चलंबिताभिःसमुज्ज्वलं॥दर्पणैर्मात्रविधैश्चित्रैःसमतादवलंबितैः॥नागरंकदलीस्तंभवी
जपूरकदाडिमैः॥क्रमुकैरपिकर्तारबदलीनालिकेरकैः॥१५॥बालश्चूतपुटाशोकपुष्पपल्लवदामभिः॥सबीजां
कुरपात्रैश्चविन्यस्तैरभितोनृप॥१६॥संशोभमानमधिकंकृत्वामंडपमुत्तमं॥एवंकृत्वामंडपंतुयथोत्साहम
लंकृतं॥१७॥हस्तद्वयमितंतस्मिन्मध्येपद्मंसमुद्धरेत्॥शालाख्यंभद्रकंचापिरजोभिःपंचवर्णकैः॥१८॥त
स्मात्परितोदिक्षुहस्तमात्रमितानुगैः॥लिखेद्वादशपद्मानियथाभागंतुराशिषु॥प्रक्षाद्यकर्णिकामध्यं
पंचानांश्रीहितंदुकैः॥सर्वोपरिन्यसेत्तेषुसरावांश्चपृथक्पृथक्॥२०॥प्रस्थमर्धंतदर्धंवायथालाभंवरंनृप
॥घृतामापूर्यवर्तिश्चतन्मानेनैवविन्यसेत्॥२१॥मध्यमेययथोक्तंतुवर्तिंचमंत्रतंत्रतः॥पूर्वोक्तेनक्रमेणैववि
न्यसेत्कर्णिकोपरि॥२२॥पृथगेकत्रवासम्यक्कृत्वादीमंयथाविधि॥ततःप्रज्वालितेदीपान्पूर्वमंत्रकपूर
कं॥२३॥क्रमेणपूज्यदीपेषुरवेद्वादशमूर्तयः॥मध्यमेयेर्चनीयस्तुपरमात्मासनातनः॥२४॥पूजयेद्धरिपू
र्वस्यांनारायणमनामयं॥शंखचक्रगदापद्महस्तंप्रत्यङ्मुखंस्थितं॥२५॥वामदक्षिणयोस्तस्यपूज्यौकेशवमा
धवौ

पद्मासनसमासीनौसंसाद्यभरणोज्ज्वलौ॥२६॥दक्षिणस्यांदिशितथाविष्णुंसंपूजयेद्बुधः॥दक्षिणेतस्यवामेच
गोविंदमधुसूदनौ॥वामनंपश्चिमस्यांतुतस्यदक्षिणवामयोः॥त्रिविक्रमंश्रीधरंचयथावत्परिपूजयेत्॥२८
वामेदामोदरंतस्यहृषीकेशंतुदक्षिणे॥एवंराशिविभागेन्चमूर्तीरास्याधिपाःक्रमात्॥कुर्यान्नामहृदायुक्तैर्मंत्रैरे
ताःप्रपूजयेत्॥सर्वासांवास्कदेवाद्याःपरिवारानुदाहृताः॥३०॥पूजाभिरुपहाराद्यैःपृथक्त्वाःपरिपूजयेत्॥म
ध्येचपरमात्मानंविश्वरूपधरंहरिं॥३३॥उपाधित्रितयातीतंसम्यग्मायापूजयेत्॥अनाद्यंचयथाशक्ति
सार्वजन्यंप्रकल्पयेत्॥तथाभूतगणानांचबलिंदद्यात्सविस्तरं॥कालत्रयेहरिंभक्त्यामंत्रैस्तैःप्रार्थयेत्ततः॥३३
वेदस्वाध्यायघोषैश्चवादित्राणांचनिःस्वनैः॥गीतनृत्यविनोदैश्चसार्धस्वजनबंधुभिः॥३४॥दिनशेषंन
यित्वातुकृतनित्यक्रियादरः॥सायाह्नेचपुनःसम्यगुपचारान्प्रकल्पयेत्॥३५॥इंदिरस्यदिनेतस्मिन्विभुंका
लत्रयेर्चयेत्॥कुर्याद्भूतगणानांचबलिदानेनतर्पणं॥जागरंचतथाकुर्यात्उपवासपरायणः॥आतुरोभुक्तिका
मोवारात्रौक्षीराशनोभवेत्॥३७॥नानाविधाःकथाशृण्वन्देवदेवस्यसंनिधौ॥गीतनृत्यविनोदेनविप्रस्वज
नबंधुभिः॥अशयन्नेवतांरात्रींयथानीयान्निशांपते॥पृथक्पृथक्पूजयित्वायथाविभवविस्तरं॥३९॥गंध
पुष्पोपहाराद्यैःभक्त्यामूर्तीःक्रमात्पुनः॥संहारमुद्रयैकैकंकेशवादीन्समंत्रकान्॥४०॥निष्कलेरूत्ययत्नेन
सूक्ष्मरूपसमन्वितान्॥ततोमयामज्ञालौकिकगंधपुष्पसमन्वितः॥४१॥रोपयेन्मध्यदीपस्थेपरमात्मनिवेदये
त्॥मंत्रेणानेनसंपूज्यगंधपुष्पादिभिश्चिवरं॥४२॥प्रार्थयित्वाच्वतैर्मंत्रैर्ब्राह्मणानामनुज्ञया॥इयंचतमसेत्य
त्रमंत्रेणानेनमंत्रवित्॥पुष्पांजलिसमारोप्यतेजोमंत्रस्वरूपिणे॥उदुत्यंचित्रमंत्राभ्यांतच्चक्षुरितिवापुनः॥
४५॥सचसर्वात्मकंतेषांप्राप्यपुष्पांजलिंततः॥ऊर्ध्वंक्षिपेच्चयद्भितःपश्यन्नादित्यमंडलं॥देदीप्यमानप्रभांस
र्वान्व्याप्यत्रैलोक्यत्रयंमहः॥त्रयातितेजःसद्भितोयाजयेदर्कतेजसि॥४६॥सस्तेदंप्रज्वलमितंयंरक्षेच्चसमा
पूजोपकरणद्रव्यगुरवेविनिवेदयेत्॥४७॥त्रिःपरिक्रम्यदेवेशंनमस्कृत्यप्रणम्यच॥आचार्यपुरतः स्थितः

ब्रं खांउपु. स्थित्वाब्राह्मणैरपिसंवृतः॥ अनुव्रजमानःसकलैःसार्धंस्वजनबंधुभिः॥ वेदस्वाध्यायघोषैश्चवादित्राणांचनि
स्वनैः॥४९॥ कृतकृत्यसर्वेलोकैःयुक्तःप्रविशेन्निजमंदिरं॥ब्राह्मणान्भोजयेत्पश्चात्गुरूणांसद्भक्तितः॥ य
६३ थाशक्त्यंयथाकामंकामंभोज्यैस्तदिच्छया॥ दक्षिणाश्चयथाशक्तिदद्यात्तेषांयथाविधि॥५१॥ गुरवेदक्षिणां
दद्यात्यथावत्प्रीतिपूर्वकं॥ सर्वस्वंवातदर्धंवातदर्धार्धमथापिवा॥५२॥ सत्कृत्यसम्यग्दातव्यंतदेवाक्षयमि
च्छता॥ जितक्रोधोदरिद्रश्चेद्वित्तशाठ्यंविवर्जितः॥५३॥ गांप्रदद्यात्गुरोर्भक्त्यातन्मात्रविभवोपिसन्॥ स्वर्णशृंगीं
रौप्यखुरींसवत्सांकांस्यदोहनां॥ गृहीत्वाशालिकामारोग्यमव्यंगांचपयस्विनीं॥ हिरण्यंवासृशीछत्रंकुंडलेचांगु
गुलीयकं॥५५॥ दत्वाक्षमापयेद्विद्वान्आचार्यंभक्तिसंयुतः॥ प्रार्थयेदाशिषश्चैवस्ताञ्जलिपुटस्थितः॥
५६॥ प्रयुंजीताशिरंतस्मैगुरुर्विप्रजनैःसह॥ परंज्योतिरचिंत्यात्माविष्णुःसंप्रीयतामिति॥५७॥ लब्धाशी
स्तानतत्वाप्यब्राह्मणानगुरुणासह॥ भुंजीतातुपितोहृष्टःसार्धंस्वजनबंधुभिः॥५८॥ सस्त्वेवंकारयेद्भक्त्या
भद्रद्वीपव्रतंपुनः॥ नतस्यपुण्यमहात्म्यंवक्तुंब्रह्मापिशक्नुयात्॥ आजीवांतंप्रतिज्ञेयंव्रतंसंधारयेदिदं॥ प्रविहृमुर्नात्र
संदेहोमनुष्यवपुषास्थितः॥६०॥ स्थापयेद्दीपमेवंवादरिद्रोयोयथाक्रमं॥ सप्तजन्मादिनैःपापैःप्रमुच्येसोपिमा
नवः॥६१॥ प्रारभ्योद्यापयेद्भक्त्यायस्त्रिवारमिदंव्रतं॥ ऐंद्रंपदमवाप्नोतिसपुमान्नात्रसंशयः ६२॥ बारद्वादशा
कंयमुविधिवत्पालयद्व्रतं॥ ब्रह्मलोकमवाप्नोतिसुरासुरनमस्कृतं॥६३॥ लोकब्राह्मंब्राह्मणस्तुव्रतकर्ताप्रया
स्यति॥ ऐंद्रंपदमवाप्नोति क्षत्रियोव्रतपारगः॥ वैश्योपिमारुतलोकंप्राप्नोतिन्टपसत्तम॥ कौबेरलोकप्राप्नोति
शूद्रोपिव्रतकृच्छुभं॥६४॥ भक्त्यायाकुरुतेनारीभद्रद्वीपव्रतंशुभं॥ पतिलोकेसमासाद्यमोदतेदिविवासवं॥ ६३
६६॥ आजीवंधारयेद्यस्तुव्रतंकेशवतुष्टये॥ मनुष्यकर्मणाबद्धःसविदुर्नात्रसंशयः॥६७॥ द्रव्यारोग्यसुखै
श्वर्यपुत्रपौत्रादिसंपदः॥ वर्ततेनुदिनंतस्यभद्रद्वीपप्रभावतः॥ यान्यानिच्छतिवैकामान्मनसातासमश्नुते॥

व्रतस्यास्यप्रभावेनविष्णुभक्त्याचपूरुषः॥६९॥ वंदनीयःसमस्तानांलोकानांभास्करोयथा॥ सर्वधर्मभृतांमु
ख्योव्रतकर्ताभविष्यति॥ पुंसस्तस्यमहांतोपिमहिमानंमहात्मनः॥ सततंकीर्तयिष्यंतिसर्वलोकेषुदुर्लभं॥
७१॥ प्रार्थयंतिमुदादेवास्तस्यएवफलमुत्तमं॥ प्रणमंतिवतंन्मूर्भ्नासर्वेभागवताजनाः॥ ७२॥ स्वर्गेतस्यातिमहतीं
श्रियंदृष्ट्वासुविस्मिताः॥ अन्योन्यंकथयिष्यंतितत्प्रभावमदर्षयः॥७३॥ रमंतिपितरस्तस्यनाकपृष्ठेयथासुखं॥
आहूतसंप्लवंराजन्नात्रकार्याविचारणा॥७४॥ इहाप्यचिह्नुतरलश्रीरायुर्वित्तरूपवान्॥ धर्मात्माप्रियवाग
वाणीमंत्रैःप्राणिहितेरतः॥७५॥ सर्वभूतप्रियोनित्यंयत्राख्याजितमत्सरः॥ सत्यशौचसदाचाराननिरतोभगव
त्प्रियः॥ मर्त्यलोकेचिरंस्थित्वाजितशत्रुर्जितेंद्रियः॥ अंतकालेसमुत्सृज्यप्राणवस्वंकलेवरं॥७७॥ देदीप्यमानो
वपुषासर्वाभरणभूषितः॥ दिव्यान्लोकानवाप्नोतिसुकर्मसमुपार्जितान्॥७८॥ दिव्यंविमानमारुह्यसुखबहु
निषेवितं॥ स्तूयमानोपिगंधर्वैर्नृत्यद्भिश्चाप्सरोगणैः॥७९॥ अन्वीयमानोमुनिभिःप्रयातित्रिदशालयं॥ उ
पविशंतिचमुदापितरस्तंतदन्वयाः॥८०॥ मारुतश्चापियास्यंतितंसर्वेसहचारिणः॥ तैःसमेत्यामरेंद्रेणपूजि
तस्तत्पुरेखं॥ ८१॥ निवत्स्यतिधर्मात्मायावदिंद्रोभविष्यति॥८१॥ एवंक्रमेणलोकेषुस्थित्वासोत्रतत्रहि
॥ सभविष्यतिसर्वेषुभुंजन्भोगान्मनोरमान्॥८२॥ संपूज्यमानास्त्रिदशैर्देवदेवीभवत्प्रियः॥ ततःश्रीवत्सध
कृश्रीमान्पीतवासाश्चतुर्भुजः॥ शंखचक्रगदाशार्ङ्गीहारकेयूरभूषितः॥ किरीटकुंडलधरःकंठवाद्यैलंकृ
तः॥८४॥ येनतेयंसमारुह्यविष्णुलोकंप्रयास्यति॥ तत्रगत्वासवैविष्णोर्नित्यंपार्श्वचरोभवेत्॥८५॥ एवं
स्थित्वाचिरंतत्रभद्रद्वीपप्रभावतः॥ अवाप्तज्ञानयोगश्चतत्रैवपरिमुच्यते॥ स्वर्गाक्षमतंसंप्राप्यपित
रस्तस्यधीमतः॥ रमंतिसुचिरंस्वर्गेदिव्यभोगसमन्विताः॥८७॥ पश्यंतियेचतद्भक्त्याक्रियमाणंव्रतंनरा
॥ येचवैसाध्यरहितादूरस्थायांप्रकुर्वते॥८८॥ तेषांचसततंयेचतेरमंतेचिरंदिवि॥ तस्यापियेचसं

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारक

तस्यां व्रतं कर्तुमर्हस्यनघ॥८९॥ पुरुषाण्यपि कर्माणो यावद्देवे कार्वीर्यतिः॥ तेस र्वे शुभचाखिलाः सर्वभूतहितेर
ताः॥९०॥ तेजस्विनः क्षमाशीलाः सर्वे सम्यग्गुणान्विताः॥ दीर्घायुषो निरोगाश्च स्वर्गिणो जन्मजन्मनि॥९१॥
भविष्यंति न संदेहः सर्वलोकाभिसंमता॥ परिचर्या व्रतस्यास्य साहाय्यं यः करोति वा॥ ते सर्वे बंधनिर्मुक्ताः
स्वर्गवासं प्रयांति वा॥ यद्राज्ये भ्यर्च्यते विष्णुर्विधिनानेन पार्थिव॥९३॥ राजानश्चापि तत्र त्याः प्राप्स्यंतीद्र
सलोकतां॥ बहुनात्र किमुक्तेन विष्णो स्तुष्टिमभीप्स्यतां॥ प्रकर्तव्यं व्रतमिदं पुरुषेण विजानता॥९४॥ ॥
इति श्रीब्रह्मांडपुराणे मध्यमभागे षट्त्रिंशोध्यायः॥३६॥ ॥ सनत्कुमार उ॰॥ इति संक्षेपतः प्रोक्तं व्र
तानां व्रतमुत्तमं॥ संपदामेकनिलयं सर्वापद्विनिमोचकं॥१॥ दीपस्यास्य प्रतिष्ठायः कालश्चापि यनद्वयं॥
संक्रांतिकाले तत्पूजामानयंति मनीषिणः॥२॥ अनेन विधिना यस्तु संपूजयति केशवं॥ कृतकृत्यः स वै मर्त्य
इहलोके परत्र च॥ तस्माद्व्रतमिदं पुण्यं न देयं यस्य कस्यचित॥ रहस्यं सर्वदेवानां विष्णुनैव प्रकाशितं॥ न
राणां पापशीलानां नास्तिकानां विशेषतः॥ गवानां भक्तिहीनानां प्रदद्यान्न रकं व्रजेत॥५॥ तस्मात्सदाचार
रते विष्णुभक्ताय धीमते॥ सम्यगास्तिक्ययुक्ताय शुश्रूषानिरताय च॥६॥ प्रदातव्यं व्रतमिदं पुरुषेण वि
जानता॥ स्वधर्मोपार्जितैर्वित्तैर्विधिना येन धर्मतः॥७॥ सर्वस्वेनापि यत्नेन पूजयेत्पुरुषोत्तमं॥ अनेन
विधिना येन सम्यक्संपूजितो हरिः॥८॥ दद्यादभीप्सितान्कामान् इह सर्वान्परत्र च॥ इति ते सम्यगाख्या
तं व्रतं सर्वफलप्रदं॥९॥ मया विष्णुमुखोद्गीर्णं यथाश्रुतमशेषतः॥ अनेन विधिना राजन् त्वमाराधय के
शवं॥१०॥ यदि सर्वेप्सितावाप्तिं वांछस्यत्र परत्र च॥ अयं प्रतिष्ठाविधिरच्युतस्य प्रदीपभूतस्य समासत
स्ते॥ यथोदितो यः पुरुषोत्तमेन मं दंतिके भूद्रुदितो धरायाः॥११॥ यो मां पृच्छसि राजवर्य विधिं स नित्या
भिमतो मुरारेः॥ एषोखिलाभीष्टवरप्रदानकल्पद्रुमाभ्या विजनस्यानित्यं॥१२॥ संदृश्यतस्तु गुरुणा प
रमात्मबुध्या व्रतं यथावत्पुरुषोंगना वा॥ करोति यस्तं समुपाश्रयंति श्रेयांसि लोकद्वयसंमितानि॥१३

नारद उ॰ इति श्रुत्वा व्रतमिदं सविधानं स पार्थिवः॥ कृतांजलिपुटो भूत्वा भूयस्तमृषिमब्रवीत॥१४॥ कृ
तोहं कृतकृत्योहं भवता विप्रपुंगव॥ श्रुताः कथा विचित्रार्थाः सरासुरमहीभृतां॥१५॥ श्राद्धकल्पश्च नि
खिलो भवता संप्रदर्शितः॥ व्रतानि च महाभाग कथितानि ममत्वया॥१६॥ भद्रद्वीपप्रतिष्ठाया विधिश्च
समुदाहृतः॥ कृत्यशेषेण भगवन्नपर्णो नाम कृतार्थिता॥१७॥ सुप्रसंनेन मनसा संतर्प्यं देहि मे प्रभो॥ ॥
नारद उ॰ इति श्रुत्वा वचस्तस्य राज्ञः सप्रश्रयं मुनिः॥ प्रत्युवाचाथ संभूयः सुप्रसंनो महीपते॥१९॥ सनत्कुमा
र उ॰ ॥ निःशंकं ब्रूहि राजेंद्र यत्ते मनसि वर्तते॥ शक्यं ते यदि तत्कर्तुं कृतमित्यवगम्यतां॥२०॥ नारद उ॰
ततो राजाब्रवीदेनं मुनिवर्यं व्रतं शुभं॥ कर्तुमिच्छामि तन्मह्यं सद्यायं कर्तुमर्हसि॥२१॥ तथेत्युक्ते तु मुनिना
मुदितात्मा महीपतिः॥ दीक्षां प्रविष्टो विधिवत महर्षेरभ्यनुज्ञया॥२२॥ संभृत्य सर्वसंभारान् यथाशास्त्र
मतंद्रितः॥ काले यथोक्ते विधिवच्च कार स्नपतिर्व्रतं॥२३॥ संपूज्य देवदेवेशं प्रदीपात्मस्वरूपिणं॥ नमस्कृ
त्य गुरुं चैव भक्तिनम्रात्ममानसः॥२४॥ समाप्य विधिवत्पूजां मुद्रास्य परमेश्वरं॥ संतर्प्य ब्राह्मणान् विप्रै
र्दक्षिणाभिर्गुरुं तथा पि॥ दधार च व्रतं सम्यक् यावज्जीवंत प्रतिज्ञया॥ अतोषयच्च देवेशं भक्त्या तद्गतमानसः॥२६
पितॄन्संतर्पयन् श्राद्धैः श्रद्धयां समुदाहृतैः॥ धन्विने रथिनो ज्ञाता तास्मिराज्ञा निवांतरे॥२७॥ पुत्रपौत्र
धनैश्वर्यसुखनीतिसमन्वितः॥ बुभुजे विषयांश्चैव स्वचिरं स्थिरयौवनः॥२८॥ प्रणामं सर्वलोकोसौ
भवद्धर्मं च निश्चये॥ आदित्ये चं व्रतवरमलं राजवर्यो यथा विप्रः संप्रीतात्मा दिवमभियियो पूजितस्तेन भूयः॥
आजीवांत प्रतिसंव्रतमलघुफलं धारयन्नेव देहं त्यक्त्वा राज्यपदमभतया नाद्यंतमानंदसंज्ञं॥३०॥ इति
ते कथितं राजन्नखिलस्य चरितं शुभं॥ भद्रद्वीपव्रतं श्रेयो किमन्यच्छ्रोतुमर्हसि॥३१॥ वसिष्ठ उ॰ इति श्रुत्वा
व्रतवरं राजा मुनिमुखोद्गतं॥ कार्तवीर्यः प्रहृष्टात्मा भूयोपि प्राह नारदं॥३२॥ राजोवाच॥ भगवंस्त्वत्प्रसा
देन मयाश्रुत विशेषतः॥ भद्रद्वीपप्रतिष्ठाया विधानमिदमुत्तमं॥३३॥ कर्तुमिच्छाम्यहं ब्रह्मन् व्रतं ना

रायणप्रियं॥तत्रानुज्ञांप्रयच्छस्वममत्वमुनिपुंगव॥३४॥वसिष्ठउ०ततोनुज्ञांददौतस्मैकार्तवीर्यायनारदः॥कर्तुमिच्छन्व्रतव
रंभक्तिमुद्दिश्यसूरौ॥अनेनविधिनासम्यकृत्वमाराध्यजनार्दनं॥लभस्वाभीप्सितान्कामान्पुरोहितमनोरथितः॥३६॥इत्यु
क्त्वानारदेराजन्अनुज्ञातेमहीभृतां॥संनिवर्त्यानुगच्छंतंतत्रैवांतरधीयत॥३७॥नारदेनगतेराजन्कार्तवीर्योमहीपतिः॥म
हर्षिर्गणनामानंनिजसन्मानभाजनं॥३८॥देवज्ञप्रवरंशांतंसर्वशास्त्रार्थपारगं॥पुरोहितंसमालोक्यइदंवचनमब्रवीत्॥३९
राजोवाच॥विप्रवर्यममाख्यातंनारदेनमहर्षिणा॥भद्रदीपप्रतिष्ठाख्यंव्रतंभुक्तिविमुक्तिदं॥तत्वाप्रवर्ततेवांछातत्कर्तुंसांप्र
तंमम॥आहृत्यसर्वसंभारान्तन्मेसंपादयस्वच॥४१॥शक्यतेचेतदस्माभिःकर्तुंफलदमेववा॥निरूपणीयंभवतायत्कर्तव्य
मनंतरं॥४२॥वसिष्ठउ०इत्याकर्ण्यवचस्तस्यसप्रणम्यमुदीरितं॥पुरोहितोमहाराजंतमाहेतिमहीपतिं॥४३॥शोभनंतेम
तंभूयोयदेवंपरिपृच्छसि॥सम्यग्व्यवसितंश्चैवयतयाभक्तिमुच्यते॥अनेनविधिनासम्यकृतयासंपूजितोहरिः॥इहत्यभि
मतान्कामान्ध्रुवंतेन्यपसत्तम॥४५॥विष्णोःसकाशात्संप्राप्यनारदेनयदीरितं॥तत्तथैवतसंदेहःकर्तव्यश्चतयान्रप॥
४६॥इत्युक्त्वासर्वराजेंद्रतान्हृत्यसमहामतिः॥आचख्यौरविलंकाले यत्तेतेनयथोदितं॥४७॥दीक्षांप्रविश्यन्रपतिःपुरोहि
तमनेनचै॥मद्विष्याचसधर्मात्माचचारविधिवद्व्रतं॥४८॥प्रदीपरूपिणांभक्त्यायथाविभवविस्तरं॥पूजयित्वापुरस्तस्य
गीतन्रत्यसमन्वितं॥४९॥पुरोहितमनुज्ञाप्यप्रतिज्ञामकरोतदा॥निर्विघ्नासंतुमेदेवाःप्रीयतांस्वजनार्दन॥५०॥जीवंनहन
द्दास्यामिव्रतमेतद्दिहस्वयं॥एवंकृत्वाप्रतिज्ञांतुसम्यकपूजांसमाप्यतान्॥तर्पयामासविधिवत्आचार्यंब्राह्मणैःसह॥तराप्रभ
तिराजेंद्रविधिनातेनकेशवं॥५२॥पूजयामासधर्मेणपृथिवींश्चानुशासतिः॥भद्रद्वीपात्मकंदेवंभक्त्याकालमहा
पयन्॥५३॥पूजयन्नेवकतिचिद्वर्षाणिसतुभूपतिः॥द्वयोरनयोःसम्यकसविज्ञेषितविस्तरं॥५४॥व्रतंचभारा
वद्धितोभुवंश्चोध्दतकंटकं॥चकारानुदिनंविष्णोभक्तिश्चानन्यपूर्वकं॥५५॥ब्रह्मण्यश्चवदान्यश्चविशेषेण
भवन्न्रपः॥ततोसौतत्प्रभावेनसर्वलोकेषुविश्रुतः॥५६॥बभूवेकाधिपत्यंचभूमेस्तस्यमहात्मनः॥सर्वलो ६५

कप्रियश्चासीतसराजाधर्मतत्परः॥५७॥एवंप्रवर्तमानस्यकार्तवीर्यस्यधीमतः॥व्यतीयुर्दशवर्षाणिसम्यगपू
जयतेहरिं॥५८॥एतस्मिन्नेवकालेतुसदेहद्यमहीपतिः॥एकदानगरात्तस्मान्निर्ययौसपुरोहितः॥५९॥सस्त्री
कोभ्यायययौस्नातुमयनेनमहानदीं॥सह्लितंनृत्यवादित्रैःसूतमागधवंदिभिः॥६०॥अन्वीयमानोमहता
बलेनचतुरंगिणा॥पूरस्पूर्णेदुशुभ्रेणध्रतमाणेनमूर्ध्निना॥६१॥आतपत्रेणमहताशोभमानामहीपति
॥चारकांताकदंबैश्चसुमहामणिकुंडलैः॥६२॥परिवार्यानुगच्छद्भिःब्राह्मणैश्चसमन्वितः॥गत्वातुकिंचिदध्वा
नंनदीसमुपेत्यच॥तस्मिन्तत्रक्षणंराजास्वभार्याःस्वपुरोहितः॥विलसच्चमरीवालव्यजनानांशतैर्मुहुः॥६४॥
दोधूयमानंपरितोकर्णिकाभिःसविभ्रमं॥वीक्ष्यमाणोनदींरम्यांतरंगशतमालिनीं॥६५॥अगाधतोयांगंभीरां
नानाकर्तसमाकुलां॥मनोज्ञस्वर्गमामोदमत्तभ्रमरमंडितं॥६६॥न्हदैःकमलकल्हारकुमुदोत्पलमंडितैः॥६६॥तत्र
तत्रातिरम्येसमंतात्परिवारितां॥समूलोन्मूलितप्रांतवृक्षौघाकर्षिणाकुलां॥६७॥मनोज्ञस्वर्गमामोदमत्तभ्रम
रमंडितं॥सततंकुंजयद्भागोद्घर्षेणपरमाकृताः॥६८॥कलस्वरेणेवविज्ञायंतेषट्पदसमाह्वयः॥हंससारसदात्यू
हकोककारंडवादिभिः॥६९॥जीवजीवकसंघानांमिथुनैश्चसदामदैः॥पतत्रिभिर्विशाखादैःस्निग्धकंठैर्मनः
नोनुगैः॥वसद्भिरभिशोभंतेयत्रदेशामनोरमाः॥नानामृगगणाकीर्णानानावृक्षलताश्रयाः॥७१॥नाना
पक्षिविहंगाश्चयदीयाःकच्छभूमयः॥सतामेवंविधांयस्यन्नूनर्मदावुबुधेन्रपः॥७२॥कर्षतीवारिपूरेणरो
धसंसकमहार्णवं॥अच्छैस्तरितरंगाघैःसमंतात्केनराशिभिः॥विकासैःस्वर्नदीरम्यांहसतीमिवसर्वतः॥विगा
हमानामभितोमरमत्तेर्धनद्विषैः॥७४॥पुलिंदनिकरैश्चैवसर्वेमानमहर्निशं॥वीक्ष्यमाणोनदींनांतुतरी
तेसन्निरंन्रप॥७५॥तस्मिंतत्संप्रदात्यर्थंकुतूहलितचेतनः॥नानापुष्पसवामोदमिश्रैर्भःकणज्ञातलैः॥
संसेव्यमानस्तद्वातीरेद्रैर्माल्हादकारिभिः॥तरंगहस्तैरात्मानंजलपुष्पकुशादिभिः॥७७॥अर्पयंत्येवन्रपतिः

ब्रह्मांडपु० तथानंतलिप्तपृतिनः॥ ७८॥ ॥ इतिश्रीब्रह्मांडपुराणेमध्यमभागेसप्तत्रिंशोध्यायः ३७॥ ॥ छ॥ वसिष्ठउ० ततोपश्य
न्नदीतीरे मुनिंकश्चनपार्थिवः॥ सद्वितंचारुसर्वांग्यायोषिताभास्करप्रभां॥ १॥ अनिर्देश्यंचपुरुषंचरंतंनर्मदातटे॥ आ
श्लिष्टदेहंप्रिययाखभावर्जितविग्रुता॥ २॥ जाज्वल्यमानमणिरेंद्रदलायताक्षंमंदस्मितद्युतिविकासिमुखेंदुदिग्धं॥
६६ मु ताम्राधरोष्ठपुटभिन्नतनासिकाग्रमध्येंदुसंनिभललाटधृतोर्ध्वपुंड्रं॥ ३॥ नीलोत्पलाश्रितकर्णप्रियायवक्त्रांगराग
रसरक्तकपोलयुक्तं॥ भ्रूक्षेपलक्षितमनोहरदृष्टिपातमात्माप्रियावलयमुद्रितकर्णशोभां॥ ४॥ नीरंध्ररूत्नकुचकुं
कुमरागलक्ष्यसंलक्ष्यमानकठिनोन्नतबाहुमध्यां॥ आपीनवृत्तयुगदीर्घरमांगरागांकशोभिभुजयुग्ममुदारनाभिं
॥ ५॥ संतप्तकांचनलसत्त्रिगुणाभिवीतसन्नेखलागुणविराजिसमनोरतातां॥ वृत्तेभहस्तसदृशोरुयुगांस्फुजानुजं
घापदांबुजयुगप्रपदांगुलीयां॥ ६॥ काषायरागविलसत्परिधानयुक्तमुत्तमकांचनमनोरमचित्रसूत्रं॥ स्वानिम्न
गाकनकपंकजपद्मबालमालाविराजितमनोहररम्यदेहं॥ ७॥ कौपीनलक्षितमनोज्ञयतींद्रवेषछद्मास्यमानवपु
षाध्वतरागवेशं॥ स्मेरप्रसन्नवदनंपरिरक्तनेत्रमाजानुमनोहरबाहुदंडं॥ ८॥ आमोदमत्तमधुकरनिकरोपगीत
मैरेयसंभृतकपालसनाथपाणिं॥ सांद्राबुदालिनिकरप्रतिमानचारुसस्निग्धकांतिसुकुमारशरीरशोभां॥ ९
संप्रेक्ष्यमाणमसकृद्दनेशशांकसाचीकृतेनकुटिलाग्रविलोचनेन॥ सप्रेमइंदुवदनांदयितामनोज्ञांतद्वक्त्रपंकज
मधुककचिन्नभंगं॥ १०॥ संस्रतप्रसूनकबरीभरशोभितांगीलीलालकालिवासिताधीललाटपट्टं॥ सीधुनुरखाम
रूणितोष्ठपुटाउदारसत्कुंडलद्वयविराजितशुभ्रगंडं॥ ११॥ आनंदितान्मदयिताखिलचित्तवृत्तिंभ्रूभंगशोणित
कटाक्षविलोलदृष्टिं॥ मंदस्मितस्फुरतस्फुटितदंतमरीचिजालसद्वदनेंदुबिंबं॥ १२॥ आवर्तनस्फुरितकेशरपत्र
शोभिहेमारविंदयुगलांखितहस्तयुग्मं॥ केखाग्रयांकितलांकलशोभमानानीभ्रष्टतकुचभारविलग्नमध्यां ६६
॥ १३॥ गंभीरनाभिमलघृत्तनितंबबिंबमापीनवृत्तगजहस्तसशोभयोगं॥ संक्षुभ्यमानदृढमांसलजानुजंघामासु

शोभितनखांगुलिपादपद्मं॥ १४॥ कुर्याथिमप्रपदलक्षलताभिरामस्फटिकप्रभृतलरणन्मणिनूपुरांघ्रिं॥ आगूढगु
ल्फयुगलांचितचारुपार्ष्णिमायुरीधानिभमनोहरपत्तजंघा॥ १५॥ निर्मग्नजानुमभिशोणितशुभ्ररंभास्तंभोपमान
स्फुरत्तशुभोरुयुग्मं॥ निर्व्यूढवृत्तरथचक्रसमानपीनश्रोणिप्ररूढमन्वितकनिम्नकांतिं॥ १६॥ संशोभमानकृश
मध्यमितांगमध्यामावर्तशोभितमनोज्ञगभीरनाभिं॥ आलोलपिप्पलदलोल्लसितोदरांतरेखात्रयांकितमनोह
ररोमराजिं॥ १७॥ अनालवंचुकनिरंतरपीनवृत्तचारुस्तनद्वितरतोरसिजाभिरामां॥ शोणायमाननखकोमलदीर्घ
पर्वांगुलीमविलसत्करपल्लवीकं॥ १८॥ अभ्युल्लसन्मुकुरपंकजसंगृहीतलीलारविंदमकरंदरनालिवृंदं॥ कंपायमा
नसुमनोहरकंदतालामापांडुयुगमंडलमंडितास्यं॥ १९॥ आलोलकुंडलयुगांगितकर्णयुग्मासंशोभमानद्युतितामर
सावतंसां॥ उन्निद्रमानससरोजसहस्रकांतिचारुप्रसन्नविलसद्वदनारविंदां॥ २०॥ आरक्तविद्रुमलतासकलाभिरामशो
णाधरोष्ठरुचिरंक्षितकर्णिकारं॥ मंदस्मितस्फुरितचारुचिरंतराग्रदंतप्रभाविजितचंद्रमरीचिपूरां॥ २१॥ निश्वास
वातमनुनिर्यदद्भ्रवक्त्रगंधाभिसंभ्रमितचंचलचंचरीकां॥ पर्यंतनीलतसितमंचरनीलतारसंसांद्रयक्ष्मचटुला
पततोलनेत्रां॥ २२॥ संप्रेमनिर्भरमनोहरशुभ्रगर्भनिस्पंदमंदवलितासममुग्धदृष्टिं॥ लीलावलोकुलसितंचिल
संतमालनीलोत्पलछविमनोज्ञकटाक्षमालां॥ २३॥ कंदर्पचापविलसच्चदुलनीलपत्रलीलतायुगविराजिमुखेंदु
बिंबं॥ वक्त्रारविंदमधुदोहलसंरताल्याजोल्लसत्समलवल्गुकुंचितकुंतलालिं॥ २४॥ अर्धेंदुवल्गुलसितालिकमध्य
शोभिलाक्षारसार्द्रतिलकाविलसल्ललाटां॥ अनीलनीलतरकोमलइंद्रदीर्घसस्निग्धकुंचितमनोहरकेशपाशं॥
२५॥ वक्त्रक्रियावर्जितशुभ्रशशांकबिंबामारक्तपत्रचरणाविलसत्कपोलं॥ रत्नांशुभिन्नकनकोत्तमकुंडभूषामालो
लद्धारनिकरालसितातरार्धि॥ २६॥ केयूरशोभितमनोहरबाहुनालामारक्तविद्रुमलसत्करकंकणाढ्यां॥ काश्मी
रजद्रवविराजदुरोद्वयुग्ममध्योल्लसद्बहुविधाभरणालसंगी॥ २७॥ कर्पूरसांद्रदार्द्रचंदनमिश्रचारुकस्तूरिकासुर
भिपंकविलिप्तगात्रीं॥ उद्भिन्नहेमकमलोदरचारुवर्णीयालोलकोमलमनोहरणात्रयष्टिं॥ २८॥ रक्तांतपीतसितदीर्घ

मदार्यशशभ्रव्याकोलनिर्मलशशांशकृशोभिमध्यां॥ रक्तांशुरंजितमनोरमशातकुंभकांचीकलापकरकोमलचारुम
ध्यां॥२९॥ हेमाद्रिरूपमणिनूपुरसिंजितांघ्रिवसुकुमारारविंदगतिनिर्जितराजहंसी॥ शोणायमानचरणद्वयसन्नः
खालिछायानिबेशपरिरक्षिततारकोघ्यां॥३०॥ त्रैलोक्यमोहनमनोहरहावभावाश्लिंद्ररद्रदृशिविस्मयनीयरूपा
॥ गंधर्वयक्षसुरसिक्षमथोद्यसीनंतिनीलकरदुर्लभसौकुमार्यां॥ योगींद्रलक्षणविलक्षितमंबुजाक्षंस्वेछामनो
हरतरंवपुरादधानां॥ तेश्चाप्यमंस्तनृपतिर्दसितानुकूलंलक्ष्मीमवापतनुसंग्रहणाभिरामं॥३२॥ अंतःप्रहृष्टप
रितोषविकासिताक्षलोमस्फुटंसपरिवारजनैरुपेतः॥ पश्यंदिशामधिपतिःसुचिरंतदंगानिःस्पृहमीक्षणयुगं
नपुनर्विषेहे॥३३॥ अन्योन्यदेहपरिरंभणशक्तबाहुयुग्मोल्लसत्पुलकितांगरुहौगताभ्यां॥ तौनर्मदातटतलंपरि
शोभयंतौदृष्ट्वासदर्पमथविस्मयमापभूयः॥३४॥ तौदृष्ट्वाविक्रसद्वक्त्रःसंप्रहृष्टात्ममानसः॥ तस्थौतत्रचिरंरा
जापुरोहितसमन्वितः॥३५॥

६७

॰ येथून ५० अध्यायपावेतोंग्रंथ लटीत- प्रतनास्ती॰

त्मायमायया॥ चैतन्यमात्मनासर्वक्षेत्रेतोहृषवस्तुतः॥ देदीप्यमानसततंनिवातस्थप्रदीपवत॥ आत्मानंतंपरंवुध्वा
इतिचारतयानिति॥ भूयोदेवामृततायसोगीसंशुद्धकिल्बिषः॥ ॥७॥ इतिश्रीब्रह्मांडपुराणेमध्यमखंडेपंचाशत्त
मोध्यायः ५० ॥ ॥ राजोवाच॥ यथातेश्रवणंवाच्यंसंभूतंपरमात्मनः॥ एकःसकथमात्माचप्रतिदेहमवस्थितः
॥१॥ अनादिमजमात्मानमद्वितीयंपरात्परं॥ एकमेवत्वमेवास्यसर्वभूतेष्ववस्थितं॥२॥ सदेवनरतिर्यक्षु आत्माविवि
धयोनिषु॥ अकर्ताचेत्कथंब्रह्मन्भवतीहशरीरभाक्॥३॥ अस्मिन्नर्थेविमुह्यामिभगवनात्मविदांवर। मनोमोहा
पनोदार्थंतन्मेब्रूहिसविस्तरं॥४॥ असितउ० य आत्मासर्वभूतानांविराट्सर्वार्थविद्विभुः॥ आकाशादिमहापंच
भूतयोनिरयोनियः॥५॥ विश्वात्मासोवरूपेणयन्मूर्तिर्जगत्पतिः॥ वीरुधौषधिनिष्पत्यान्नयत्वमुपगछति॥६॥
समेत्रदेवतोद्देशमग्नौयदपवर्जितं॥ ससर्वैर्यज्ञभिःसर्वाःसंप्रीणयतिदेवताः॥७॥ ततोद्रविरसःसोथपूलेनामी
श्रितेनतु॥ आगत्यरूपादित्येनसंयोज्यतियज्ञिनं॥८॥ भूत्वायःसाहचर्येणद्रविर्धूमाभिगंधिना॥ ऊर्ध्वउन्नीय
तेराजन्वायुनासोममंडलं॥९॥ तंचसंप्रीयतस्तस्यरश्मिभिःसूर्यमंडलं॥ तद्रात्मानीयतेसोपितद्रसेनाभितुष्य
ति॥१०॥ सतद्रसमास्वादउद्वेगोभिरधोमुखैः॥ आदत्तेतरणतोयाब्धिनदीतोयगर्तरसं॥११॥ भूयस्तुरश्मिभिस्तो
यंभूमौवर्षतिभास्करः॥ विरुधौषधिनिष्पत्यायःपुष्णात्यखिलंजगत॥१२॥ प्रीणयन्सर्वभूतानामन्नानान्नात्म
नां॥ प्राणिनःप्रीणनात्पुष्टिःपुष्टयश्चापसंस्थिताः॥१३॥ एषोराजंततोयज्ञोयज्ञाद्वृष्टिरनुक्रमात॥ प्रवर्ततेचक्र
वत्यासभवेदंततोद्भवः॥१४॥ अनेनैवप्रकारेणसकेशात्परमात्मनः॥ जगदुत्पत्तिमखिलंतस्मिन्नेवेतिचाप्ययं॥
प्राप्नोतियावदस्तंनाभिजानातिसस्वयं॥१५॥ राजोवाच॥ एवंभूतस्यभगवन्निशानिप्रोपपत्तयः॥ श्रा - - - -

॰ येथून ग्रंथ ६१ अध्यायपावेतोंत्रयीत- प्रतनास्ती॰

तस्य प्रविश्य सदनं वरामोमहामनाः॥ विचचार शनैराजन्न पश्यत महीरुहान्॥ स तत्र विवरं दिक्षु हरिणीभिः समंततः॥ वीक्ष्यमा
णोमुहुर्दंभैसाशंकमुखहृन्मुखहृष्टिभिः॥ स तत्र कुसुमामोदगंधिभिर्वनवायुभिः॥ वीक्ष्यमाणोजहर्षास्य वीक्ष्योदारवनश्रियं॥ वि
विधाश्चरुलारम्यासं परिक्रम्य भार्गव॥ हृष्टोभूयश्च विविधामश्चन्नेवमतर्कयत्॥ अहोयं सर्वशैलानामाधिपत्येभिषेचि
तः॥ ब्रह्मणायत्तभवैवस्थाने संप्रतिपादितः॥ अस्य शैलाधिराजस्य व्यक्तैर्नैवाभिलक्ष्यते॥ रवैः कीचकवेणूनां मधुरस्वतक
ननः॥ नितंबस्थलसंशक्ततुषारनिकरैरयं॥ विभातीवानितः स्वल्पपरितोधवलांतकः॥ निबिडक्लिष्टनीहारनिकरेणतथोप
रि॥ नामाविरलेतुरीसंगायतां तरुवलक्ष्यते॥ चंदनागरुकर्पूरकस्तूरीकुंकुमादिभिः॥ अर्कवृतां सुसत्यक्तदृश्यते सविलास
वत्॥ मृगेंद्रभिन्नेवेभेंद्रप्रस्रुप्रस्रुपरिस्युते॥ स्थूलमुक्तोत्करैरेष विभाति परितोगिरिः॥ नानावृक्षलतावल्लीपुष्पालंकृतमू
र्धजः॥ नीरंधान्वितमेघौघवितानसमलंकृतः॥ नानाधातुविचित्रांगसर्वरत्नविभूषितः॥ कैलासव्याजविलसद्धौतछ
त्रविराजितः॥ गजास्यमुखयूपैश्च समंतात्परिवारितः॥ राजद्वीपे महाशैलकंदरं मंदिरं स्वयं॥ विवेशगह्वरस्थाने म
ध्येसिंहासनाश्रयः॥ समंतात्प्रांतसंसक्ततनुवेत्रलताशनैः॥ पृथग्जनैरथासन्नोमहाराजाधिराजवत्॥ गोधूमसमानो
स्पवत्स्वमरीचारुचामरैः॥ मयूरैरापतत्यद्भिर्गायद्भिश्चैव किंनरैः॥ सत्वजातैरनेकैश्च सेव्यमानो विराजते॥ व्यक्तमेष
चलेंद्राणामधिराज्यपरिरक्षितः॥ भुनक्त्याकम्प्य वसुधां समग्रश्रियमेधसा॥ एवं संचिंतयामानः हिमाद्रिवनगह्वरे॥
विचचार विरामोयमुरापरमयापुनः॥ आससादततस्तस्मिन्विपिने भृगुपुंगवः॥ सरोवरं महाराजविपुलं विमलोद
कं॥ कुमुमोत्पलकल्हारनिकरैरुपशोभितं॥ पंकजैरुत्पलैश्चैव रक्तपीतसितासितैः॥ अन्यैश्च जलजैः पुष्पैः सर्वतः
समलंकृतं॥ हंससारससाह्वयरुकारंडवयुतैरपि॥ जीवंजीवकचक्राह्वकुररभ्रमरोत्करैः॥ संघष्टरागं परितः सेवि
तं बहुभिः स्वरैः॥ शफरीमत्स्यसंघैश्च क्वचिद्दृश्ततरततः॥ अनर्जानितकल्लोलैर्नृत्यमानमिवाभितः॥ आससा
द भृगुश्रेष्ठ तत्सरोवरमुत्तमं॥ नानापतत्रिविरुतैर्मधुरावृतादिङ्मुखं॥ स तस्य तीरे विपुलं कृत्वाश्रमपदं शुभं॥ रामो

रामोमनिमतं स्थित्वा तपश्चर्तुं मनोदधे॥ शाकमूलफलाहारनियमो नियतेंद्रियः॥ तपश्चचार तद्देशोविनिवेश्यात्ममानसं॥ यमैः संनिय
मैश्चैवशब्ददेहः समाहितः॥ वज्रासनस्थ्वबनंप्राणायामेन देहगं॥ स्थितस्तत्रासने मौनी स्थिरचित्तो महामतिः॥ वर्गांश्च कारश्चा
क्षार्णा प्रत्याहारपरायणः॥ धारणाभिः स्थिरीचक्रे मनश्चं चलमात्मवान्॥ ध्यानेन देवदेवेशं ददर्श परमेश्वरं॥ स्वछां
तः करणोपेतः सर्वबाधाविवर्जितः॥ चिंतयामास देवेशं ध्यानं दृष्वा जगद्गुरुं॥ ध्येये च स्थितचित्तात्मानिश्चलेंद्रिय
देहवान्॥ अकालावधिसोन्निछन्निवातस्थप्रदीपवत्॥ तपंचदेवदेवेशं ध्यायतं च मनीषया॥ आराधयदमेयाः
त्मासर्वभावसमन्वितः॥ ॥ इति श्रीब्रह्मांडपुराणे मध्यमखंडे एकषष्ठितमोध्यायः॥ ६१॥ वसिष्ठउ० अपश्यंत
तदारामेकाश्रमनसंवने॥ प्रहृष्टैकांतनितरांनियतं संश्रितव्रतं॥ १॥ श्रुत्वात ऋषयः सर्वे तपोनिर्धूतकल्मषाः॥
तानकर्मवयोवृद्धाम शांताः संश्रितव्रताः॥ २॥ दिदृक्षवः समाजग्मुः कुतूहलसमन्विताः॥ ख्यापयंतः स्ततः श्रेष्ठंतस्यरा
जन्महात्मनः॥ ३॥ भृगवत्रिक्रतुजाबालावामदेवमृकंडकः॥ संभावयंतस्तेरामं मुनयोवृद्धसंमता॥ ४॥ आजग्मुराश्रमं तस्य राम
स्यच्यवनतलम॥ ... दुर्वासादेवमहालक्ष्मिपुण्यक्षेत्रनिवासिनः॥ गराय सर्वलोकेषुतपोयत्तत्क्रियादिषु॥ प्रज्ञासतत्स्य भगवान्भक्ति
मात्मनिशंवरः॥ ६॥ मृगव्याधवपुर्भूत्वा यथोराजंस्तदंतिकं॥ भिन्नांजनचयप्रख्यो रक्तांतायतलोचनः॥ ७॥ शरचाप
धरः प्रांशुः कृष्ण संहननोयुवा॥ रक्तंगदनुबाहुदंष्ट्राः पिंगलश्मश्रुमूर्धजः॥ ८॥ मांसविरवबसागंधी सर्वप्राणविहिं
सकः॥ सकंटकलतास्पर्शयुक्तक्वणितविग्रहः॥ ९॥ सारकूसं च कर्षमाणाश्च मांसरवंडमनेकधा॥ मांसभारदुया
लंबविलक्नायतकंधरः॥ आरूढस्तरसावृक्षानूरुवेगेन सर्वतः॥ अभ्याचर्तततं देशं पादचारीवपर्वत॥ ११॥
आसाद्यसरसस्तस्यतीरं कुसुमितद्रुमं॥ न्यदधान्मांसभारंश्च समूलेकस्याचित्तरोः॥ १२॥ निषसादक्षणंतत्र तरु
छायामुपाश्रितः॥ श्रमार्त इव राजेंद्र पश्यन्नारादितस्ततः॥ मध्यंदिनगते सूर्ये स्तात्वोपस्थाय भास्करं॥ तिष्ठंतं स
रसस्तीरे सोपश्यद्भृगुदेनंन॥ १४॥ ततः स शीघ्रमुत्थाय समीपमुपसृत्य सः॥ रामं यत्नेषु चापाभ्यां पाणिभ्यां विहि
तांजलिः॥ सलक्षंभोधसन्नादगंभीरेण जगाद भृत॥ जगामभृगुशार्दूल गुहांतरवितर्पिणा॥ १६॥ प्रवर्यः

ब्र.खांड पु. व्याघ्रोद्वंसस्य च साम्यस्मिन्महावने॥ ईशोद्वस्य देवेशस्य देहप्राणितवीरुधः॥१७॥ चरामिसर्व - - - - - - -
अमितउ० यदा शब्दमयस्याशोनिष्पत्तिर्भवितायदा॥ ब्रह्मणोभून्नदाराजन पुमानिकाश्रमोमुखात॥१९॥ ततो
२ स्य प्रथमं वल्कं च भूयन्नृप सत्तम॥ वाचा सह ततो वह्निर्मुखाद्धि सोविनिर्गतः॥२०॥ घ्राणेंद्रियश्च तस्याभूत्सर्गो विज्ञा
नशासनं॥ तस्मात्प्राणोभवद्राजन्प्राणाद्वायुरजायत॥२१॥ सयदा रूपविज्ञाननिष्पत्त्यर्थं प्रचक्रमे॥ तदाक्षिणी
चाभवतां रूपविज्ञान साधने॥२२॥ तस्माद्दिक्कुर्वतः सूर्यः सर्वलोकप्रभावतः॥ यदा च शब्दविज्ञप्तिः साधनं च च क
मे पुमान॥२३॥ धातवोस्य भवन्त सप्त रसासृग्मांसपूर्वकाः॥ तेभ्याप भूवंश्छंदांसि गायत्र्यादीनि सप्त वै॥ २४॥
ततः पुंसोभवच्छिंनं पर्जन्योस्मागद्धि निर्गतः॥ उपस्थेंद्रयमा - - - - - -

अभवत्स्व दयश्चास्य हृदयादुत्थितं मनः॥ मनसश्चंद्रमाजातः प्रीतांशुरमृतात्मकः॥२९॥ ततो बुद्धिरभूद्दस्ययस्मा
ज्जातो गिरांपतिः॥ अहंकारोभवच्चास्य - - - - - - - - - - ॥३०॥ ततोस्य चित्तमभवाच्चित्ताद्वेदमभून्नृप॥
ततोर्बिमुक्तः संमुक्तः निश्चेष्टश्च चकेवलं॥३३॥ लोकात्मामूर्तिसोपासीत्सर्गोस्यादावनाश्रयः॥ समुत्थितास्तुदेहेभ्यो दे
वा क्षेत्रमृतेपुनः॥३२॥ तत्र चेष्टयितुं शेकुश्चेष्टितुं स्वयमेव वा॥ ततस्तमुत्थापयितुं विराजं देवतास्तताः॥ ३३॥ स्वखस्था
नानि तद्देहे पुनराविविशुर्नृप॥ वह्निस्तस्य मुखं राजन्विवेशाय च सासद॥३४॥ गायत्र्यादीनि तत्त्वं च छंदांसि समुपावि
शन्॥ रसास्य रसभूज्जिह्वा नासिका मारुतामपि॥ घ्राणमाविशतामस्य ओषधीभिः सहाश्विनौ॥ मोदन्नमांसके
राजनं रूपाणां तेजसां तथा॥ ३६॥ स्थानं चक्षुः ईशोस्तस्य दिवः सूर्यस्य चाक्षिणी॥ कर्णौ च तस्य तीर्थादिनिग्भिः स
ह समाविशत॥३७॥ आकाशशब्दयोश्चास्य श्रोत्रमासीत्समाश्रयं॥ सोभाग्यसारवस्तूनि तद्गात्रं समुपाविशत॥
३८॥ आयुगासहितो वायुस्तस्य स्पर्शगुणस्त्वचं॥ रोमाणि तस्योषधयः सर्वा एव समाविशत॥३९॥ केशश्मश्रु

नखान्यायुः शिलालोहाश्च विद्युतः॥ बाहू वो लोकपालानां करोत तत्कर्म कुर्वतां॥ ५०॥ क्षेमश्च व्याहृतीनां च विक्रमं स्तनमुच्य
ते॥ तस्यान्तःक्षारणं क्षेत्रं पराणां काम्यकर्मणां॥५१॥ अपांबीजस्य सर्गस्य पर्जन्यस्य च पार्थिव॥ स्थानं शिश्नश्च नुपस्थ
प्रजापत्यादनिर्वृतिः॥ पायुः परंछद्मसर्गस्य तथैव यममित्रयोः॥ हिंसामृत्युर्गुदं तस्य निर्ऋतिर्निरयं तथा॥४३॥ दृष्टपरा
भवो धर्मतमोभ्यां सहितो विशत॥ नद्यश्च तत्र नद्यादीर्गिरयश्चास्थिसंहतिः॥४४॥ स रूपितो रक्तवादुदरं सरंसमुपा
विशत्॥ मनसा सहितो वेधा मन्युनाशंकरेणच॥४५॥ पुंसो विश्वेशहृदयं भग सामर्थ्यसंयुतः॥ वितानं परमं तत्त्वे
न्यविवेशन दात्मनि॥ अन्ये च निखिलादेवाश्च वलायं ततत्तनो॥ समस्तजीवसंघातं जगत्स्थाणु चरात्मकं॥४७॥ भूतं
भव्यं भवच्चैव स एष पुरुषः स्मृतः॥ यत्तत्त्वं तद्धि हि लोकेविराजं सततं नृप॥४८॥ इदमात्यनिखिलं सोस्मति बहुरांग
लं॥ स यत्नमंत्रं तत्रात्मामर्त्यमन्नं य दत्यगात॥४९॥ ईशानः सर्वलोकानाममृतस्याभयस्य च॥ इदृग्विधोस्य माहि
मा पुरुषस्य दुरत्ययः॥ पादोस्य सर्वाभूतानि ज्यायानि दृयतोन्नृप॥ अमृतं क्षेममभयं मूर्ध्नितस्यास्थितं किल॥ ५१॥
असंस्तस्य नयः पादा द्विविये यत्र चेतसां॥ समाश्रयामहाराज योनिनां क्लेशसंक्षये॥ अपरांतस्त्रिलोकस्य पादो
य इदं कर्मभिः॥ इदमानोखिलांप्रासि करोत्यमृतसंप्लुतं॥५२॥ साशनानशने चोभे स्रतीविषग्विचक्रमे॥ विद्या
विद्येयतः शश्वत पुरुषः स्तूभयाश्रयः॥५३॥ अंडस्तस्माद्विराट् जज्ञे भूतेंद्रियगुणाश्रयः॥ अत्यक्रमत्स तद्विश्वं
मयारोधविभानलं॥५४॥ नोपपद्यं तव स्तूनि पुरुषा वयवाहते॥ धर्मार्थस्थितये पूर्वं याव ज्जीवं नरेश्वर॥ ५५॥
यत्तमूर्तिारतिमोत्ता स्ततो सौविश्वरूपधृक॥ विराजन्पुरुषो राजन उभयोर्योधिलक्षणः॥५६॥ स एव गीयते ब्र
ह्मन गात्रेभ्यो ह्यस्य जज्ञिरे॥ मंत्राय तत्राश्च पेशवः सवनस्य तयः कुशाः॥५७॥ भक्त्याविरक्तावज्ञानेन मुमुक्षुस्तेन
वा पुमान॥ सम्यग्रूप देशाश्चर्यं विदित्वा विमुच्यते॥ रूपं तद्विश्वरूपाख्यमात्मा चैतस्य विग्रहं॥ विस्मा ह्यबुद्धस
त्यादिस्वभावमनंतात्मकं॥५९॥ स एव सर्वसर्वात्मा सर्वभूतहृदिस्थितः॥ तस्माज्जगदिदं सर्वं संभूतं सचराचरं॥
यश्चेष्टयति लोके पुनर्त्तुर्विंशतिकं गणं॥ वितीयमात्मप्रकृतिराक्षसः प्रकृतः परः॥६३॥ हृदयग्रंथयः सम्यग्वि

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी इत्यस्य स्मारकम्

अलां३पु॰ धनेसर्वसंश्रयः॥ छिद्यंतेचास्यकर्माणि क्षीयंतेसंविज्ञायत॥६२॥ तमेकमक्षरंशांतंपरमानंदमव्ययं॥ विश्वाख्यमग्र
तंसाक्षाद्विज्ञायपरिमुच्यते॥ यावद्दिंशतिकेदेहेकर्मबंधनिर्मंत्रितः॥ संसारेसंसरत्यात्मानानासत्वामिषासनः॥
३ ६४॥ समश्चसर्वभूतेषुशत्रुमित्रादयोपिमे॥ अभक्षागम्यपेयादिद्वंद्वंखलुषुकुत्रचित॥६५॥ कृत्याकृत्यविधौचैव
नविद्रोषितधीरहं॥ प्रसह्यात्माभिगमर्ननिवासमपिकस्यचित॥ शक्रस्यापिबलान्नाहंमनुमंशोनसंशयः॥ तानं
तेनद्यथासर्वदेशायमकपाश्रयः॥६७॥ तस्मान्नकश्चिदायातिममात्रानुमतिंविना॥ इत्येषममवृत्तांतः कार्त्स्न्येना
कथितस्तच॥ पश्यमेब्रह्मद्वितत्वेननिजरूत्तमशेषतः॥ कस्त्वंकस्मादिहायातःकिमर्थोमिहधिष्ठितः॥६९॥ उद्यतोन्यत्र
वागंतुंकिंवानत्रचिकीर्षितं॥ ७०॥ वसिष्ठउ॰ इत्येवमुक्तःप्रभवतेनरामोमहामतिः॥ तूष्णीं क्षणमिवास्थित्वादध्यौ
किंचिदवाङ्मुखः॥ ७१॥ कोयमेषदुराधर्षःसन्न्यासीमोहनिस्वनः॥ अयातिवाचंवात्यर्थविस्पष्टाक्षयदाक्षरा॥७२
किंतुमेमहतीशंकातनुरस्यलतोचितं॥ विज्ञयाभिश्चबलेनरमणीचयथाद्भुरत॥ एवंचिंतयतस्तस्यानिमितानिशुभा
निवै॥ बभूवुर्भुविदेहेचस्वाभिप्रायार्थदान्यलं॥ ७४॥ ततोषिमृष्यबहुशोमनसाभृगुनंदन॥ उपाश्यज्ञानकेत्यो
धंवचनंसत्यताक्षरं॥ रामदग्न्योस्मिभद्रंतेरामोनाम्नातुभार्गवः॥ तपश्चर्तुमिहायातःसांप्रतंगुरुशासनात॥ ७६
तपसासर्वलोकेशंभक्त्याचनियमेनच॥ आराधनार्थतस्मिंस्तुंश्चेचिराहंसमुद्यतः॥ ७७॥ तस्मात्सर्वेश्वरंसर्वशर
ण्यमभयप्रदं॥ त्रिनेत्रंपापदमनंशंकरंभक्तवत्सलं॥ ७८॥ तपसातोषयिष्यामिसर्वज्ञंत्रिपुरांतकं॥ आश्रमेस्मिन्सर
स्तीरेनियमंसमुपाश्रितः॥ ७९॥ भक्तानुकंपीभगवान्यावत्प्रत्यक्षतांहरः॥ उपैनतावदत्रैवस्थास्यामीतिमतिर्मम॥
८०॥ तस्माद्दितस्तयाद्यैवगंतुमन्यत्रयुज्यते॥ यथोद्भवतिमेहानिस्तत्कुतानियमस्तु॥ माननीयोथवादंतेभवत्याद्वे
शांतरातिथिः॥ स्वनिवासमुपायातस्तपस्वीवनगोमुनिः॥ ८२॥ त्वत्संनिधौनिवासोमेभवेत्यापायकेवलं॥ तवचा
प्यसकृत्वादर्कसत्समीपनिषेवणं॥ ८३॥ सर्वमदाश्रयोपांतेपरिचंक्रमणादितः॥ परित्यज्यसकृतीभूयाल्लोकयोरुभ

योरपि॥ ८४॥ वसिष्ठउ॰ इतितस्यवचःश्रुत्वासभूयोभृगुपुंगव॥ उवाचरोषताम्राक्षस्ताम्राक्षमिदमुत्तमं॥ ८५॥ अस्य
नक्रिमिदमत्यर्थंसमीपेवसतिस्मम॥ परिग्रहस्यमेकैनकृतघ्नस्येवसांप्रतं॥ ८६॥ किंमयापकृतंलोकेभवतोन्यस्यवाक्व
चित॥ अनागकारिणंदांतंकोपिमन्येत्सतांमनः॥ सान्निधिःपरिहर्तव्योयदिमेविप्रपुंगव॥ दर्शनंसहसंवादःसंभा
षणमथापिवा॥ ८८॥ आयुष्मताधुनेवास्मान्व्यससन्नर्तमाप्नुयात॥ स्वसमासंपरित्यज्यभवताचोदितःकथं॥ ८९॥
वसिष्ठउ॰ तच्छ्रुत्वावचनंतस्यकिंचित्कोपसमन्वितः॥ तमुवाचपुनर्वाक्यमिदंराजन्भृगूद्वहः॥ ९०॥ व्याधजाति
रियंक्रूरासर्वसत्वभयावहा॥ त्वत्कृतकर्मरतानित्यंधिक्कृतासर्वजंतुषु॥ तस्यांजातोस्मिपापीयान्सर्वप्राणिविहिंस
कः॥ सकथंनपरित्याज्यःसद्भिर्निःस्यात्कदुर्मते॥ ९२॥ तस्माद्दूरानज्जातीयाद्धितात्वात्मानमव्ययः॥ तथाचोहिंसम
स्तानांप्रियाःप्राणाःशरीरिणां॥ ९३॥ यथात्वभिहतानांतुविदंतिभवतोयथा॥ अहिंसासर्वभूतानामितिधर्मस्सनातनः
९४॥ एतद्दुराचरणंनित्यंसद्भिर्विगर्हितं॥ आत्मप्राणाभिरक्षार्थंलमशेषशरीरिणः॥ हनिष्यसिकथंसात्वंनाप्नोति
वनचर्यतां॥ तस्माच्छीघ्रमितोगच्छत्वमेवपुरुषाधम॥ ९६॥ यथातेरुत्यत्रोपस्यहानिश्चनभविष्यति॥ नचेत्त्वयमितो
गच्छेनतस्तपवकादपि॥ अपिसर्प्ययताबुद्धिमद्भुत्पादयेत्स्फुटं॥ क्षणार्धमपितेपापश्रेयसेनेहसंस्थितिः॥ ९८॥
शंभोराश्रयेचरणयोर्द्वमार्थिकोल्कभेतशं॥ वसिष्ठउ॰ रामस्यतद्वचःश्रुत्वाप्रदीपितमिदंवचः॥ उवाचसंक्रुद्धउग्रः
व्याधरूपपिनाकधृक्॥ ९९॥ सर्वमेतदहंमन्येव्यर्थंप्यर्थ्यसीतव॥ कुतस्तप्रथमोज्ञानंकुतस्त्वंचकुतस्तपः॥ १००॥
किमर्थंक्लिश्यसेमूढस्तपसानेनतेधुना॥ एवंमिथ्याप्रवर्तस्यनातितुष्यतिशंकरः॥ १॥ विरुद्धलोकाचरणःशंभुस्त
स्याभितुष्यते॥ गमिष्यतिबुधोमर्त्यतांपिनाकःसदुर्मते॥ २॥ अथवावगतंमेद्यगुह्यमेतदसंशयं॥ संपूज्यप्रजाकवि
धौशंभोस्तुवचमेगः॥ तयापूजयितुंशक्यःसएवभुविनेतरः॥ संपूजकस्त्वस्यचत्वंयोगीनात्रविचारणा॥ ४॥ पिता
महस्यलोकानांब्राह्मणःपरमेष्ठिनः॥ शिरश्छित्वापुराशंभुर्ब्रह्महत्यामवाप्तवान॥ ५॥ ब्राह्मणस्तत्कपालेनचिताभस्मा
वगुंठितः॥ सर्वश्चरतिलोकेषुनित्योन्मत्तोदिगंबरः॥ ६॥ तंचापिमातरंसात्त्वामार्तहंहामनागसं॥ निहत्यनिर्दयोलोके

ब्रह्महत्यामुपागतः॥७॥ब्रह्महत्याभिभूतेनप्रायस्वंशंभुनाद्विजः॥उपदिष्टोसतत्कर्तुंनोचेदेतत्कथंकथा॥८॥तदान्यगुणसंयोगा
न्मत्योविभ्रस्यतेधुना॥ततःसिधिरनुप्राप्ताकालेनाल्पीयसाध्रुवं॥९॥प्रायोधुमातरंहत्वासर्वलोकैर्निराकृता॥तपोव्याजेनग
हनेनिर्जनेसंप्रवर्तते॥१०॥गुरुस्त्रीब्रह्महत्यादिपातकक्षपणायया॥तपश्चरसिनानेनतपसातत्प्रणश्यति॥११॥पातकि
नांकिलान्येषांप्रायश्चित्तानिसंत्यपि॥मातृद्रोहमवेहित्वंनकाचिन्निष्कृतिः॥१२॥अहिंसालक्षणोधर्मोलोकेषुपठि
तेमनः॥त्वद्हत्वेनकथंराममातरंहतवानसि॥१३॥हतामात्वयधर्मयोरंसर्वलोकविगर्हितं॥सपुनर्धार्मिकोभूत्वाकथ
मन्यंविनिंदसि॥१४॥पश्यतांदोषमन्येषामात्मदोषमजानतां॥अपर्याप्तमदंमन्येपरदोषनिदर्शिनां॥१५॥स्वकर्म
यद्यदंत्यक्त्वावर्तयमकुतोभयः॥तद्विगर्ह्यमाकार्मनिरूप्यमनसास्वयं॥१६॥मातापितृसुतादीनांभरणाय्येवकेवलं॥
क्रियतेप्राणिहननंनिजधर्मतयामया॥१७॥स्वधर्माद्गमिवेणाहंसर्वाश्चास्याद्दिनेदिने॥साधुवासाधुकर्मयोकर्मयस्याद्धितं
पुरा॥१८॥तेदंचतेनकर्तव्यंमापद्यपिकिंचन॥निरूप्यस्वबुध्यात्वमात्मनोममचांतरं॥१९॥अहंतुसर्वभावेनपित्रादि
भरणेरतः॥संत्यज्यपितरंवृद्धंविनिहत्यचमातरं॥२०॥भूत्वापुधार्मिकस्त्वंचतपश्चर्तुमिहागतः॥येतुमूढाविहत्वेषांवि
स्यहास्यातिदर्शनं॥२१॥यथाजिह्वंभवेतादृक्तत्रचापिसमीहितं॥अहंतुसम्यग्ज्ञानामितवस्त्वमशेषतः॥२२॥तस्मा
द्वंतेतपसानिष्फलेनभृगूद्वह॥सुखमिच्छंतिचेत्युक्त्वाकायक्लेशपरंतपः॥२३॥तद्यायिकाममन्यत्रयत्रत्वांनविदुर्ज
नाः॥२४॥ ॥७॥ इतिश्रीब्रह्मांडपुराणेमध्यमखंडेद्विषष्टितमोध्यायः६२॥ वसिष्ठउ॰ इत्युक्तस्तेनभूपालरा
मोमतिमतांवरः॥निरूप्यमनसाभूयस्तमुवाचातिविस्मितः॥१॥रामउवाच॥कस्त्वंब्रूहिमहाभागनवैप्राकृतपूरुषः
इंद्रस्येवानुभावेनवपुरालक्षितंतव॥२॥विचित्राभवदोदार्यगुणगांभीर्यज्ञातिच॥सर्वज्ञस्येवतेवाणीश्रूयतेतिमनो
हरा॥३॥इंद्रोवन्हिर्यमोधातावरुणोवाधनाधिपः॥ईशानस्तपनोब्रह्मावायुःसोमोगुरुर्गुहः॥४॥एषामन्यतम
प्रायोभवान्भवितुमर्हसि॥अनुभावेनज्ञातिस्तेयद्यशंकांतनोषिमे॥५॥मायावीभगवान्विष्णुःश्रूयतेपुरुषो
त्तमः॥सयानेनपुषानेनक्रूद्विर्मांसमुपागतः॥६॥अथवाजगतांतायःसर्वज्ञःपरमेश्वरः॥परमात्मात्मसंभू

निरामोरामःसनातनः॥७॥स्वच्छंदचारीभगवान्शिवःसर्वजगन्मयः॥वपुषानेनसंयुक्तोभवान्भवितुमर्हति॥नान्यस्यैवंभवेत्तस्यप्रभा
वानुमितंवपुः॥जात्यर्थसोवंचापितांवाणीचौदार्यशालिनी॥९॥मन्येहंभक्तवात्सल्याद्देनेनवपुषाहरः॥प्रत्यक्षतामुपगतोममे
हकपरीक्षया॥१०॥नकेवलंभवान्व्याधस्तेषांपटुविधाकृतिः॥तस्मात्तुभ्यंनमस्तुभ्यंमेस्वरूपंसंप्रदर्शय॥११॥आ
विःकुर्वन्प्रसादात्ममहिमानगुणंवपुः॥ममानेकविधांशंकांमुच्येयंयेनमानसीं॥१२॥प्रसीदसर्वभावेनबुधिमोहं
ममाधुना॥प्रणाशयस्वरूपस्यग्रहणादेवकेवलं॥१३॥प्रार्थयित्वामहाभागप्रणम्यशिरसाकृत॥कृत्स्वमेदर्श
यात्मानंबद्धेयंतेममांजलिः॥१४॥इत्युक्तस्तंमहाभागतातुमिच्छन्भृगूद्वहः॥उपाविश्यततोभूमौध्यानमास्तिसमा
हितः॥बद्धपद्मासनोमौनीयतवाक्कायमानसः॥निरुद्धप्राणसंचाराद्ध्योविरमुद्दारधीः॥१६॥संनियम्येंद्रियग्रा
मंमनोहृदिनिरुध्यच॥चिंतयामासदेवेशंध्यानंदृक्षाजगद्गुरुं॥१७॥अपश्यच्चजगन्नाथमात्मसंध्यानचक्षुषा
स्वभक्तानुग्रहाकारंमृगव्याधस्वरूपिणं॥ततउन्मील्यनयनेशीघ्रमुत्थायभार्गवः॥ददर्शदेवतेनैववपुषापुरतः
स्थितः॥१९॥आत्मनोनुग्रहार्थायशरण्यंभक्तवत्सलं॥पपातपादयोस्तस्यभक्त्यातस्यमहामतिः॥२०॥सगद्ग
दमुवाचेदंसंभ्रमाकुलयागिरा॥शरणंभवशर्वेतिशंकरेत्यसकृन्नृप॥२१॥ततःस्वरूपधृक्शंभुस्तद्भक्तिपरि
तोषितः॥राममुत्थापयामासप्रणयावनतंभुवि॥उत्थापितोजगद्धात्रास्वहस्ताभ्यांभृगूद्वहः॥तुष्टावदेवदेवेशं
पुरःस्थित्वाकृतांजलिः॥२३॥रामउ॰ नमस्तेदेवदेवायशंकरायादिमूर्तये॥नमःसर्वायशांतायशाश्वताय
नमोनमः॥२४॥नमस्तेनीलकंठायनीललोहितमूर्तये॥नमस्तेभूतनाथायभूतावासायतेनमः॥२५॥व्य
क्ताव्यक्तस्वरूपायमहादेवायमीढुषे॥शिवायबहुरूपायात्रिनेत्रायनमोनमः॥२६॥शरणंभवमेशर्वत्वद्भक्तस्य
जगत्पते॥अनन्योपाश्रयाणांतुत्वमेवहिजगन्मय॥२७॥यन्मयापकृतंदेवदुरुक्तंचापिशंकर॥अज्ञानता
तंभगवन्ममतत्क्षंतुमर्हसि॥२८॥अनिर्थंवेदरूपायसद्भावमिदृक्पुमान्॥त्वामृतेमिहसर्वज्ञनशक्नोमि

चये हितं ॥२९॥ तस्मात्त्वं सर्वभावेन प्रसीद मम शंकर ॥ नान्यास्ति मे नतिस्तुभ्यं नमो भूयो नमो नमः ॥३०॥ वसिष्ठ उ॰ इति संस्तूयमा
नं तं कृतांजलिपुटं पुरः ॥ तिष्ठंतमाह भगवान्प्रसन्नात्मा जगन्मयः ॥३१॥ श्रीभगवानु॰ प्रीतोस्मि भवते तात तपसानेन सांप्रतं ॥ भक्त्या चैवानप
यिन्यापि भार्गवविचारिणा ॥ मयैवावगतं सर्वं हृदयं तु प्रवर्तते ॥ तस्माद्वर्तामि यत्त्वां हंत तत्कुरु ह्यविशंकितः ॥३३॥ शराणां धारणे त्वस्य विद्यते शक्ति
रद्य ते ॥ शिष्याणां तेन भृत्यो पि तत्ता रोधं समाचर ॥ अतोत्र पृथिवीं सर्वां सर्वतीर्थेषु संक्रमान् ॥ स्नात्वा पुनीहि देहस्त्वं सर्वाण्यस्त्राण्यवाप्नुहि ॥
३५॥ इत्युक्त्वांतर्दधे देवस्तेनैव पुरसा विभुः ॥ रामस्य पश्यतो राजन्क्षणेन भव भंगकृत् ॥३६॥ अंतर्हिते जगन्नाथे रामो नत्वा तु शंकरं ॥
परीत्य पृथिवीं सर्वां तीर्थस्नानं करोन्मनः ॥३७॥ तीर्थेषु क्षेत्रमुख्येषु तथा देवालयेषु च ॥ पितॄन्देवांश्च विधिवत्तर्पयंतंद्रितः ॥३८॥
उपवासांस्ततो होमजपस्नानादिकाः क्रियाः ॥ एवं भूमिं परिक्रम्य शुद्धदेहो भवन्नृप ॥ जगाम भूयस्तं देशं यत्र पूर्वमुवास सः ॥ गत्वा
राजन्स तत्रैव पूजयामास शूलिनं ॥४०॥ एतस्मिन्नेव काले तु देवानामसुरैः सह ॥ बभूव सुचिरं राजन्संग्रामो लोमहर्षणः ॥४१॥
ततो देवाः पलायंत युद्धे तैर्बलिनोसुराः ॥ अवापुरमरैश्वर्यमशेषमकुतोभयाः ॥४२॥ युद्धे पराजिता देवाः सकला वासवादयः ॥
शंकरं शरणं जग्मुः हृतैश्वर्याः सुरारिभिः ॥४३॥ प्रार्थयामासुरसुरं हंतुं देवमुमापतिं ॥ ततस्तेषां प्रतिश्रुत्य हानवानां वधं नृप
॥ देवानां वरदः शंभुर्महोदरमुवाच ह ॥ भूमाद्रेर्दक्षिणे भागे रामो नाम महातपाः ॥४५॥ मुनिपुत्रोतितेजस्वी मामुद्दिश्य तपश्य
ति ॥ तत्र गत्वा ममार्थे चा निवेदय मम शासनं ॥४६॥ महोदर तपस्यंतं तमिहानय माचिरं ॥ इत्याज्ञप्तस्तथेत्युक्त्वा प्रणम्येशं महोदरः
जगाम वायुवेगेन यत्र रामोव्यवस्थितः ॥ समासाद्यासतं देशं दृष्ट्वा रामं महामतिं ॥४८॥ तपस्यंतमिदं वाक्यमुवाच विनयान्वि
तं ॥ इहागमिष्यति शंभुस्त्वां भृगुवर्य तदाज्ञया ॥४९॥ आगतोस्मि तदागच्छ तत्र शंभुसंनिधिं ॥ तच्छ्रुत्वा वचनं तस्य शीघ्रमुत्था
य भार्गवः ॥५०॥ तदाज्ञां शिरसा नंद्य तथेति प्रत्यभाषत ॥ ततो रामं त्वरोपेतः शंभुपार्श्वं महोदरः ॥ प्रापयामास सहसा के
लासे नगसत्तमे ॥ सहितं सकलैर्भूतैरिंद्राद्यैश्च सहामरैः ॥५२॥ ददर्श भार्गवश्चैवं शंकरं भक्तवत्सलं ॥ संस्तूयमानं निर्भिन्ना
रदाद्यैस्तपोधनैः ॥५३॥ गंधर्वैरुपगायद्भिर्नृत्यद्भिश्चाप्सरोगणैः ॥ उपास्यमानं देवेशं गजचर्मांबरांबरं ॥५४॥ भस्मोद्धूलितस
र्वांगं त्रिनेत्रं चंद्रशेखरं ॥ विभ्रत्पिंगजटाभारं नानाभरणभूषितं ॥५५॥ प्रलंबाष्टभुजं सौम्यं प्रसन्नमुखपंकजं ॥ आस्थितं कांच

नपीठे गीर्वाणसमितौ नृप ॥५६॥ उपसर्पत देवेशं भृगुवर्यः कृतांजलिः ॥ राम उ॰ नमस्ते देवदेवेति व्याहरन्नाकुलाक्षरं ॥ पापतत्सं
सत्रान्कश्चरणोपरि विह्वलः ॥५८॥ पश्यतां देववृंदानां मध्ये भृगुकुलोद्वहः ॥ तमुत्थाप्य शिवः प्राह प्रीतो रामं महो
जसं ॥५९॥ इमे दैत्यगणाक्रांताः स्वाधिष्ठानात्परिच्युताः ॥ अशक्नुवंति तान्हंतुं गीर्वाणा मामुपागताः ॥६०॥ तस्मात्
ममाज्ञया राम जहि दैत्यगणान्ध्रुवं ॥ ततो रामोब्रवीत्सर्वं प्रणिपत्य कृतांजलिः ॥ शृण्वतां सर्वदेवानां समभ्यर्थ्य मि
दं वचः ॥ स्वामिन्नविदितं किं ते सर्वस्यास्याखिलात्मनः ॥६२॥ तथापि विज्ञापयतो वचनं मे वधारय ॥ यदिंद्राद्याद्यि
भिर्देवैरखिलैरमरारयः ॥६३॥ न शक्या हंतुमेकस्य शक्यास्युस्ते कथं मम ॥ अनभ्यस्तोस्मि देवेश युद्धानामप्य
कोविदः ॥६४॥ कथं तान्निहन्ये सकलान्सुरशत्रूननायुधः ॥ इत्युक्तस्तेन देवेशः सितं कालाग्निसप्रभं ॥६५॥ दीर्वं चंद्राख्य
प्रदात्तेजोदहीतस्मै महात्मने ॥ आत्मीयं परशुं दत्वा सर्वशस्त्राभिभावकं ॥ रामं माह प्रसन्नात्मा गीर्वाणानां तु शृण्व
तां ॥ मत्प्रसादेन सकलान्सुरशत्रून्विनिघ्नतः ॥६७॥ शक्तिर्भवतु ते सौम्य समस्तारिदुरासदा ॥ अनेनैवायुधेन त्वं
गच्छ युध्यस्व शत्रुभिः ॥६८॥ स्वयमेव च वेत्सि त्वं यथावद्युद्धकौशलं ॥ वसिष्ठ उ॰ एवमुक्तस्ततो रामः शंभुना तं प्रण
म्य च ॥ जग्राह परशुं सोपि विबुधारिवधोद्यतः ॥७०॥ ततः स शंभुभैः रामो गविस्मृतेजांशसंभृतः ॥ रुद्रप्रसादसंयु
क्तो यथा च सवितुर्महः ॥७१॥ सोनुज्ञातस्त्रिनेत्रेण देवैः सर्वैः समन्वितः ॥ जगाम हंतुमसुरान्युद्धाय कृतनिश्चयः
॥७२॥ ततोभवत्पुनर्युद्धं देवानामसुरैः सह ॥ त्रैलोक्यविजयोद्युक्ते राजन्नतिभयंकरं ॥७३॥ अथ रामो महाबाहु
स्तस्मिन्युद्धे सुदारुणे ॥ प्रहारैरस्त्राणि परश्वैः समयामास दानवान् ॥ रामेण हन्यमानास्तु समस्ता दैत्यदानवाः ॥ दुद्रु
वुः सर्वतो राजन्हतशेषा भयान्विताः ॥७५॥ हतेष्वसुरसंघेषु विद्रुतेषु च कृत्स्नशः ॥ राममामंत्र्य विबुधाः प्रय
युस्त्रिदिवं पुनः ॥ रामोपि हत्वा दैत्यानभ्यनुज्ञाय चामरान् ॥ स्वयमाश्रममापेदे तपस्याकृष्टमानसः ॥७७॥ भृग
व्याधप्रतिकृतं कृत्वा शंभोर्महामतिः ॥ भक्त्या संपूजयामास संततं स्वाश्रमे वशी ॥७८॥ गंधैः पुष्पैस्तथा धूपैर्नैवेद्यै
रक्तचंदनैः ॥ स्तोत्रैश्च विविधैर्भक्त्या परां प्रीतिमुपानयत् ॥ ॥ इति श्रीब्रह्मांडपुराणे मध्यम॰ त्रिषष्टितमोध्यायः ६३ ॥ ॥

वसिष्ठउ० ततः सद्भक्तियोगेन संप्रीतात्मा जगत्पतिः॥ प्रत्यक्षमगमत्तस्य सर्वैः सह मरुद्गणैः ३ तं दृष्ट्वा देवदेवेशं त्रिनेत्रं
चंद्रशेखरं॥ वृषेंद्रवाहनं शंभुं भूतकोटिसमन्वितं॥ ससंभ्रमं समुत्थाय हर्षेणाकुललोचनः॥ प्रणाममकरोद्भक्त्या श
र्वाय भुवि भार्गवः॥ ३॥ उत्थायोत्थाय देवेशं नमस्ते परमेश्वर॥ नमस्ते जगतां नाथ नमस्ते त्रिपुरांतक ४॥ नमस्ते सक
लाध्यक्ष नमस्ते भक्तवत्सल॥ नमस्ते सर्वभूतेश नमस्ते वृषभध्वज॥ ५॥ नमस्ते सकलाधीश नमस्ते करुणाकर॥ नम
स्ते सकलावास नमस्ते नीललोहित॥ ६॥ नमस्तेऽखिलदेवारिगणनाशाय शूलिने॥ कपालिने नमस्तुभ्यं सर्वलोककपा
लिने॥ श्मशानवासिने नित्यं नमः कैलासवासिने॥ नमो रक्ताशिने तुभ्यं कालकूटविषाशिने॥ ८॥ विभवेऽमरवर्याय
प्रभवे ते स्वयंभुवे॥ नमोऽखिलजगत्कर्मसाक्षिभूताय शंभवे॥ ९॥ नमस्त्रिपथगाफेनभासिने इंदुमौलिने॥ महाभो
गींद्रहाराय शिवाय परमात्मने॥ १०॥ भस्मसंछन्नदेहाय नमोऽग्नीदुग्वक्षुषे॥ कपर्दिने नमस्तुभ्यं मंधकासुरसू
दने॥ ११॥ त्रिपुरध्वंसिने तुभ्यं दक्षयज्ञविनाशिने॥ गिरिजाकुचकाश्मीरविराजितमहोरसे॥ १२॥ महादेवाय महते न
मस्ते कृत्तिवाससे॥ योगीध्येयस्वरूपाय शिवायाचिंत्यतेजसे॥ स्वभक्तहृदयांभोजकर्णिकामध्यवर्तिने॥ सकलागम
सिद्धांतसाररूपाय ते नमः॥ १४॥ नमो निखिलयोगींद्रबोधानंदावृतात्मने॥ शंकराय सदापारमहिम्ने परमात्म
ने॥ नमः सर्वाय शांताय ब्रह्मणे विश्वरूपिणे॥ आदिमध्यांतहीनाय नित्यायाव्यक्तमूर्तये॥ १६॥ व्यक्ताव्यक्तस्वरूपा
य स्थूलसूक्ष्मात्मने नमः॥ नमो वेदांतवेद्याय विद्याविद्यस्वरूपिणे॥ १७॥ नमः सुरासुरश्रेणीमौलिपुष्पार्चितांघ्रये॥
श्रीकंठाय जगद्धात्रे लोककर्त्रे नमो नमः॥ १८॥ रक्षोगणात्मने नित्यं विश्वस्थितिविधायिने॥ हिरण्यगर्भरूपाय हरा
य जगदात्मने॥ १९॥ नमो विश्वात्मने लोकस्थितिव्यापारकारिणे॥ वस्वादित्यमरुद्विश्वसाध्यरुद्राश्विभेदतः॥ सत्व
हानस्वरूपाय पराय प्रत्यगात्मने॥ नमो गुणविकाराय जगत्संहारकारिणे॥ २१॥ यमायभिन्नमतये देवं तस्मै न
मो नमः॥ प्रकृत्यांतरे रुद्ररूपाय परावरविदे नमः॥ अविकाराय नित्याय नमः सदसदात्मने॥ २२॥ बुद्धाबुद्धिप्रबोधाय

बुद्धींद्रियविकारिणे॥ यमायभिन्नमतये देवं तस्मै नमो नमः॥ २३॥ अविकारमजं नित्यं सूक्ष्मरूपाय ते नमः॥ तव त
त्वं न जानाति योगिनोऽपि सदामलाः॥ २४॥ त्वामविज्ञाय दुर्ज्ञेयं सम्यग्ब्रह्मादयो हि॥ संप्रपंति भवे नूनं तत्सर्वं कर्म
कश्चिरं॥ २५॥ यावन्नोपाश्रितचरणौ तव ज्ञानविधायिनः॥ तावन्मतिः संसारे पंडितो वेतरोऽपि वा॥ २६॥ स एव दक्षः कु
शलः स प्रवीणः स पंडितः॥ भवतश्चरणांभोजे स्वयं बुद्धिः स्थिरीकृता॥ २७॥ स सूक्ष्मत्वेन गहनं सद्भावं तेऽव्ययं महेश वि
श्र दुषामपि मूढेन समयाति कथं प्रभो॥ २८॥ अहं हि गोचरस्ते न महिम्न स्तवसांप्रतं॥ स्तोतुमप्यनलं सम्यक् त्वामहं त्वं उधीयते
॥ २९॥ तस्मादज्ञानतापितं मया या भक्तिस्तुतः॥ प्रीतश्च भव देवेश नन्वं भक्तवत्सलः॥ ३०॥ इति स्तुतस्तदा तेन भक्त्या
रामेण शंकरः॥ मेघगंभीरया वाचा तमुवाच हसन्निव॥ ३१॥ श्रीभगवानु० रामो दृष्टस्त प्रसन्नोऽस्मि सौर्यगालितया तव॥
तपसा मयि भक्त्या च स्तोत्रेण च विशेषतः॥ ३२॥ वरं वरय मे यस्मात्त्वं यदिच्छसि चेतसा॥ तुभ्यं तत्सदशेषेण दास्याम्यह
मसंशयं॥ ३३॥ वसिष्ठउ० इत्युक्तो देवदेवेन तं प्रणम्य भृगूद्वहः॥ कृतांजलिपुटो भूत्वा राजन्निदमुवाच ह॥ ३४॥ राजो
वाच॥ यदि देव प्रसन्नस्त्वं वरार्हो मम यद्यहं॥ भवतस्तद्भीप्स्यामि ज्ञातुं मंत्राण्यशेषतः॥ ३५॥ ददौ रामाय संप्रीतः सम
त्राणि क्रमान्नृप॥ सप्रयोगसंसंहारमस्त्रग्रामं चतुर्विधं॥ ३६॥ स प्रसाभिमुखो मेरोर्याद्रूपामास शंकरः॥ अभेद्यमस्तरं दि
व्यं दृढज्यं विजयं धनुः॥ ३७॥ इषुधी चाक्षयशरौ ददौ रामाय शंकरः॥ सर्वशास्त्रमसंछिन्नं कवचं समसाधनं॥ अजेयत्वं तथा
युद्धे शौर्यं चाप्रतिमं भुवि॥ स्वेच्छया धारणे शक्तिं प्राणानां च नराधिप॥ ३९॥ ख्यातिश्च निजशास्त्रेण तन्नामः सर्वलोकिकम्॥
तपः प्रभावं च महत्प्रददौ भार्गवाय सः॥ ४०॥ भक्तिं चात्मनि संधाय दत्वा राजन्यथोदितं॥ सहितः सकलैर्भूतैरमरैश्च दशे
श्वरैः॥ ४१॥ तेनैव वपुषा सत्यं क्षिप्रमंतरधीयत॥ कृतकृत्यस्ततो रामो लब्ध्वा सर्वमभीप्सितं॥ ४२॥ अदृश्यतां गते सर्वे महोदरमु
वाच ह॥ महोदरमहर्षिं तं प्रादक्षिण्यमहंतिकं॥ ४३॥ वसिष्ठउ० तथेत्युक्त्वा गते तस्माद्भृगुवर्यो महोदरः॥ कृतकृत्यो गुरुज्ञानं दृष्ट्वा
गंतुमियेष सः॥ ४४॥ गच्छन्नथ तदा सश्वन मोहिमाद्रिवनाकरे॥ विवेन्द्रांकरं रामो भवकर्मप्रचोदितः॥ ४५॥ व्याघ्रेणानुद्रुतः को
पि पलायन नृगहरे॥ निपपात द्विजसुतं सत्रप्राणभयातुरः॥ ४६॥ रामोऽपि क्रोधरक्ताक्षो विप्रपुत्रपरीप्सया॥ तृणमूलं समादाय

ब्रह्मास्त्रेणाभ्यमंत्रयत॥४९॥ तावत्तरक्षोर्वरुता नाद्रवत्यतितंद्विजं॥ दृष्ट्वा ननादसुभृशं रोदसीकंपयन्निव॥४८॥ जलाहस्त
णमूर्धंतद्ब्रह्मास्त्रेणाभिमंत्रितं॥ मुमोचशार्दूलमनुप्रसह्यभृगुपुंगवः॥ निजग्राहद्विजस्कंतंतरक्षुंयावदुद्धतः॥ अस्त्रेणते
नतंतत्रतस्माद्रामोप्यमोचयत॥५०॥ दग्धास्त्रस्याग्निनाव्याघ्रप्रसभंतंनखांकुरैः॥ अक्षतव्रणदेहंमेमोक्षयामासतं
द्विजः॥५१॥ सोपिब्रह्मास्त्रनिर्दग्धदेहरूपस्तानभस्तले॥ गंधर्वंवपुरास्थायरामरामेतिसादरं॥५२॥ विप्रेणानेनभोपूर्वम
ट्टप्रासस्तुरक्षमां॥ गच्छामिमोचितःशापात्त्वयाद्यमधुनाद्भुतं॥ इत्युक्त्वातुगतेतस्मिन्रामोवेगेनविस्मितः॥ पतितंद्विजपुत्रं
तंरूपयान्यवपद्यत॥५४॥ माभैरितिवरत्वाणंरामोदैवद्विजात्मकः॥ परामृशंस्तदंगानिव्रणानिरुज्जीवयन्त्तप॥५५॥ प्रेम्णेणोत्था
पितश्चैवसततोन्मील्यलोचने॥ विलोकयंददर्शाग्रेभृगुश्रेष्ठमवस्थितं॥५६॥ भस्मीकृतंचशार्दूलंदृष्ट्वाविस्मयमागतः॥
गतभीरद्भुतत्वंभोकथंचेदृसमागतः॥५७॥ केनचायंनिर्हतुंमांयद्भूतोभस्मसात्कृतः॥ तरक्षुभीषणाकारःसाक्षान्मृत्युरि
वापरः॥५८॥ त्वयसंमूढमनसोममत्राविमन्यामते॥ हतेपितस्मिन्निखिलमामेतन्मायथादिन्नः॥५९॥ त्वमेवमत्तसकलं
पितामातासुहृद्गुरुः॥ परमापन्नमापन्नंयस्त्वंत्वांसमजीवय॥६०॥ आसीन्मुनिवरःकश्चिच्छांतोनाममहातपाः॥ पुत्रस्तस्या
स्मितोर्थांथीशालग्राममयाश्रितं॥६१॥ तस्मात्संप्रस्थितःशैलं दृष्टुंगंधमादनं॥ नानामुनिजनैर्जुष्टोरम्यंबदरिकाश्र
मं॥६२॥ गंतुकामोमहात्मानंपंथानंहिहिमालये॥ प्राविशद्गह्वरंरम्यंप्रदेशालोकनाकुलः॥ दिशंप्राचींसमुद्दिश्यक्रो
शमात्रंमयाशिर्वं॥ ततोदिष्टबलेनाहंप्राविशंगिरिकंदरं॥६४॥ दिङ्मूढतांगतस्तस्मिन्संभ्रमाविंगतस्ततः॥ भ्रमंतं
तत्रमांदृष्ट्वातरक्षुःसहसाभ्यगात्॥६५॥ अनुद्रुतश्चतेनाहंप्राद्रवंभयपीडितः॥ पतितश्चत्वयाभूयोभूमेरुत्थापि
तोधुना॥६६॥ पितेवानितरांपुत्रःप्रेम्णात्यर्थदयालुना॥ इत्येषममवृत्तांतःसाकल्येनोदितस्तव॥६७॥ वसिष्ठ उवाच॥ इति
पृष्टस्तदातेनस्ववृत्तमशेषतः॥ कथयामासराजेंद्ररामस्तस्मैयथाक्रमं॥६८॥ ततस्तौप्रीतिसंयुक्तौकृथयंतौपर
स्परं॥ स्थित्वानातिचिरंकालंअथगंतुमियेषसः॥६९॥ अन्वीयमानस्तेनाथरामस्तस्माद्गुहामुखात्॥ निष्क्रम्यावसथं
पित्रोःसंप्रतस्थेमुदान्वितः॥७०॥ अक्षतंगणएवासौव्याघ्रेणभुविपातितः॥ रामेणरक्षितश्चाभूद्यस्माद्व्याघ्राद्विनिघ्नत॥

तस्मानदेवनामास्यबभूवुःप्रथितंभुवि॥ विप्रपुत्रस्यराजेंद्रयदसावृक्षतव्रणः॥७२॥ तदाप्रभृतिरामस्यछायेवानुपगोमुनिः॥ बभूवमि
त्रमित्यर्थंसर्वावस्थासुपार्थिव॥७३॥ सतेनानुगतोराजन्भृगोरासाश्रमान्तिधिं॥ दृष्ट्वास्थातिंश्रमोभ्येत्याविनयोन्यभ्यवादयत॥७४॥
सताभ्यांप्रीयमाणाभ्यामाशीर्भिरभिनंदितः॥ दिनानिकतिचित्तत्रन्यवसत्कालप्रियेप्सया॥७५॥ ततस्तयोरनुमतेच्यवनस्यमहा
मुने॥ आत्मानंप्रतिचक्रामक्रिष्यसंघैःसमावृतं॥ मंत्रीयागांतःकरणंतंचसंशांतमानसं॥ सकन्यांचापितद्भार्यामव
दंतमसुमनाः॥७७॥ ताभ्यांचप्रियमाणाभ्यांरामःसमभिनंदितः॥ उवासतत्रतत्प्रीत्यैदिनानिकतिचिन्नृप॥७८॥
विसृष्टस्तेनराजेंद्रच्यवनेनाभवन्मुदा॥ प्रामात्तुभार्गवःश्रीमान्ततोब्राह्मणसंयुतः॥ अववंदतुपितुःपत्रौर्गत्वापादौपृथक्पृथक्॥
तौचतंप्रतिसंहृष्टावाशिषाभ्यनंदतां॥८०॥ पृष्टश्चताभ्यामखिलंनिजवृत्तमुदारधीः॥ कथयामासराजेंद्रयथावृत्तमनुक्रमात
॥८१॥ स्थित्वादिनानिकतिचित्तत्रापितदनुज्ञया॥ जगामावसथंपित्रोर्मुदापरमयायुतः॥८२॥ अभ्येत्यपितरौराजन्नासीनावाश्र
मांतमे॥ अवंदततयोःपादौयथावद्भृगुनंदनः॥८३॥ पादप्रणामावनतंतौसमुत्थाप्यसादरं॥ अभिक्षानेत्रसलिलैःस्वनावभ्यषिंच
तां॥८४॥ आशीर्भिरभिनंद्यांकेसमारोप्यमुहुर्मुहुः॥ आरक्ततांचतौरामंकालेनेतावतात्वया॥८५॥ किंकृतंपुत्रकावाद्यंपुत्रवतामुप
स्थितः॥ पितामहस्यकाशंतामाश्रितान्यत्रवायतः॥ त्वयेतदखिलंवत्सकथ्यतांकथ्यतामाचर्या॥८६॥ ॥ इतिश्रीब्रह्मांडपुराणेमध्य
मखंडेचतुःषष्टितमोध्यायः६४ ॥७॥ वसिष्ठ उ॰ इतिपृष्टस्तदाताभ्यांरामोराजन्कृतांजलिः॥ तयोरकथयत्सर्वमात्मनायदनुष्ठितं
॥१॥ दिनद्वयावधिकृत्स्नगुरौतपश्चरणमात्मनः॥ शंभोर्निदेशात्तीर्थानांगमनंचयथाक्रमं॥२॥ तदाद्यपितस्मादानांवधंवामकरेणयत॥ हृ
रप्रसादात्स्त्राणिमरुतव्रणदर्शनं॥३॥ एतत्सर्वमशेषेणयदन्यच्चात्मनाकृतं॥ कथयामासतद्रामःपित्रोःसंप्रीयमाणयोः॥४॥ तौ
चतेनोदितंसर्वंश्रुत्वातत्कर्मविस्तरात्॥ हर्षोद्रेकान्तरंभृशाराजन्नानुवतामुभो॥५॥ एवंपित्रोर्महाराजःशुश्रूषांभृगुपुंगवः॥ प्रकुर्वंस्तु
विधेयात्माश्वात्रणांचावसाश्रियं॥६॥ एतस्मिन्नेवकालेतुकार्तवीर्यहृदयेश्वरः॥ इत्येवमगयांगंतुंचतुरंगबलान्वितः॥७॥ संडयमाने
नगगनेर्वध्वकुक्समसंस्कृडो॥ वयःसनर्मदातीरतरानिंहाश्चयेपुच॥८॥ व्याहरत्स्वाकुलावाचोमनःश्रोत्रसुखावहाः॥ नर्मदाती
रतीर्थानिमवतीर्याश्वहारिणी॥९॥ ततोयेमुनिरंदंदृष्टुंगणतस्कब्रह्मशाश्वतं॥ विधिवत्कृतमैत्रेयुसानिराय्यसरितंजात॥१०॥

ब्रह्मां ३ पु ० आश्रमं प्रति गच्छन्सु मुनिमुख्येषु कर्मिषु ॥ प्रत्येकं विप्रपत्नीषु व्यग्रासु गृहकर्मसु ॥ १३ ॥ होमार्थं मुनिकन्याभिर्दुह्यमानासु धेनुषु ॥ स्ना
तं मुनिकुमारेषु नदीमवतरत्सु च ॥ १४ ॥ अग्निहोत्राकुले काले सर्वभूतसुखावहे ॥ मंत्रेषूच्चार्यमाणेषु सत्सु कर्मसु सर्वतः
८ ॥ १५ ॥ पच्यमानेषु कव्येषु हूयमानेषु हव्युषु ॥ यथावन्मंत्रतंत्रोक्तक्रियासु विततासु च ॥ १५ ॥ ज्वलदग्निशिखाकारेत
मस्तपनतेजसि ॥ प्रतिहत्यौदिशः सर्वा विरण्यानि च मेदिनीं ॥ १६ ॥ सवितर्युदयं याति नैशे तमसि नश्यति ॥ तार
कासु विलीनासु काष्ठासु विमलासु च ॥ १७ ॥ कृतमैत्रादिको राजा त्वरयाहृदयेश्वरः ॥ निर्ययौ नगरात्तस्मात्पुरोहितसम
न्वितः ॥ बलैः सर्वैः समुदितैः सवाजिरथकुंजरैः ॥ सचिवैः सहितः श्रीमान्सवयोभिश्च राजभिः ॥ १९ ॥ नादयन्रथघो
षेण ककुभः सर्वतो नृपः ॥ ययौ संछादयन्व्योम विमानैः शंकुलं समं ॥ संप्रविश्य वनं घोरं विंध्याद्रेर्बलसंचयैः ॥ भंजयांच
क्रे उद्यामास समंताद्गजसत्तमः ॥ २१ ॥ परिवार्य वनं तं तु सराजानिज सैनिकैः ॥ मृगान्नानाविधान्सिंहान्निजघान
निशितैः शरैः ॥ आकर्णाकृष्टकोदंडप्रमुक्तैर्निशितैः शरैः ॥ निकृत्तगात्राः शार्दूलान्पपतन्दुर्चिकेन च ॥ २३ ॥ उद्यद्वेद
पादांतारवं दखंडितविग्रहाः ॥ वराहयूथपाः केचिद्रुधिराद्रवरा मिषुः ॥ २४ ॥ प्रचंडेशक्तिकोन्मुक्तान्नानिभिर्भिन्नमस्त
काः ॥ गवयाः प्रत्यपद्यंत पर्वताइव मेदिनीं ॥ २५ ॥ नाराचविद्धसर्वांगाः सिंहश्च्यर्घरभादयः ॥ वसुधामन्वकार्यंत
शोणिताद्राः समंततः ॥ २६ ॥ एवं हत्वा मृगान्सर्वान्हिंस्रप्रायानशेषतः ॥ श्रमेण महता युक्ता बभूवुर्नृपसैनिकाः ॥
२७ ॥ मध्यंदिनकरे प्राप्ते ससैन्यः स तदा नृपः ॥ नर्मदां घर्मसंतप्तः स्नातुं रगमच्छने ॥ २८ ॥ श्रव तीर्य ततस्तस्या
तोये सबलवाहनः ॥ विजगाह मुदा राजा श्रुत्पिपासापरिपीडितः ॥ २९ ॥ स्नात्वा पीत्वा च सलिलं कुपितस्याः सुशीतलं ॥
विशंकराणि शुभ्राणि स्वादूनि प्रजयानि च ॥ ३० ॥ विक्रीडय तोये सुचिरं मुत्तीर्य सबलो नृपः ॥ विश्राममचरत्तीरे त
रुषंडोपशोभिते ॥ ३१ ॥ आलंबमाने तिग्मांशौ ससैन्यः सानुगो नृपः ॥ निश्चक्राम पुरीं गंतुं विंध्याद्रिवनगह्वरेः ॥ ३२ ॥
स गच्छन्नेव ददृशे नर्मदातीरमाश्रितं ॥ आश्रमं पुण्यशीलस्य जमदग्नेर्महात्मनः ॥ ३३ ॥ ततो निरस्य सैन्यानि दूरे खला

MEMORIAL

ध्य पार्थिवः ॥ परिवारैः कतिपयैः सहितो यात्तदाश्रमं ॥ ३४ ॥ पूजयामास विधिवदर्घ्यपाद्यासनादिभिः ॥ संभावयित्वा तां
पूजां मुनिना विहितां तदा ॥ ३५ ॥ निषसादासने शुभ्रे पुरस्तस्य महात्मनः ॥ समासीनं नृपवरं कुशासनगतो मुनिः ॥ पप्रच्छ कुश
लं राज्ये पुत्रमित्रादिबंधुषु ॥ स हृसं कथयां चक्रे राजा मुनिवरोत्तमः ॥ ३६ ॥ स्थित्वा नातिचिरं कालमातिथ्यार्थमं मंत्रयत
॥ ततः स राजा सुप्रीतो जमदग्निमभाषत ॥ ३७ ॥ महर्षे हे द्विमे नु तां गमिष्यामि स्वकं पुरं ॥ समयः याहनबलो ह्यहं तस्मान्म
हामुने ॥ ३८ ॥ कर्तुं न शक्यमातिथ्यं त्वया वन्याशिना वने ॥ अथवा त्वं तपः शक्त्या कर्तुमातिथ्यमद्य मे ॥ ३९ ॥ शक्तोष्यपि
पुरीं गंतुं ममानुज्ञातुमर्हसि ॥ अन्यथा चेद्भवेदेतत्स्यर्थं मुनिसत्तम ॥ ४० ॥ तपस्विनां भवेत्पीडा नियमक्षयकारिका ॥ व
सिष्ठ उ० इत्येवमुक्तः स मुनिस्तं प्राह स्मयतां क्षणं ॥ सर्वं संपादयिष्येहमातिथ्यमनुगस्य च ॥ ४२ ॥ इत्युक्त्वा स मुनिर्दीर्घ
धीमातिथ्यं यमशेषतः ॥ दुदोह स्वपते राशस्य धोग्यं मुनिर्गोरवं ॥ ४३ ॥ अथाश्रमं तत्सुरराजसंपद्धिकाशमासीत्कृतपुंग
वस्य ॥ विभूतिभेदैरविचिंत्यरूपमनन्यसाध्यं सुरभिः प्रभावात् ॥ ४४ ॥ महार्हरत्नोज्ज्वलहेमवेदिकानि कूटसोपानकु
टीविटंकैः ॥ तुलाकपाटाकुलकुड्यदेहलीविनीतशालाजिरशोभिशोभितैः ॥ ४५ ॥ वलभ्यलिंसांगनचारुतोरणैरुदस्यप
पतत्संख्ये क्रुद्धः सर्प इव श्वसन्॥ २१॥ असोढधर्षणस्तूर्णं रामं प्रतिरुषान्वितः॥ प्रयाहीत्यसकृत्सूतं प्रेरयन्युद्धदुर्म
दः॥ २२॥ अभिद्रुत्य रणे रामं हंतुकामो महाबलः॥ चापेषु युगपद्बाणान्संदधे कुलिशोपमान्॥ २३॥ तस्य वेगं च वे
षं च दृष्ट्वा संख्ये दिवौकसः॥ अपि स्वस्ति भवेदस्य रामस्येत्यूचुराहवे॥ २४॥ ततः शराणां शतपंचकेन रामः ससूता
श्वरथं विभिद्य॥ विमोहयामास रणे मुहूर्तकालेयथालोकमभिर्युगांते॥ २५॥ युयोध रामेण समं तदानीमपूजयत्
कर्म तदस्य देवाः॥ आकर्णमाकृष्य हृतोसि रामेत्युच्चैर्वदन्नाशु मुमोच रुष्टः॥ २६॥ स गाढविद्धो व्यथया भृशोज्ञाक्षतो
द्भवक्लिन्नतनुर्विसंज्ञः॥ विसृज्य चापं निपपात तूर्णं रामो रथे वासवतुल्यतेजाः॥ २७॥ विचेतनं वीक्ष्य रथं नयावन्निवा
रयामास स सारथिश्च॥ तावत्पुरस्तस्य पिनाकपाणिरदृश्यतास्याशु स रक्षयासः॥ २८॥ शशांकमौलिर्भसितेभच
र्मा स्फुरल्ललाटेक्षणवह्निरुद्धैः॥ उमांगरागारुणितोरुगात्रविभूषणीभूतमहाभुजंगः॥ २९॥ फणामणिद्योतित
दिव्यदेहः वृषेंद्रवाहः समुपेत्य सर्वः॥ संदर्शयन्भक्तजनानुकंपां ह्लादंत वत्सेति करांबुजेन तं॥ ३०॥ पस्पर्श कारुण्य
गुणैकराशिः अनन्यसंलभ्यकरावमर्शी॥ मासाद्य शंभोरथ रेणुकेयः क्षणाद्विशल्यः सहसोत्थितः सन्॥ ३१॥ पुरः
पुरारिं पतितो ददर्श॥ भवं समालोक्य पुनः स बाहार्तं हृष्टरोमा सहसावतीर्य॥ बाष्पाननः साध्वससन्नकंठः प्रसीदना
थेति पपात भूमौ॥ ३२॥ ततस्तमुत्थाप्य पिनाकपाणिः सहर्षमालिंग्य शनैरुवाच॥ दिष्ट्या भवान्जीवति चास्य संख्ये
नासः परामापदमद्य नूनं॥ ३३॥ जितश्च मत्तारिपुरेष युद्धे सुकर्मविद्विष्टं च भृगुप्रवीरः॥ प्रसह्य तं स्मादहमेनमद्य

रणे हनिष्यामि पुरस्तवैव ॥३४॥ तथा वदंतं प्रणिपत्य भूयः कृतांजलिः सर्वमुवाच रामः ॥ एतावतालं भगवन्कृतार्थस्त्व
यासनाथोस्मि कृतोऽयदेव ॥३५॥ ममैव पर्याप्तबलेन युद्धे राजाय तत्कालवशंगतोऽसौ ॥ तस्माद्यासन्नेनकृतास्त्वः
याद्य भवंति शंभो सकलाः सनाथाः ॥३६॥ तथेति वाचं समुदीर्य शंभुः कृतांजलेः पश्यत एव राजन् ॥ तेनैव रूपे
ण रथप्रदेशात्सद्यस्तिरोभावमुपाजगाम ॥३७॥ रथं समारुह्य भृगुप्रवीरो नत्वा हरं भक्तिविनम्रचेताः ॥ ज
ग्राह कोदंडवरं शरांश्च युद्धाग्निरुत्तोऽर्जुन एव तावत् ॥३८॥ क्रियासमस्ता विधिवद्दिनांते समाप्य वीरो भृगुहैहया
नां ॥ अथोदितेऽर्के पुरस्सप्रवीरौ समाप्य मैत्रादिकमाशुकर्म ॥३९॥ परस्परं तौ सुसमृद्धरोषावुपेयतुः सज्जरथौ रणाय
॥ कृत्वा करं कर्म विचित्रमाजौ कृत्वा विमिस्मापयतां जगंति ॥४०॥ विभिन्नगात्रौ रुधिरप्लुतांगावन्योन्यशस्त्रैरणदुर्मदौ तौ ॥
कृत्वा महद्युद्धमहाप्रवीरौ पुनर्दिनांते विरतावुभौ हि ॥४१॥ दिनानि षट्पंच च कौकवीरौ रामार्जुनौ नप्रभयौ विजेतुं ॥ ॥४
इति श्री ब्रह्मांडपुराणे मध्यमखंडे सप्तसप्ततितमोऽध्यायः ॥७७॥ ॥ वसिष्ठ उ० ॥ अथोषस्युदिते सूर्ये कृतनित्यौ त्वरान्वितौ ॥
रामार्जुनौ भृशं क्रुद्धावन्योन्यमभिजघ्नतुः ॥१॥ ततः क्रोधपरीतात्मा रामः शस्त्रभृतां वरः ॥ विव्याध निशितैर्बाणैः समरे
हैहयाधिपं ॥२॥ सतैर्विक्षतसर्वांगो रुधिरौघपरिप्लुतः ॥ क्रोधेन महताविष्टो रामं विव्याध पत्रिभिः ॥३॥ ततः क्रुद्धो भृगुश्रे
ष्ठो दृढमायम्य कार्मुकं ॥ धनूंषि निशितैर्बाणैस्तस्य चिच्छेद पार्थिव ॥४॥ अथैनं छिन्नधन्वानं सायकानां परंशतैः ॥ अवि
ध्यत्सर्वगात्रेषु जिघांसुर्नृपसत्तम ॥५॥ सच्छिन्नधन्वा नृपतिः सायकैर्दृढमाहतः ॥ निपपात रथोपस्थे मूर्छितो न च चेतनः
६॥ अपोवाह रथं तस्य ततः सूतस्त्वरान्वितः ॥ प्रतिलभ्य पुनः संज्ञामर्जुनो जयतां वरः ॥७॥ तावद्धनूंषि जग्राह सायकां
श्च त्वरान्वितः ॥ रामं प्रच्छादयामास स सूताश्वरथं शरैः ॥८॥ ततस्तत्प्रहितान्बाणान्छित्वा रामो महाबलः ॥ वक्षस्यभ्य
हनत्क्रुद्धो नाराचेन शितेन तं ॥९॥ स गाढविद्धो व्यथितः सचचाल रथोत्तमे ॥ संस्तभ्य च तदात्मानं धैर्यसारः क्षणा
द्दिव ॥१०॥ क्रोधामर्षयुतः सोऽथ नाराचानां त्रिसप्तकैः ॥ विव्याध युगपद्रामं क्रुद्धस्तत्प्रतापवान् ॥११॥ ध्वजं भयद्रथं

तस्य हयान्सारथिमेव च ॥ ततोऽर्जुनः शरैर्वर्मं बिभेदाद्भुतकर्मणः ॥१२॥ धनुः पपात तद्धस्तात्कृत्तं रश्मिरिवांबरात् ॥ उवा
च स भृगुश्रेष्ठं मेघगंभीरया गिरा ॥ ब्राह्मणेन तपो नूनं कार्यमात्महितैषिणा ॥ क्षत्रस्य शस्त्रग्रहणं ब्रह्मणा हि विहितं पुरा
१४॥ असतां शासनार्थाय सतां संरक्षणाय च ॥ कर्माणि क्षत्रबंधूनां त्रीण्याह मनुरब्रवीत् ॥१५॥ दानमध्ययनं यज्ञस्तेषु
तेष्व परिपालनं ॥ वधश्च धर्मयुद्धेन स्वधर्मपरिपंथिनां ॥१६॥ एतस्मात्कारणाद्राज्ञां शस्त्रग्रहणमीरितं ॥ शास्ता हि स
र्वभूतानां राजा संप्रादिति श्रुतिः ॥१७॥ त्वं तु धर्मं परित्यज्य करोषि शस्त्रपरिग्रहं ॥ तस्माद्य हनिष्यामि त्वामहं निशितैः
शरैः ॥१८॥ कः कुर्यादीदृशं कर्म त्वदन्यो ब्राह्मणो ध्रुवं ॥ हननं राजपुत्राणां समरेष्वनिवर्तिनां ॥१९॥ दोषोऽपि न भवेन्मह्य
मपेतब्रह्मवर्चसं ॥ क्षत्रकल्पाभिभूतं त्वां हत्वा संख्ये न संशयः ॥२०॥ अनेषीः संक्षयं युद्धे यन्मे पुत्रान्सुदुर्मते ॥ फलमा
प्नोति तस्य त्वमिदानीमेव केवलं ॥ अद्य ते पातयिष्यामि छित्वा नूनं शरैः शिरः ॥ न चेन्मामागतस्त्यक्त्वा धनुः शीघ्रं विमुच्य
तां ॥२२॥ तस्य तद्वचनं श्रुत्वा क्रोधपर्याकुलेक्षणः ॥ जग्राह स शरं चापं आशीविष इव श्वसन् ॥२३॥ प्राहार्जुनं त्वया धर्म
ः साधितोऽयं सनातनः ॥ मुनिवर्यं तपोनिघ्नं स्वकर्मस्थं जितेंद्रियं ॥२४॥ हतवान्पितरं मे त्वं क्षत्रियापसदाधम ॥ तत्त्वां पाप
समाचारं ब्रह्मघ्नमभिमानिनं ॥२५॥ हनिष्यामि शितैर्बाणैः सनामामिषमेव च ॥ तवाद्य बिभजिष्यामि निहत्य
त्वामहं रणे ॥२६॥ यदि त्वदर्थं प्राप्नुर्मा संख्ये दानवदेवताः ॥ तथापि त्वां हनिष्याम्यिबाणयोच्चरगं मम ॥२७॥ इत्युक्त्वा
निशितैर्बाणैश्छित्वा तस्य धनूंषि सः ॥ तं च प्रच्छादयामास स सूताश्वरथं क्षणात् ॥२८॥ सच्छिन्नधन्वा नृपतिर्गदां गृ
ह्य महाबलः ॥ प्रेषयामास रामाय युगपच्छतशो नृप ॥ स चापि तान्नारशतैस्तिलशो भृगुपुंगवः ॥ चिच्छेदैकैक
शो राजन्क्षणेन परवीरहा ॥३०॥ ततः क्रुद्धो महाराज कार्मुकान्यग्रहीत्स्वयं ॥ मुमोच राममुद्दिश्य हंतुं बाणानमर्षित
ः ॥३१॥ अदृष्ययं छराः सर्वा नारा रामं सुमंत्रिताः ॥ ततो रामो महाबाहुः शरस्त्रं गारुडमुत्तमं ॥३२॥ अभिमंत्र्य शरं
घोरमुदीरयदमर्षितः ॥ तस्माच्छराः प्रादुरासन्नागारिकृतलक्षणाः ॥३३॥ अभ्यद्रवस्ततः सर्पाश्छतशोऽथ सहस्रशः

नागास्त्रशांतिमापन्ने दृष्ट्वा न्यद् अथाक्षिपत॥३४॥ गांधर्वेण च तद्रामः शमयामास वीर्यवान्॥ ततः कुबेरदयितं मस्त्रं
रिपुभयंकरं॥ न्ययोजयत वेगेन रामाय स मरेर्जुनः॥३५॥ ॥ इति श्रीब्रह्मांडपुराणे मध्यमभागे अष्टसप्ततितमोध्या
यः॥ ७८॥ ॥ वसिष्ठ उ॰ दृष्ट्वा तदस्त्रमथ संयति सर्पभयंकमालामुखप्रसृतवह्निशिखासमृद्धं॥ पार्जन्येन भार्गववरो
पि तत्प्रशशाम मस्त्रेण तस्य विततान रणे महात्मा॥१॥ कालाग्निसंज्ञकमथोस्त्रमुदीर्णरोषः सम्यग्युयोज भृगुवीरम
भिप्रसत्य॥ तद्वारुणेन समरे स्त्रवरेण राजन् सद्योनिनाय विलयं भृगुवंशकेतुः॥२॥ पार्जन्यमस्त्रमथ संयति हैहयेंद्र
संधाय राममभि सप्रसभं मुमोच॥ रामोपि तत्प्रतिविघातमभीप्समानो वायव्यमस्त्रमपि घोरतरं मुमोच॥३॥ पैशाच
मर्जुनाय प्रथमस्त्रं पैशं रामोपि राक्षसमथ प्रमुमोच राम॥ रामस्तु तं प्रतिमुमोच निजास्त्रमस्त्रं कालानलाख्यमथ दृष्ट्वा
आक्षिपत्रं॥४॥ दृष्ट्वार्जुनः समरे स्त्रवरं प्रयुक्तं रामो युयोज युधि पाशुपताभिधानं॥ ऊर्ध्वं प्रभूतमवनेरमरा युगांतका
लानलप्रतिभयं मनसाभिपेदुः॥५॥ तावच्चराचरगुरुर्जगतोभिवीक्ष्य प्रक्षोभमस्त्रनिवहोत्थितमाह वेधाः॥ भोभो
नरेश्वर भृगुप्रवरा लमस्त्रगृद्धं ममा व वचसा युधयोरकाले॥६॥ अस्त्राग्निना क्षयमुपैति जगन्न यावत् तावद्युगांत
मधुना प्रतिसामयेता॥ इत्थं निशम्य गिरमब्जभुवो रथान्तौ सद्योवतीर्य भुवि संहननायुधानि॥७॥ त्यक्त्वा परस्परस्य
पासमुदारितास्त्रं मंत्रात्म दैवतमभिप्रणतौ व्यधत्तां॥ सद्यः प्रशाम भुवनत्रयदाहदक्षो ज्वालाग्रसंहतिसमावृतभा
नुमार्गः॥८॥ अस्त्रानले जगदुपेयुषि शातिमुक्त्वा पातप्रचंडपवनाहृतिधूलिजालैः॥ दिग्दाहधूमतिमिराशनिधू
मकेतुशांतः प्रकोपमभवत्प्रकृतिस्थमेव॥९॥ आरुह्य तौ रथवरं पुनरेव राजन् सद्यो धनूंषि परिगृह्य रणे न वीरौ॥ स
घस्ततश्चतुरलं मुसमस्थ रोषाद्वन्योन्यमप्रतिरथौ विशिखैः कृतीक्ष्णैः॥१०॥ ततो रामो महाबाहुर्दृढं कार्मुकमुत्तमं
। विव्याध निशितैर्बाणैः कंपयन्निव भूपतिं॥११॥ अथ क्रोधपरीतात्मा नाराचैरशनिप्रभैः॥ विभेद सर्वमर्माणि
रामस्य नृपतीबली॥१२॥ अथ साधकविस्पष्टैस्तं विशिखैर्मर्मभेदिभिः॥ विह्वलीभूतमनिशं चक्रे रामोर्जुनं प्रति॥१३॥

विमोहयित्वा विशिखैरर्जुनं भृगुपुंगवः॥ क्रोधेन महता विष्टो हंतुं चक्रे मनोरथं॥१४॥ ततो निषंगाद्राक्षिप्य क्षणेन
परमास्त्रवित्॥ समधत्त शरं श्रीघ्रं अर्धचंद्रं शराशने॥१५॥ आकर्णपूर्णमाकृष्य धनुः प्रवरमुत्तमं॥ विव्याधतेना
र्धचंद्रेण हैहयेंद्रस्य विश्रुतं॥१६॥ शार्दूलं स्वर्णरचितं ध्वजं रिपुभयंकरं॥ असंप्रयुक्तं लोकेषु चित्तेदपरवारहा॥१७
निपपात रथाद्भूमौ छिन्नयष्टिध्वजो महान्॥ शोचयन्नाह हृदः सर्वान्ने दयन्नरुतव्रणं॥१८॥ ततोस्य निशितैर्बाणैरेकै
कं तुरगोत्तमान्॥ दशभिर्दशभिर्बाणैराजघान भृगूद्वहः॥१९॥ व्याघ्रनाममहाकायास्तुरंगास्तस्य धीमतः॥ अ
ष्टितो विधिवद्युक्ता रथे तस्य महात्मनः॥२०॥ हतमभ्याहता बाणैरामेण तुरगाभ्यरं॥ निपेतुर्व्यसवो भूमौ वज्रभग्ना
इवाद्रयः॥२१॥ अथार्धचंद्रेण शिरो यंतुस्तस्य सकुंडलं॥ जहार परमक्रुद्धो रामः सत्यपराक्रमः॥२२॥ शेषे रथ्यानि च
पानि योत्थावर्मषुधीरपि॥ रथं चातलशो बाणैर्वज्राशनिसमप्रभैः॥२३॥ विध्वा रामोननाहोच्चैस्तदद्भुतमिवाभवत्
संछिन्नधन्वा विरथो रामं प्रति रुषान्वितः॥२४॥ गदाहस्तोतिवेगेन नैचालद्रणमूर्धनि॥ तां गदां तिलशश्छित्वा शरेण
भृगुपुंगवः॥२५॥ चिच्छेदोरस्तदीपं तवक्त्रेणेंद्रइवाचलं॥ अमर्षाच्चलमापन्नस्ततो हैहयपुंगवः॥२६॥ आदाय परि
घं घोरं रामं प्रति जघान ह॥ परिघेणाहतो रामो रथोपस्थेपपात ह॥२७॥ तावद्रुत्रं समास्थाय सहसा होमहाबलः॥ र
श्मीन्हयानां जग्राह प्रतोदं च तरान्वितः॥२८॥ व्यपाहृत्य धनूंष्य थो भृगुवीरस्त्वयं नृप॥ प्रतिवस्थापयामास पुनरेव
रथोपरः॥२९॥ ॥ इति श्रीब्रह्मांडपुराणे मध्यमखंडे नवसप्ततितमोध्यायः॥७९॥ ॥ वसिष्ठ उ॰ एतस्मिन्नंत
रे क्रुद्धो हैहयानामधीश्वरः॥ सस्मार मनसा चक्रं यच्चिन्हं चक्रवर्तिनां॥१॥ दैत्यवर्गसमायुक्तं जवेनांतरितानिलं॥ स
ग्राहनृपतिश्चक्रं स्मरणेनांतरागतं॥२॥ तडित्सहस्रसंकाशं सहस्रारमनोमयं॥ क्षुरधारांतपर्यंतं ज्वालामयसुदर्शनं
३॥ सहसाचारध्वकृश्रीमान्सहस्रकरमंडलं॥ क्षितिरुः प्रबभौ राज्ञा नारायण इव क्षणं॥४॥ तावद्रामोपि मतिमान्किं
चिदायतमानसः॥ स्वरूपाद्वत्पुत्त्या धो धनुषा च्व्यति ष्ठत॥५॥ ततोर्कशतसंकाशं चक्रं हैहयभूपतिः॥ भ्रामया
मास तरसा हंतुकामो भृगूत्तमं॥६॥ विश्वं प्रव्यथमानं क्रेचक्रं कल्याग्निवज्जरा॥ तमापतंतमालोक्य पादं चायुदयाद्रि

वत्॥७॥ ततः कार्मुकमायम्य लघुहस्तः प्रतापवान्॥ क्रोधेन महताविष्टः प्रज्ज्वालभृगूद्वहः॥८॥ ततः शतगुणं चक्रं भ्रा
मयित्वा नृपोत्तमः॥ चिक्षेप राममुद्दिश्य रोषामर्षसमन्वितः॥९॥ ततो हाहाकृतं सर्वमभूत्स्थावरजंगमं॥ अपि स्वस्तिभ
वेद्द्वरामस्येत्यब्रुवन्सुराः॥१०॥ ततो वेगवदुत्सृष्टं राज्ञा चक्रं महाद्भुतं॥ भुवनं भावयामास मध्याह्नार्कमहो यथा॥११॥
वैमानिकास्तु तज्ज्वालामंडलेनातिभास्वता॥ संतप्यमानास्ते दूरं विमानैरपचक्रमुः॥ अकृतव्रणमुख्याश्च भयमीलित
लोचनाः॥ तं दृष्ट्वा वैष्णवं चक्रमापतद्भृगुपुंगवः॥१३॥ विन्यस्य स शरं चापं कृतांजलिपुटोऽभवत्॥ तच्चापि ज्वलदत्यं
तं चक्रं तेजोमयं महत्॥१४॥ आससाद भृगुश्रेष्ठं कृतांजलिपुटस्थितं॥ भूत्वा सौम्यप्रभारूपं वपुस्तस्य महात्मनः॥१५
कवलीकृतं तत्रैव क्षणेनं समलीयत॥ स तेजसा समायुक्तः प्रबभौ भृगुनंदनः॥१६॥ तदात्मको भवद्विस्मुरात्मना सस
मागतः॥ ततोऽभिभूयो रामं संतापयामास रोदसी॥१७॥ क्रमादभ्युदितः प्राच्यां भुवनानीव भास्करः॥ अथ संमीत
मनसो देवाः सर्वेंतरिक्षगाः॥१८॥ हृष्ट्वैव कस्विनं राममभृत्युस्व्ययतत्फलं॥ दृष्ट्वैतदखिलं राजा रामदन्यविचेष्टितं॥
१९॥ चिंतयामास बहुधा विस्मयं परमं गतः॥ अयं मंमत्युरत्वंनो नूनं भृगुकुलोद्भवः॥२०॥ उत्तमः पुरुषश्चायं सर्व
लोकैकसंश्रयं॥ यथा मे गुरुणा पूर्वमुक्तं मे त्रिपुराश्रयं॥२१॥ व्रतं मया ध्रुवं चैतत्प्राप्तं भवितुमर्हति॥ इति निश्चि
त्य संग्रामे मतिमान्विरराम च॥२२॥ अविव्यथितचित्तात्मा मर्तुं चक्रे मनोरथं॥ विकाशयित्वा वेगेन योगी हृदयमात्म
नः॥ संप्रसाधितमात्मानं परमानंदविग्रहे॥ पश्यन्विश्वमशेषेण प्रणनर्त ततः स्वयं॥२४॥ उवाच च भृगुश्रेष्ठं मे
हो दिव्यं ममांतिकं॥ हनिष्ये त्वां बलात्सत्यं यदि न पलयायसे॥२५॥ इत्येवं व्याहृतं वाक्यं हृत्वा चिंत्यं स तोत्तमः॥ अलंप्र
चंडदोर्दंडमंडलाता युधप्रज्ञा॥२६॥ प्रणनर्त रणे भूयः पश्यन्नात्ममयं जगत्॥ रामोऽपि क्रोधरक्ताक्षो गृहीत्वा परशुं
त्वरितं॥२७॥ अभ्यद्रवद्दमेयात्मा राजानमरिकर्षणं॥ परस्वधेन युयुधे प्रजहार स रुन्नृपं॥२८॥ गृहीत्वा वामहस्तेन
मौलौ भ्रमाव्यपातयत्॥ इतस्ततः प्रस्फुरंतस्तस्य वामपदोरसि॥२९॥ आक्रम्य प्रजहाराशु रामः परशुना मुहुः॥ चि

च्छेद परमः क्रुद्धः कार्तवीर्यस्य भार्गवः॥३०॥ ततस्तद्देहनिष्क्रांतं तेजो भुवनभासकं॥ विवेश व्यापयन्व्योम सद्यो भित्वार्कमंडलं
॥३१॥ दिव्यं विमानमारुह्य सदैवैः स हसंस्कृतः॥ लोकानतीत्य ब्रह्मादीन्क्रोधेन कृतनांवरः॥३२॥ ऊर्ध्वमाचक्रमे राजन्प्री
त्या परमया युतः॥ भूत्वा दिव्यवपुः श्रीमान्सर्वाभरणभूषितः॥३३॥ वैकुंठादागतं दिव्यं विमानं गरुडध्वजं॥ आरुह्य वि
ष्णुभक्तैस्तु समंतात्परिवारितः॥३४॥ वैकुंठं प्राविशल्लोकं पुनरावृत्तिवर्जितं॥ तत्र भुंजन्महाभोगान्स्वकर्मसमुपार्जि
तान्॥३५॥ उषित्वा क्षीणकर्मासौ ब्रह्मभूतोऽभवत्ततः॥ एवं पुरा महाराज कार्तवीर्योऽर्जुनो नृपः॥३६॥ स सद्वीपवतीं पृथ्वीं
पालयित्वा च धर्मतः॥ षडशीति सहस्राणामंतेब्दानां विधेर्बलात्॥३७॥ जामदग्न्येन रामेण विरुद्ध समगात्परं॥ कृत्वा
तु समहद्युद्धं सर्वलोकस्य पश्यतः॥ रामेण निहतः संख्ये गतः परमिकां गतिं॥ ततोद्विग्नमभूत्सर्वं जगत्स्थावरजंगमं॥३९
प्रतिश्रोता महानद्यश्च पृथुभुमर्करालयः॥ ज्योतींषि निभशंकेतेन्व चालसुतरां मही॥४०॥ प्रकीर्णावयवं भूमौ पतितं राजकुंज
रं॥ कनकेरमिव शैलेंद्रं वज्राघातनिनिवारितं॥ राज्ञो विनिहतस्याजौ प्रहारं प्रसमिष्यतः॥ संस्य शोणितत्वतीक्ष्णांशुर्बभूवार
णितच्छविः॥४२॥ एतस्मिन्नेव काले तु भृगुवर्यो महामनाः॥ मुदा परमया पेतो विशश्राम रणात्क्षणं॥४३॥ अथ तं समु
पागम्य सहसाहोस्य सारथिः॥ अभ्यनंदद्भलीतात्मा दिष्ट्या दिष्ट्येति सादरं॥४४॥ नैव शक्योऽर्जुनो जेतुं समरे रिपुदुर्ज
यः॥ सत्वया निहतो युद्धे सिंहेनेव महाद्विपः॥ एवं संभाव्यमानस्तु स्ववयस्येन धीमता॥ सहसं कथयंनास्ते मुहूर्तमि
व तेन सः॥४६॥ ततस्तौ रथमारुह्य मुदा परमया युतौ॥ अस्तं दिनकरे चक्रे स्वावासं प्रतिजग्मतुः॥४७॥ तत्र गत्वा महा
राज जामदग्न्यो महामुनिः॥ अकृतव्रणसंयुक्तो मुनिभिश्च तथापरैः॥ कृत्वा चावश्यकं कर्म यथावत्कृतसंविधः॥ राजन्नै
षीद्रजनीं मुदितात्मा यथासुखं॥४९॥ अथोषस्युदिते सूर्ये राजपुत्रा बलान्विताः॥ निर्ययुर्नगरात्क्रुद्धाः पितृव्यसन
कर्षिताः॥ तेपि पंच रथोदाराः शूरसेनादयो नृपाः॥ गच्छतस्तान्समाभाव्य वागुवाचाशरीरिणी॥५१॥ भो राजपुत्राः
श्रृणुत रामेण सह विग्रहः॥ भवद्भिर्न च कर्तव्यो यदि वोस्ति जिजीविषा॥५२॥ अस्य पूर्वं पितुर्होमधेनुवत्सकृतेस्वयुष्मत्पिता
वो निहतो तेन पूर्यतिमनुगच्छत॥५३॥ होमधेनोस्ततो वत्सं प्रदायास्मै महात्मने॥ व्रजध्वं प्रणतिं येन प्रशमं सोपि यास्यति॥५४॥

॥ इतिश्रीब्रह्मांडपुराणेमध्यमभागेअशीतितमोध्यायः॥ ८०॥ ॥७॥ वसिष्ठउ॰ इतिश्रुत्वाकान्तावाणींभीताःशोकसु
तारणात॥निवर्त्यसैनांनगरीविविशुर्नृपनंदनः॥ १॥ रामोथावश्यकंकर्मकृत्वारुह्यरथंस्वयं॥सचापेषुकरस्तूणमिद
माह्वाकृतव्रणं॥ २॥ गच्छमाद्यिष्मतीराजपुत्रेभ्योब्रूहिमद्वचः॥निर्याध्वमथयुध्धायनगरात्सहसैनिकाः॥३॥ मद्बाण
विगतप्राणाःपितरस्त्वानुगच्छत॥ हास्यध्वंतत्सर्वकर्धेनोर्यद्दिवोस्मिजिघांविषा॥४॥ इत्युक्त्वातत्रवसितंविज्ञायाखि
लमेवतु॥आगच्छतांवायुध्धायगोवत्संवासमानय॥५॥इत्युक्तोभृगुवीरेणसंप्रतस्थेकृतव्रणः॥तमायांतंद्विज
श्रेष्ठंदृष्ट्वातेराजनंदनाः॥६॥अभ्युत्थायार्घपाद्याद्यैःसमभ्यर्च्यासनमानयत॥अथागमनजंहेतुंपप्रच्छुर्नृप
नंदनाः॥ ७॥ अकृतव्रणउ॰ ॥ दूतोहामदग्न्यस्यमत्तःशृणुतयद्वचः॥युध्यध्वंयुधिचागत्यावथवावत्संप्रदीयतां॥ ८॥इति
तद्वचनंश्रुत्वाप्रोचुःशूरास्तेनृपाः॥युद्धेयोधयितुंरामोनशक्योस्माभिरेवहि॥९॥तस्मात्तद्द्वित्रिदेवानमस्माकंमकृतव्रणं॥
गोवत्सोनीयतामेषसांत्वयेनंद्विजोत्तमं॥१०॥ तथेत्यादायगोवत्संतैर्दत्तमकृतव्रणः॥आगत्यास्माखिलंतस्मैरामायन्यवे
दयत॥११॥गोवत्संचापिसंप्राप्यरामोमतिमतांवरः॥निरूप्यमनसाभूयःप्राहेदमकृतव्रणं॥१२॥गत्वाप्रापयगोवत्संपित
रंमेमहामते॥यथास्याकर्मणांहानिस्तस्यनेतःप्रभृत्यपि॥१३॥अहंयथाप्रतिश्रुत्यशस्त्रजातमशेषतः॥उत्साद्यशीघ्रंपि
तरावागमिष्यामिसंशयः॥१४॥यावदागमनंमह्यंतावत्पित्रोर्यथासुखं॥प्रवर्तस्वाश्रमेविद्वन्संनिवेश्यथायथं॥अनास
दिप्रतिस्तस्त्वंनैष्यमत्तुरुषांतिकं॥गमिष्यामीतिमन्येहंकिंवातेत्रविवक्षितं॥१६॥इतितस्यवचःश्रुत्वाप्राहेदमकृतव्रणः॥
असाध्विदमहंमन्येयत्त्वव्यवसितंविभो॥१७॥क्षत्रियानापराध्यंतेभवतःसर्वएवहि॥निहतस्तुपितायेनतेसर्वेनिहृ
तास्त्वया॥१८॥ सर्वक्षत्रवधंकर्तुमिदानींनत्वमर्हसि॥ इथाद्विवारहत्याया दोषःसंजायतेमहान॥१९॥ भूयोपियद्येत्
कश्चिद्दोषःक्षत्रिआत्मनः॥दर्शयिष्यतितान्सर्वान्हनिष्यतितदारणे॥२०॥तस्मादद्यमहाबाहोभवद्दर्शनकांक्षिणो
॥पितरावर्हसिद्रष्टुंनात्रकार्याविचारणा॥२१॥इतितस्यवचःश्रुत्वामुदापरमयायुतः॥आययावश्रमंपित्रोरकृतव्रण
संयुतः॥२२॥तौनिवेद्यचगोवत्संयथावच्चाभ्यवादतां॥यावत्तौदंपतीहृष्टौवाग्भिःप्रत्यनंदतां॥२३॥उत्थायतौ

परिष्वज्यमूर्ध्न्याघ्रायपितुर्मुदं॥ततस्तदंतिकेरामआसीनस्वाच्चेष्टितं॥२४॥दृष्टस्ताभ्यांयथावृत्तमान्वख्योभृगुसत्तमः॥
जमदग्नितत्सर्वंश्रुत्वातस्यविचेष्टितं॥नाखिद्यतपुरापित्रामार्कंडेयरवश्रुतेः॥ततोरामोमुदाराजन्नकृतव्रणसंयुतः॥२६॥
सुश्रूषयामुदंपित्रोःकुर्वन्नासीत्तदाश्रमे॥जामदग्न्येनरामेणप्रसह्यरणमूर्धनि॥२७॥सानुगेनिधनंनीतेसार्वभौमेर्जुने
नृपे॥अनाथासापुरीराजन्दुःखशोकपरायणा॥नष्टश्रीभागतश्रीकाप्यासीदसभर्तृका॥ततःप्रकृतयःसर्वाराज्ये
राजकभीरवः॥२९॥ज्यायांसमजनीपंचशूरंराजानमार्जुनिं॥ब्रतैरनैकान्यमैःकार्तवीर्येणियःपुरा॥३०॥अलभ्यतात्मज
तंचधर्मेणापालयत्प्रजाः॥एकदाजमदग्निस्तुराममाहकृतांजलिं॥३१॥क्षत्रहत्याभिभूतस्त्वंप्रायश्चित्तंसमाचर॥इत्युक्तः
प्रययावाशुपितरावभिवाद्यच॥३२॥महेंद्राचलमासाद्यतपस्तेपेसुदुष्करं॥ ॥इतिश्रीब्रह्मांडपुराणेमध्यमखंडेएकाशीतित
मोध्यायः ८१ ॥ ॥वसिष्ठउ॰ततःकदाचिद्धूर्त्यासचतुरंगबलान्वितः॥मृगयामगमच्छूरःसूरसेनादिभिःसह॥१॥तेप्र
विश्यमहारण्यंहत्वाबहुविधान्मृगान्॥जग्मुस्तृष्णार्तामध्यान्हेसरितंनर्मदातटे॥२॥तत्रस्नात्वाचपीत्वाचवारिवीत
परिश्रमाः॥गच्छंतोददृशुःमार्गेजामदग्न्यस्याश्रमं॥दृष्ट्वाश्रमंपरंरम्यंआगतोमुनिपुंगवान्॥कस्येदमितिपप्रच्छुर्भा
विकर्मप्रचोदिता॥४॥तेप्रोचुरितिशांतात्माजमदग्निर्महातपाः॥वसत्यस्मिन्सुतोयस्यरामःशस्त्रभृतांवरः॥५॥तच्छ्रु
त्वानिवभूतेषांरामनामानुकीर्तनात॥क्रोधःप्रसह्यान्वसंस्यंपूर्ववैरमनुस्मरन॥६॥अथतेप्रोचुरन्योन्यपितृहंतु
र्वधात्पितुः॥वैराग्निर्यातनंकिंतुकरिष्यामोरथाधुना॥७॥इत्युक्त्वास्वदृष्टस्तेसंप्रविश्यतदाश्रमं॥प्रजघ्नुरेवक्रो
धात्सुमुनिर्वारिषुसर्वतः॥८॥तंहत्वास्याशिरोहृत्वानिषादाइवनिर्दयाः॥प्रययुस्तेदुरात्मानःसबलास्वांपुरींप्रति
॥९॥पुत्रास्तस्यादुरात्मानोदृष्ट्वास्वपितरंहतं॥परिवार्यमहाराजरुरुदुःशोककर्षिताः॥१०॥भर्तारंपतितंभूमौपति
तंवीक्ष्यरेणुका॥पपातमूर्छितासद्योलवेवाग्निनिस्रुत॥११॥सातुचेतसिसंमूर्छाशोकपावकदाहिता॥दूरप्रवासा
संतीवसद्यःप्राणैर्व्ययुज्यत॥१२॥प्रनाहभत्यातस्मातुसंतांमातरितेपुनः॥न्यपततमूर्छिताभूमौनिमग्नाःशोकसा
गरे॥१३॥ततस्तपोधनायेन्येतत्तपोवनवासिनः॥समेत्याश्वासयामासुस्तुल्यदुःखास्तुतान्मुनीन॥१४॥सत्वा

मानामुनिगणैर्नामदग्न्याय यथाविधि॥ प्रचक्रुर्दहनं यास्तेषां मग्नो पित्रोः कलेवरं॥ २५॥ तस्करैश्च न मूर्द्धं च यत्कर्तव्यमनं
तरं॥ पित्रोर्मरणदुःखेन पीड्यमानादिवानिशं॥ २६॥ ततः काले गते रामः मासानां द्वादशावधौ॥ निवृत्तस्तपसः खे
न पीड्य संख्यापद्माश्रमं॥ २७॥ ॥ इति श्रीब्रह्मांडपुराणे मध्यमखंडे द्व्यशीतितमोध्यायः ८२ ॥ ४॥ वसिष्ठउ
स गच्छन्पथि शुश्राव मुनिभिस्तत्र मादितः॥ राजपुत्रव्यवसितं पित्रोः सर्गतिमेव च॥ १॥ पितुः सनीचयं हृत्वाग्निरो
हरणमेव च॥ तन्मर्तैरेव मरणं श्रुत्वा मातुश्च केवलं॥ २॥ विललापमहाबाहुः दुःखशोकसमन्वितः॥ तमथाश्वा
सयामास तुल्यदुःखोकृतव्रणः॥ ३॥ हेतुभिः शास्त्रनिर्दिष्टैर्विधिसामर्थ्यसूचकैः॥ युक्तिलौकिकदृष्टांते सतः शोकं व्य
नाशयत॥ ४॥ सांत्वितस्तेन मेधावी धृतिमालंब्य भार्गवः॥ प्रययौ संहितः संख्या भ्रातृणां तदिदृक्षया॥ स तान्दृष्ट्वाभिवा
द्यैतान दुःखशोकपरिप्लुतः॥ शोकामर्षयुतस्तेश्च सहतस्थौ दिनत्रयं॥ ६॥ ततोस्य शमदान् क्रुद्धः स्मरतो निधनं पितुः॥ बभू
वत्यदृसा सर्वलोकसंहरणक्षमः॥ ७॥ मातुरर्थे क्षतां पूर्वं प्रतिज्ञां स स सागरः॥ हृद्धं चकार हृदये सर्वक्षत्रवधोद्यतः॥
॥८॥ क्षत्रवंश्यानशेषांस्तु हत्वा तद्रक्तलोहिते॥ करिष्ये तर्पणं पित्रोरिति निश्चित्य भार्गवः॥ ९॥ भ्रातॄणां चैव सर्वेषामा
ख्याय स्वसमाहितः॥ प्रययौ तदनुज्ञातः क्षत्त्वा त्वकृपितक्रिया॥ भ्रवृतव्रणसंयुक्तः प्राप्य माहिष्मतीं पुनः॥ तद्वाह्यो
पवने स्थित्वा सस्मार स महोदरं॥ ११॥ स तस्मिन्रथश्चाप्यथ सहसा हि समन्विते॥ प्रेषयामास रामे तु सर्वसंवाहनानि च
रामोपि रथमारुह्य सन्नद्धः सशरं धनुः॥ ग्रहीत्वा पूरयन् शंखं रुद्ध्वत्तममित्रतितत॥ १३॥ ज्याघोषं च चकारोच्चैः रोदसी
कंपयन्निव॥ सहसा क्षोत्यस्य रथं चक्रे सारथिनां वरः॥ १४॥ रथज्यशंखनादैस्तैः त्रैलोक्यभयदायिभिः॥ तस्याभून्न
गरीसर्वा संभ्रमाश्च नराधिपा॥ १५॥ राममागतमाज्ञाय सर्वक्षत्रकुलांतकं॥ सक्षुब्धाश्चक्रुरुद्योगं संग्रामायन्नपात्म
जा॥ अथ पंचरथोदारा समरसेना द्यौन्नृप॥ रामेण योद्धुं सहसा राजभिश्च कुरूद्वहं॥ १७॥ चतुरंगबलोपेता ततस्ते
क्षत्रियर्षभा॥ राममासादयामासुः पतंगा इव पावकं॥ १८॥ निवार्यतानापततो रथेनैकेन भार्गवः॥ युयुधे पार्थिवैः

सर्वैः समरेमितविक्रमः॥ १९॥ ततः पुनरभूद्युद्धं रामस्य सह राजभिः॥ जघान क्षत्रसंक्षोभो राशीं क्षतमुदारधीः॥ २०
ततः स समरे सेनादान हत्वा सर्वस्ववाहनान॥ क्रमेण क्षत्रियामासा क्षितौ क्षत्रियमंगलं॥ ततस्ते भग्नसंकुर्याद्धताश्च
बलवाहनाः॥ हतशिष्टा नृपतयो दुद्रुवुः सर्वतोदिशां॥ २२॥ एवं विद्राव्य सैन्यानि हत्वा जित्वा च संयुगे॥ जघान शत
शोन्ताः भृगुरोरवरोरिहा॥ २३॥ स तत्क्रोधपरीतात्मा दग्धकामोखिलं पुरा॥ तदुदार न भार्गवास्त्रं कालाग्निसदृ
शमभं॥ २४॥ ज्वालाकवलिताशेषपुरमाकारमालिनी॥ पुरीसहस्त्यश्वरथां सहदाह स पावकः॥ २५॥ दह्यमाने पुरे दृ
ष्ट्वा प्राणत्राणपरायणाः॥ जीवनाशा जगाना शत्याति दीर्घा भयातुराः॥ २६॥ अस्त्राग्निना पुरीं दग्ध्वा हत्वा च सर्वपार्थि
वान॥ त्रासमाणो खिलं लोकं साक्षात्कालइवांतकः॥ २७॥ अवृतव्रणसंयुक्तः सहसा दीनचाभिभूः॥ जगाम रथघो
षेण कंपयन्निव मेदिनीं॥ २८॥ विनिघ्नन् क्षत्रियान्सर्वान् विषयेषु पृथक्पृथक्॥ वर्षद्वयेन पृथिवी चक्रे निःक्षत्रियां र
षा॥ निःशेषेण नृपान्सर्वान्संसाध्य पृथिवीतले॥ महेंद्राद्रिं ययौ रामः तपसि धृतमानसः॥ ३०॥ तस्मिन् वर्षचतुःषष्टिं
यावत्स्वपसमुद्भवं॥ प्रतीक्ष भूयः सा द्वल्येवद्धदीक्षो तपंतपः॥ ३१॥ क्षत्रक्षेत्रेषु भूयाः क्षत्रमुत्पादितं द्विजैः॥ नि
जघान पुनर्भूमौ रामो रोद्राः सरस्वराः॥ ३२॥ वर्षद्वयेन भूयोपि कृत्वा निःक्षत्रियां महीं॥ षट्चतुःस्य वर्षाणि तपस्ते
पे पुनश्च सः॥ ३३॥ भूयोपि राजन संवर्धं क्षत्रमुत्पादितं द्विजैः॥ जगाम भूयो निःशेषं साक्षात्कालइवांतकः॥ ३४॥
कालेन तावता भूयः समुत्पन्नं नृपात्मकं॥ निश्चचार पृथिवी वर्षद्वयमनारतं॥ ३५॥ राम रामेण राजेंद्र स्मरतां नि
धनं पितुः॥ त दात्रिः सस कृत्वस्तु पृथ्वी निःक्षत्रियाकृता॥ ३६॥ त्रिःसप्तकृत्वस्तन्माता यदुरः स मताडयत॥ ता
वद्रामेण तस्मात्तु क्षत्रमुत्सादितं भुवि॥ ३७॥ ॥ इति श्रीब्रह्मांडपुराणे मध्यमखंडे त्र्यशीतितमोध्यायः ८३
वसिष्ठउ॰ ततो मूर्द्धाभिषिक्तानां राज्ञाममिततेजसां॥ षट्सहस्रद्वयं रामो जीवग्राहं गृहीतवान॥ १॥ ततो राज्ञा
स हस्त्राणि संगृह्य मुनिभिः सह॥ प्रजगाम महातेजा कुरुक्षेत्रं तपोवनं॥ २॥ स रसां पंच कृत्वा तत्र स्थापयित्वा भृगूद्वहः
सुखावरोहतीर्थानि तानि चक्रे समंततः॥ ३॥ जघान तत्र वै राज्ञः शरीरप्रभयास्रजा॥ सरांसि तानि वै पंच पूर्य

DR. BHAU DAJI MEMORIAL

ब्रह्मां उ पु॰

२७

यामास भार्गवः॥ ४॥ सांत्वतेन यथान्यायं जामदग्न्यः प्रतापवान्॥ पितॄन्संतर्पयामास यथाशास्त्रमतंद्रितः॥ ५॥
ब्राह्मणैः सद्मानस्थस्तत्र चक्रे रथोद्दितं॥ एवं तीर्णप्रतिज्ञास कुरुक्षेत्रे तपोवने॥ ६॥ उवास निद्रतः सम्यक् पितृपूजा
परायणः॥ ततः प्रभृत्यभूद्राजातीर्थानामुत्तमोत्तमं॥ ७॥ विहितं जामदग्न्येन कुरुक्षेत्रे तिपावने॥ स्यमंतकपंचमि
ति ख्यातं त्रैलोक्यविश्रुतं॥ सर्वपापक्षयकरं महापुण्योपबृंहितं॥ मर्त्यानां यत्र यातानामेनांसि निखिलानि तु॥ ९॥ दूरा
द्रैवापयास्यंति प्रवाते शुष्कपर्णवत्॥ स्यमंतपंचकं तीर्थं कुरुक्षेत्रे तिपावनं॥ १०॥ यत्र स्नातः सर्वतीर्थैः स्नातो भव
ति मानवः॥ कृतकृत्यस्ततो रामः सम्यक् पूर्णमनोरथः॥ ११॥ उवास तत्र नियतः किंचित्कालं महामतिः॥ तत्र संवत्सरे
स्यांते ब्राह्मणैः सहितो बली॥ १२॥ पितृपिंडप्रदानाय जामदग्न्यो गयामगात्॥ तत्र शैवं परं स्थानं रुद्रपादमिति श्रुतं
॥ १३॥ पितॄनुद्दिश्य सन्तर्पयामास ब्राह्मणान्॥ ददौ च विधिवत्पिंडं पितृभक्तिसमन्वितः॥ १४॥ अथ प्रीताः स्वपितरो
जमदग्निमुखास्तदा॥ ऊचुस्ते पितरः सर्वे पृष्ठामासाद्य तत्कृतां॥ १५॥ महत्कर्म कृतं वीर भवतान्यैः सुदुष्करं॥ अस्मान
पि यथान्यायं सम्यग्गार्पितवानसि॥ १६॥ प्रतरत्वां वीर हत्याया दोषो नाभिभवेत्ततः॥ वधाच्च विनिवर्तस्व क्षत्रियाणामतः
तः परं॥ १७॥ पितुर्नते पराध्यं तेन स्वतंत्रं यतो जगत्॥ तस्मान्निमित्तं मरणं पितुस्ते विहितं पुरा॥ १८॥ हंतुं कः समर्थः
स्याल्लोकं रक्षितुमेव च॥ अवंकर्मानुरूपं तु चेष्टते सर्व एव हि॥ १९॥ कालानुवर्ति बलवल्लोकेस्मिन्नात्र संशयः॥ बाधितुं
भुवि भूतानि भूतानां सविधिं विना॥ २०॥ शक्यं ते वत्स सर्वे श्रायतः स्वकृतभुजनः॥ क्षत्रं प्रति ततो रोषं विमुच्यास्मिन्प्रि
येच्छया॥ २१॥ शममाप्नुहि भद्रं ते शमान्नपरमं बलं॥ वसिष्ठ उ०॥ इत्युक्त्वांतर्दधुः सर्वे पितरो भृगुनंदनं॥ स चा
पि तद्वचः श्रुत्वा सुकृतक्षणसंयुतः॥ २२॥ तसैव धृतसंकल्पो बभूव सुमहामनाः॥ ततश्च सर्वतीर्थेषु चक्रे स्नानमतंद्रि
तः॥ परिचक्राम पृथिवीं त्रिवारं भृगुनंदनः॥ ततः स पर्वतश्रेष्ठं महेंद्रं पुनरव्यथः॥ २४॥ जगाम ब्राह्मणैः सार्धं मुनि
सिद्धनिषेवितं॥ ततस्तेषामनुमतो मुनीनां भावितात्मनां॥ २५॥ हयमेधं महायज्ञं माहर्तुमुपचक्रमे॥ संभृत्य सर्वसं

भारान्तथो देवैः सहितो नृप॥ २६॥ विश्वामित्रभरद्वाजमार्कंडेयादिभिस्तथा॥ तेषामनुमते कृत्वा कश्यपं गुरुमात्म
नः॥ वाजिमेधं ततो राजन्नाजहार महाक्रतुं॥ तत्राभूत्कश्यपोऽध्वर्युरुद्गाता गौतमो मुनिः॥ २७॥ विश्वामित्रोऽभवद्धो
ता रामस्याविदितात्मनः॥ ब्रह्मत्वमकरोत्तस्य मार्कंडेयो महामुनिः॥ २९॥ भरद्वाजाग्निवेश्याद्यावेदवेदांगपारगाः॥
मुनयश्चक्रुरन्यानि कर्माण्यस्य यथायथं॥ ३०॥ भृगुः सदस्यमकरोत्सशिष्यो त्याद्विजैः सह॥ ब्राह्मणं पूजयामा
स यथावद्भृगुनंदनः॥ ३१॥ अलंकृत्य यथान्यायं कन्यां रूपवतीं महीं॥ कश्यपाय ददौ सर्वां मतेतं शैलमुत्तमं॥ ३२
आत्मनस्तु निवासार्थं तं रामः पर्यकल्पयत्॥ ततः प्रभृति राजेंद्र काश्यपीति वसुंधरा॥ ३३॥ स्ततोन्यांस्तर्पयामास
यथावत्सत्कृतान्द्विजान्॥ ददौ तेषामनुमते सदस्याग्र्यार्हणां भृगोः॥ ३४॥ सदस्यानपि राजेंद्र पूजयामास शास्त्रत
ः॥ हिरण्यरत्नवस्त्राश्वगोगजाजाविभिस्तथा॥ ३५॥ एवं समाप्य यज्ञं तं यथावदवभृथाप्लुतः॥ चक्रे द्रव्यपरित्यागं
तेषामनुमते तदा॥ ३६॥ दत्वा च सर्वभूतानामभयं भृगुपुंगवः॥ तत्रैव पर्वतश्रेष्ठे तपश्चर्तुं समारभत्॥ ३७॥ ततस्तं
समनुज्ञाप्य सदस्याः सद्विजास्तथा॥ ययुर्यथागतं सर्वे मुनयः संशितव्रताः॥ ३८॥ गतेषु भगवांस्तेषु सुकृतव्रणसंयु
तः॥ तपो महत्समास्थाय तत्रैवान्यवसत्सुधीः॥ ३९॥ इत्येष जामदग्न्यस्य प्रादुर्भावउदाहृतः॥ यस्मिंत्राते नरः सर्वैः
पातकैर्विप्रमुच्यते॥ प्रभावः कार्तवीर्यस्य लोके वामततेजसः॥ प्रसंगात्कथितः सम्यक् सोतिहासः सविस्तरः॥ ४१॥
दत्तात्रेयाद्वरं प्राप्य मृतो रामद्वारा हतः॥ तस्यासीत्प्रथमः पुत्रः प्रख्यातो यो जयध्वजः॥ ४२॥ पुत्रस्तस्य महाबाहुस्ता
लजंघोऽभवन्नतः॥ अभूत्तस्यापि पुत्राणां शतमुत्तमधन्विनां॥ ४३॥ तालजंघाभिधं तेषु वीतिहोत्रोऽग्रजोऽभवत्॥
युतः सर्वातिहोत्राद्यैर्हिमाद्रोन्यवसच्चिरं॥ ४४॥ यः पूर्वं रामबाणेन द्रुतवत्सोभिघातितः॥ तालजंघो पतद्भूमौ
स्थितो गादवे दनः॥ ४५॥ स निर्विश्य पुरीं भूयो राज्यं स्वं प्रत्यपद्यत॥ सोऽभ्यायायोमहाराज तालजंघः पुरीं तव॥ ४६
चतुरंगबलोपेतः कंपयन्निव मेदिनीं॥ अयोध्यातो विनिष्क्रम्य कर्णोऽन्त्र स्तुते पिता॥ युद्धं कृत्वा महाबाहुः शूलायनपरो
भवत्॥ त्यक्त्वा राज्यं बलं कोशं नगरं सर्ववाहनं॥ ४८॥ अंतर्वत्न्या च तन्मात्रा सहितो वनमाविशत्॥ शोकामर्षपरीता

त्मा स्वर्गलोकमितो गतः ॥४९॥ तदा ते जननी राजन्ननुयातुं मनो दधे ॥ और्वो मुनिवरो ज्ञात्वा गुर्विणीं तां महासतीं ॥५०॥ न
मर्तव्यं त्वया राज्ञी वारयन्निदमब्रवीत ॥ पुत्रस्ते जठरे भद्रे इति श्रुत्वा मनस्विनी ॥५१॥ विरराम मृते तां तु मुनिः स्वाश्रममा
नयत ॥ ततः सा सर्वदुःखानि नियम्य तन्मुखांबुजं ॥ दिदृक्षुराश्रमोपांते तस्यैव न्यवसत्सुखं ॥ सुसाव च ततः काले सा
त्वामौर्वाश्रमे स्थिता ॥५३॥ जातकर्मादिकं सर्वं भवतः सोकरोन्मुनिः ॥ और्वाश्रमे विवृद्धस्त्वं भवांस्तेनानुकंपितः ॥ तवै
तद्विदितं सर्वमतः परमरिंदम ॥ एवंप्रभावो नृपतिः कार्तवीर्यो भवद्भुवि ॥५५॥ यदंगजैर्जितो युधि पिता ते वनमाविशत
॥ तद्वृत्तांतमशेषेण मया ते समुदीरितः ॥५६॥ एतच्च सर्वमाख्यातं व्रतानामुत्तमं व्रतं ॥ रामार्जुनव्रतं ख्यातं सर्वकामफ
लप्रदं ॥५७॥ जैमिनिरु० ततः स सगरो राजा कृतांजलिपुटो मुनिं ॥ उवाच भगवन्नेतच्छ्रोतुमिच्छाम्यहं व्रतं ॥५८॥ इत्यु
क्तस्तेन राज्ञा तु दीक्षां चक्रे तदा मुनिः ॥ स दीक्षितो वसिष्ठेन सगरो राजसत्तमः ॥५९॥ द्रव्याण्यानीय विधिवत्प्रच
चार शुभं व्रतं ॥ पूजयित्वा जगन्नाथं विधिनोक्तेन पार्थिवः ॥ समाप्य च यथायोगमनुज्ञाप्य गुरुं ततः ॥ प्रतिज्ञामकरोद्रा
ज्ञा व्रतस्य करणं प्रति ॥६१॥ आजीवांतं करिष्यामि यत्नेनेति महामतिः ॥ अथानुज्ञाप्य राजानं वसिष्ठो भगवानृ
षिः ॥ स निर्वर्त्यानुगम्यं तं प्रजगाम निजाश्रमं ॥६३॥ ॥ इति श्रीब्रह्मांडपुराणे मध्यमभागे चतुरशीतितमो
ध्यायः ॥८४॥ ॥छ॥ इति जामदग्निचरितं समाप्तं ॥ ॥ जैमिनिरुवाच ॥ गते तस्मिन्मुनिवरे सगरो राजसत्त
मः ॥ अयोध्यायामधिवसन्पालयामास मेदिनीं ॥१॥ सम्यक्सर्वगुणोपेतः सर्वतत्त्वार्थधर्मवित ॥ वयसैव
स बालोभूत्कर्मणा भून्महत्तरः ॥२॥ तथापि न दिवा भुंक्ते शेते चापि निशि निर्वृतः ॥ स दीर्घं निश्वसन्नुष्णमुद्विग्न
हृदयो निशं ॥३॥ श्रुत्वा राजा स्वराज्येन्न गुरुमवजित्यारिभिः संगृहीतं मंत्रैः सार्धं प्रयोक्तं वनमतिगहनं स्वग
तं तं च तस्मिन् ॥ शोकाविष्टः सरोषः सकलरिपुकुलोच्छित्तियत्नस्समक्षं चक्रे सो तां प्रतिज्ञां परिभवमनलं सोढुमिच्छा
कुर्वन्नुः ॥४॥ स कदाचिन्महीपालः कृतकौतुकमंगलः ॥ रिपूञ्जेतुं मनश्चक्रे दिदेशासकलान्क्रमात ॥५॥ अनेक

रथाश्वगजैर्निश्चक्राम पुरोत्तमात ॥ जिगीषुः पुरि दिशो राजा राज्ञोपस्याभियास्यति ॥६॥ विषयं स नृपस्तस्य सद्यः
प्रणतिमेष्यति ॥ विजित्य नृपतीन्सर्वान्कृत्वा च स्ववशानुगान ॥७॥ संकेतगामिनः कांश्चित्कृत्वा राज्ञोन्यवर्तयत ॥
एवं संविचरन्दिक्षु दक्षिणाभिमुखो नृपः ॥ स्मरन्पूर्वकृतं वैरं हैहयानभ्यवर्तत ॥ ततस्तस्य नृपैः सार्धं समग्र
रथकुंजरैः ॥९॥ बभूव हैहयैर्वीरैः संग्रामो रोमहर्षणः ॥ रात्रौ यत्र सहस्राणि सबलानि महाहवे ॥१०॥ निज
घान महाबाहुः संक्रुद्धः कोसलेश्वरः ॥ विजित्य च नृपान्सर्वान्नृक्षान्दग्ध्वा च तत्पुरीं ॥११॥ संग्रामबलसंमर्दप्र
णष्टाशेषभूतलं ॥ हैहयानामशेषं तं चकार ममतः परं ॥१२॥ राज्यं पुरीं चापहाय त्र्यष्टैश्वर्यहृतद्विषः ॥ राज्ञा
नोत्तृतभूयिष्ठा व्यद्रवंत समंततः ॥१३॥ विजित्य हैहयान्सर्वान्समरे सगरो बली ॥ संक्षुब्धसागराकारः कांबोजानभ्य
वर्तत ॥१४॥ नानावादित्रघोषोद्धतपटहरवाकर्णविध्वस्तबंधाः ॥ सद्यः संत्यक्तराज्यं स्वबलपरमुखापोरसंघाविमूढाः
कांबोजास्तालजंघाः शकयवनखसाः आकिरातादयश्च ॥ सार्कं सर्वैर्द्विषद्भिर्मुदितरिपुशारिपवोयस्य मूर्धापराधात ॥१६
तालजंघांस्ततो हत्वा राजा सबलवाहनान ॥ क्रमेण नाशयामास तद्राज्यमरिकर्षणः ॥१७॥ ततो जघान रोषेण पल्हवा
न्यावज्ञानपि ॥ हन्यमानास्ततः सर्वे दुद्रुवुः सर्वतोदिशं ॥१८॥ वसिष्ठाश्रममागत्य प्रोचुर्बद्धकरा गिरः ॥ शरणं भव नो ब्रह्म
न्नार्तानां शरणैषिणां ॥१९॥ सगरास्त्राग्निनिर्दग्धशरीराणां मुमूर्षतां ॥ विसृज्य राज्यभोगार्थदारपौत्रस्वबांधवान ॥
२०॥ केवलं प्राणरक्षार्थं त्वां वयं शरणं गताः ॥ त्वं कृपाकर्न्नियमभुवोरागांकुलगुरुर्द्दतः ॥२१॥ तस्मादस्मन्महाभाग परित्रातुं
त्वमर्हसि ॥ जैमिनिरुवाच ॥ इति तेषां वचः श्रुत्वा वसिष्ठो भगवानृषिः ॥ शनैर्विलोकयामास शरणं समुपागतान ॥२२
दृष्ट्वा तत्प्यद्भगवान्सर्वभूतानुकंपकः ॥ चिरं निरूप्य मनसा तां विलोक्य चैषु से सादरं ॥२३॥ उज्जीवयच्छनैर्वाचा माभैष्टेति
महामतिः ॥ गत्वाथ सांत्वयामास स्वयाज्यं सगरं मुनिः ॥२४॥ स क्रोधोपि महर्षीणां गुरुवचः संभावयंस्तान रान्यथमरख
स्वकुलोचितस्य च तथा वेषस्य संत्यागतः ॥ श्रौतस्मार्तविहीनकर्मनिरतान्विप्रैस्त्वरूपोज्झितान् सास्त्रं केवलमत्यजं
तसमर्थेर्नैकैकशः पार्थिवान ॥२५॥ पार्थिवान्मुक्तकेशांश्च मुक्तकक्षांस्तु पारदान ॥ अर्धमुंडाञ्छकांश्चक्रे पन्हवान्श्म

श्रधारिणः ॥२६॥ यवनान्विगतश्मश्रून्कांबोजांश्चिकुरान्वितान् ॥ ततस्तेरिपवस्तस्य त्यक्त्वाचारलक्षणान् ॥२७॥ आत्यतांसम
नुग्रामाः सर्वे च वर्णाबिनिंदिताः ॥ धिग्जातासतनंसर्वेनिग्रांसनिरपत्रपा ॥२८॥ कूराश्च सादूसाल्लोके बभूवुर्म्लेंछजातयः ॥ मुक्त
स्तेनाथराज्ञा सकलबलकिरातादयः सद्यएवत्यक्तः स्वाचारवेषागिरिगहनगुहाश्रयाः संबभूवुः ॥ तेषामद्यापिसद्भिः
सततमपगताज्ञातयो यत प्रवृत्ता वर्ततेदृष्टचेष्टा जगति नरपतेः पालयंतः प्रतिज्ञां ॥२९॥ ॥इतिश्रीब्रह्मांडपुराणेम
ध्यमभागे पंचाशीतितमोध्यायः ॥८५॥ ॥जैमिनिरु० ॥ अथानुज्ञाय सगरो वसिष्ठमृषिसत्तमं ॥ बलेन महता
युक्तो विदर्भानभ्यवर्तत ॥१॥ ततो विदर्भराड्दूत स्तस्य कृतांप्रीतिपूर्वकः ॥ कौशिन्याख्यामपर्णभूतामयनचान्यवेदयत
॥२॥ सतस्यराजशार्दूलो विधिवद्वह्निसाक्षिकं ॥ शुभे मुहूर्ते कौशिन्यापाणिंजग्राहभूमिपः ॥३॥ स्थित्वादिनानिकति
चितस्तेतस्यातिसत्कृतः ॥ विदर्भराज्ञामंत्र्य ततो गंतुं प्रचक्रमे ॥४॥ अनुज्ञातस्ततस्तेन पारिबर्हैश्च सत्कृतः ॥ धनौ
घेस्तर्पितश्चैव मथुरायाविनिर्ययौ ॥५॥ एवं ससगरो राजा विजित्य वसुधामिमां ॥ करदांस्तन्नृपान्सर्वांश्चक्रे संकेत
गानपि ॥६॥ ततो बलेन संयुक्तः शनैर्देशानपीडयन् ॥ पूजितस्तत्रतत्रत्यैरयोध्यां पुनरागमत् ॥७॥ तदासान
गरीसर्वाकृतकौतुकमंगला ॥ समुच्छ्रितध्वजशतापताकाभिरलंकृता ॥ सिक्तसंमृष्टभूतांगापूर्णकुंभशतावृता
॥ सद्रत्नतोरणोत्तुंगदेवतागृहमालिनी ॥९॥ दिक्चक्रयमिनोराज्ञः संदर्शनमुदान्वितैः ॥ पौरजानपदैर्हृष्टैः स
र्वतः समलंकृता ॥१०॥ ततः प्रकृतयः सर्वे तथांतःपुरवासिनः ॥ अभ्युद्ययुर्नृपं सर्वे वारस्त्रीभिः समन्विताः ११
संतैः समेत्य नृपतिर्लब्ध्वाशीर्वादसत्क्रियः ॥ आनंदयन्प्रजा वेदघोषैर्विप्रैः स्तनंदितः ॥१२॥ जयशब्दैः स्तू
यमानः सूतमागधवंदिभिः ॥ पुरीमयोध्यामविशत्स्वर्द्दश्रीमदलंकृतं ॥१३॥ पर्यंकस्थांस्वजननीं मूर्ध्नाधोभु
विसोनमत् ॥ ससंभ्रमं समुत्थाप्य पुत्रस्नेहपरिप्लुतैः ॥१४॥ दूर्वाक्षतमिश्रैराज्ञानं प्रश्रवैरभ्यषिंचयत ॥ अनं
तरंतु तद्भार्ये केशिनी सुमतिस्तथा ॥१५॥ अभ्यवादयतां श्वश्रू न पादयोर्मुदिते शुभे ॥ श्वशुबेते गाढमाश्लिष्य न

क्षंनीन्मुखांबुजे ॥१६॥ हर्षगद्गदयावाचा आशीर्भिरभ्यनंदयुपागते ॥ सहसंकथयन्मात्रा ततस्थित्वा चिरादिव ॥१७॥ अनुज्ञात
स्तया राजा सभां गत्वासने स्थितः ॥ सेव्यमानो नराधीशो नानाजनपदेश्वरैः ॥१८॥ अचतिष्ठद्यथान्यायमनुमत्र
मुदारधीः ॥ स्वप्रभावर्जिताशेषवीरभूमंडलाधिपः ॥१९॥ एकातपत्रां पृथिवीमन्वशाद्वासवो यथा ॥ वसिष्ठो
भ्यागमत्तस्य राज्ञो गृहमथैकदा ॥२०॥ तमभ्युत्थायार्घपाद्याद्यैः संपूज्यासमर्पयत् ॥ प्रणनाम ततस्तस्मै गुरुभ
क्तिसमन्वितः ॥ आशीर्भिर्वर्धयित्वातं वसिष्ठः सगरं तदा ॥ आस्यतामिति होवाच सहसर्वैर्नरेश्वरैः ॥२२॥ कुश
लं ननु ते राजन् पुत्रेगात्रकलत्रके ॥ द्विष्यावविजित्य चाद्विषः पुनर्जीवान्विसर्जिताः ॥२३॥ हैहयांस्त्वां विनाजेतुं कः शक्नो
ति धरातले ॥ पूर्वापरान्विनिर्जित्य सर्वान्दिग्विजयेच्छया ॥२४॥ दक्षिणोत्तरगानेकस्त्वमित्याश्रवणं वने ॥ जैमिनिरु०
वसिष्ठेनैवमुक्तस्तु सगरस्त्वालजांधात्रित् ॥ कृतांजलिपुटो भूत्वा प्रत्युवाच महामुनिं ॥२५॥ कुशलं ते तु सर्वत्र महर्षेना
त्र संशयः ॥ कल्याणाभिमुखा सर्वा देवताश्चामुनानिशं ॥२६॥ भव्यं ध्यायति कल्याणं मनसा यस्य संततं ॥ तस्य
मे कथमुत्सर्गाः संभवंति महामुने ॥२७॥ भवतानुगृहीतोस्मि कृतार्थश्चाधुनाकृतः ॥ यन्मां दृष्टुमिहायातः स्व
यमेव भवान्गुरो ॥२८॥ भवत्प्रसादतः सर्वमन्ये प्राप्तमभीप्सितं ॥ अन्यथा ममकाशक्तिः शत्रून्हंतुं तथाविधा
न् ॥२९॥ अनुग्रही कुरुषे यत्त्वं यन्मेध्यवसितं भवान् ॥ फलमत्यमपि प्रीत्यै स्यादगस्यापिनोपितुः ॥३०॥ जैमिनिरु०
एवं संभावितः सम्यक्सगरेण महामुनिः ॥ अभ्यनुज्ञाय तं भूयः प्रजगामनिजाश्रमं ॥३१॥ वसिष्ठे प्रगते राजा बु
भुजे विषयानलं ॥ स्वमोतिः केशिनीचोभे रूपशीलगुणान्विते ॥ प्रियेमहिष्यौ तेतस्य चक्रतुः स्वेप्सितं रतं ॥ सचा
पितद्गुणोत्कर्षप्रीतात्मा च महीपतिः ॥३३॥ रममाणोयथाकामं सहताभ्यां पुरेवसत ॥ अन्येषां भुवि राज्ञां तु राज
श्लाघ्यो महानभूत् ॥३४॥ मुनेरिवाभवत्तस्य सगरस्य महात्मनः ॥ अलौपिधर्मः सततं यथाहरतिमानसं ॥३५
राज्ञः सास्यार्थकामौ तु न तथाविपुलावपि ॥ अलुब्धमानसोयं च भेजे धर्ममपीयतत ॥ तदर्थमेव राजेंद्र कामं च
पीडयत्तथा ॥३६॥ ॥ इतिश्रीब्रह्मांडपुराणे मध्यमखंडे षडशीतितमोध्यायः ८६ ॥ ॥ जैमिनिरुवाच ॥ ॥

एवंसराजावसिष्ठःपालयामासमेदिनीं॥ सप्तद्वीपवतींसम्यकसाक्षाद्धर्मइवापरः॥१॥ ब्राह्मणादींस्तथावर्णानस्वेस्वेधर्मे
पृथकपृथक॥ स्थापयित्वायथान्यायंररक्षावहितेंद्रियः॥२॥ प्रजाश्चसर्ववर्णेषुयथाश्रेष्ठानुवर्तिनः॥ वर्णाश्चैवानुलो
म्येनतद्वदर्थेषुसक्रमात॥३॥ नसतिष्ठविरेबालंमृत्युरभ्युपगच्छति॥ सर्ववर्णेषुभूपालोमहीतस्मिन्प्रशासति॥४॥
अनाश्रमीद्विजःकश्चिन्नबभूवतदाभुवि॥ प्रजानांसर्ववर्णेषुप्रारंभाफलदायिनः॥५॥ संचिन्त्यस्वापिकर्माणिप्रारभं
तेचमानवाः॥ पुरुषार्थोपपन्नानिकर्माणिचततोनृणां॥६॥ महोत्सवसमायुक्ताःपुरग्रामव्रजाकराः॥ अन्योन्यप्रिय
कामाश्चराजभक्तिसमन्विताः॥७॥ अनंदितोभिशस्तोवापरिद्रोव्याधितोपिवा॥ प्रजासुकश्चिल्लुब्धोवाक्षपणोवापिना
भवत॥८॥ जनापरगुणप्रीताःसत्संपर्काभिकांक्षिणः॥ गुरुषुप्रणतानित्यंसद्विद्याव्यसनाहताः॥९॥ परापवादभीता
श्वसस्त्रीकाधर्मतत्पराः॥ आस्तिकाःसर्वशोभूवन्प्रजास्तस्मिन्प्रशासति॥१०॥ एवंसुबाहुतनयःस्वप्रवेभोजितांमही
अंतकश्चमहाभागयथाकालानुवर्तितः॥११॥ तस्याप्रादजामंडलाधिपतिभिःसेवार्थमभ्यागतैःप्रख्यातोरूपरा
मैर्नृपशतेमूर्धाभिषिक्तैःपृथक॥ संविष्टैर्मणिविष्टरेपुनितरामध्यास्यमानामरैःशक्रस्येवविराजतेदिशिसभा
रत्नप्रभोद्भासितां॥१२॥ संकेताद्विषयांतराभ्युपगतामर्त्यैश्चभूपालदारूत्वासैन्यनिवेशनानिपतिताःपुर्यांपृथकपा
र्थिवाः॥ दूरंकांक्षितराजशासनतयानिःस्नापयंतोमुहुर्द्वारिस्थिरैःनरेश्वरायसकृच्चिरंपश्यंतिस्वांतःपुरात॥१३॥ तंदे
वान्यनरेंद्राणांकुमुटश्रेणिघर्षणात॥ जडीकृतौविराजेतेचरणौतस्यभूभुजः॥१४॥ एवंसराजधर्मेणभानुवं
शशिखामणिः॥ अनन्यशासनामुर्वीमभ्यनंदद्दरिंदमः॥१५॥ तस्यपालयतःपृथ्वींसगरस्यमहीपतेः॥ व्यती
युस्त्रीणिवर्षाणिसहस्राणिमहात्मनः॥१६॥ ततःसोचिंतयद्दृशोपुत्रहीनोहमित्यलं॥ प्रयांतिनूनमस्मत्तःपितरः
पिंडविप्लुताः॥१७॥ दुहियादपिसत्पुत्रेसंजातेपितरःकिल॥ प्रीत्याप्रयांतितद्देहंज्ञातकर्मक्रियोत्सुकाः॥१८॥ महता
सुकृतेनापिसंप्राप्तस्यादिवंकिल॥ अपुत्रस्यामराःस्वर्गद्वारंप्रछादयंतिहि॥१९॥ पितान्वलोकमुभयंस्वर्लोकंतत्पि
तामहाः॥ तृप्यंतिकिलसत्पुत्रेजातेवंशद्वयेपिच॥२०॥ इदंमत्पूर्वजैरेवासिंहासनमधिष्ठितं॥ अथापुत्रेणराज्यं

चपराधीनतामेष्यति॥२१॥ तस्मादौर्वाश्रममहंगत्वातंमुनिपुंगवं॥ प्रसादयिष्येपुत्रार्थंभार्याभ्यांसहितोधुवं॥२२॥
इतिसंचिंत्यमनसासगरोराजसत्तमः॥ समंत्रिप्रवरेराज्यंप्रतिष्ठाप्यनतोरणे॥२३॥ जगामरथमारुह्यभार्याभ्यां
सहितोवनं॥ सपुष्पितान्द्रुमान्पश्यञ्छृण्वन्वाचःपतत्रिणां॥२४॥ आश्रमंचौर्वतपसापवित्रंप्रविवेशह॥ सपू
र्वमात्मनासिक्तान्मात्रासंरोपितान्द्रुमान॥ पृथपुष्पफलोपेतान्विलोक्यमुदितोभवत॥ अथागत्याश्रमोपांतेम
हर्षेस्तस्यधामतः॥२६॥ धुर्यान्विश्रामयेत्याहयंतारमवनीपतिः॥ उत्तीर्यस्वरथाद्दीर्घंप्राणमच्छिरसान्नपः॥२७
॥भार्याभ्यांसहितःश्रीमानसप्रश्रयमुदारधीः॥ आशीर्भिरभिनंद्याथतमौर्वोमुनिपुंगवः॥२८॥ उपाविशोतितंप्रे
म्णासहताभ्यांसमाविशत॥ अर्घ्यपाद्यादिभिःसम्यकपूजयित्वामहामुनिः॥२९॥ आतिथ्येनचवन्येनसभार्यंतमतो
षयत॥ ततोब्रवीदौर्वमुनिर्नृपंमध्वक्षरंवचः॥ कुशलंननुतेराजन्सप्तस्वंगेतरेषुच॥ अपिधर्मेणसकलाःप्रजास्त्वं
परिरक्षसि॥३१॥ पूर्वंमेवादृमश्रोषंविजित्यसकलांमही॥ सबलोनगरंप्राप्तःकृतदारोभवानिति॥३२॥ राज्येतु
प्रवरोधर्मोयत्प्रजापरिपालनं॥ भवंतिसुखिनोनूनंतेनैवेहपरत्रच॥३३॥ सभवानराज्यभरणंपरित्यज्यमदंतिकं
॥भार्याभ्यांसहितोराजन्किमुयातोसिमेवद॥३४॥ जैमिनिरु० एवमुक्तस्तुमुनिनासगरोराजसत्तम॥ कृतांजलिपु
टोभूत्वाप्राहेतंमधुरंवचः॥३५॥ ॥इतिश्रीब्रह्मांडपुराणेमध्यमभागेसप्ताशीतितमोध्यायः ८७ ॥सगरउ०
कुशलंममसर्वत्रमद्दर्शनात्रसंशयः॥ यस्यपेत्वामभिध्यासिशर्मभार्गवसत्तमः॥१॥ यत्वयानुशिक्षितःपूर्वमस्त्रे
शास्त्रेचसांप्रतं॥ सोहंकथमशक्तःस्यांसकलारिविनिग्रहे॥२॥ त्वंमेसुहृद्गुरुर्दैवंबंधुर्मित्रंचकेवलं॥ नत्वन्यमभिजा
नामित्वामृतेपितरंचमे॥३॥ त्वयोपदिष्टेनास्त्रेणसकलाभूभृतोमया॥ विजित्यात्मयदृच्छ्यासन्निःसोतुयतस्त्व
च॥४॥ तपसात्वंजगत्सर्वंपुनासिपरिपासिच॥ स्रष्टुंसंहर्तुमप्यिच्छन्नोप्येवनसंशयः॥५॥ नकुलश्चाखुमार्जारम
गराशापन्नगाः॥ शृगालगवयागावोहरिणीमहिषस्तथा॥६॥ वनेत्रसहजंवैरंत्यक्त्वामैत्रीमुपागताः॥ एवंविधा
तपःशक्तिर्लोकविस्मयदायिनी॥७॥ नक्वापिदृश्यतेब्रह्मन्त्वामृतेभुविदुर्लभा॥ असंतुल्यप्रसादेनवित्तावसूप

धामिमां॥८॥ रिपुभिः सह विप्रर्षे स्वं राज्यं समुपागतः॥ एवं प्रवर्तमानस्य मम राज्येधितिष्ठतः॥९॥ भार्याद्वयं ह्यासंजा
तासापेक्षा विप्रपुंगव॥ किं त्वहमध्यापर्याप्तिमनपत्यमिषेवमे॥१०॥ पितृपिंडप्रदानेन सहसंरक्षणं भुवः॥ तदिदं दुः
खमत्यर्थं मुनिवर्य मनोगतं॥११॥ नान्योपहर्ता लोकेस्मिन मत्तोतित्वामुपागतः॥ इत्युक्तः सगरेणाथ स्थित्वासौ तं मु
नाःक्षणं॥१२॥ उवाच भगवानौर्वस्तं निर्देशमिदं वचः॥ नियमी सार्द्धतो पाभ्यां कंचित्कालमिहागतः॥ अथास्यसि
ततोभीष्टं भयान्नात्र विचारणा॥ स चतत्रावतस्थौ तत्र शुश्रूषापरायणः॥१४॥ पत्नीभ्यां सह धर्मात्मा वन्यवृत्तिं चरं
स्तदा॥ राजपत्न्यौ च तेतस्य सार्वकालमतान्विते॥१५॥ मुनेरतनुतां प्रीतिं विनयाचारभक्तिभिः॥ भक्त्या शुश्रूषया चै
वतयोः प्रीतो महामुनिः॥ राजपत्न्यौ समाहूय इदं वचनमब्रवीत्॥ भवत्योर्वरमस्मत्तो व्रियतां काममीप्सितं॥१७॥
दास्यामितं न संदेहो यद्यपिस्यात्सुदुर्लभं॥ ततः प्रणम्य शिरसा तेप्युभे तं महामुनिं॥१८॥ ऊचतुर्भगवन्पुत्रान्कामये
चेति सादरं॥ ततस्तु भगवानाह भवतीभ्यां मयाधुना॥१९॥ राज्ञश्च प्रियकामेन वरं दत्तमभीप्सितं॥ पुत्रवत्यौ म
हाभागे भवत्यौ मत्प्रसादतः॥२०॥ भवेतां ध्रुवमन्यच्च श्रूयतां वचनं मम॥ पुत्रो भविष्यत्येकस्या एकस्यामति(धी)की
र्मिकः॥ ततोपि तस्याः कल्यांतसन्ततिः प्रभविष्यति॥ षष्टिपुत्रसहस्राणामवरस्या भविष्यति॥२२॥ अकृतार्था
श्च ते सर्वे विन्यस्यांतश्चिरादिव॥ एवंविधगुणोपेतं वरं दत्तं मयाद्य च॥२३॥ अभीप्सितं तयोर्यदस्यास्तेरुयात्र गृह्यतां
एवमुक्ते तु मुनिना वैदर्भ्यन्वयवर्धनं॥ वरयामास तनयं पुत्रानन्यां स्तदापरा॥ इति दत्वा वरं राज्ये सगराय महामुनि
॥२५॥ सभार्यमनुमान्यैनं विससर्ज पुरीं प्रति॥ मुनिं प्रणम्यानुज्ञातः सभार्यो नृपसत्तमः॥२६॥ रथमारुह्य वेगे
न महता प्रययौ पुरीं॥ संप्रविश्य पुरीं रम्यां हृष्टपुष्टजनाव्रतां॥२७॥ आनंदितः पौरजनै रेमे परमया मुदा॥ एतस्मि
न्नेव काले तु राजभार्ये शुभे शुभे॥२८॥ राज्ञे च युवतां गर्भमुदा परमया युते॥ ववृद्धे च ततो गर्भः शुक्लपक्षे यथो
डुराट्॥२९॥ संपूर्णे तु ततः काले मुहूर्ते केशिनी शुभे॥ असूयताग्निगर्भाभं कुमारममितद्युतिं॥ जातकर्मादिकं त

स्यकृता कर्म यथाविधि॥ असमंजस इत्येवं नाम चास्याकरोन्नृपः॥३१॥ सुमतिश्चापि तत्काले गर्भालाबुमसूयत॥
संप्रसूतं ततस्त्यक्तुं दृष्ट्वा राजा करोन्मनः॥३२॥ तं ज्ञान भगवानौर्वस्तत्रागच्छ यदृच्छया॥ सम्यक्संभावितो राज्ञा तमु
वाच मुदान्वितः॥ गर्भालाबुरयं राजन्नत्यक्तुं भवतार्हति॥ पुत्राणां षष्टिसाहस्रबीजभूतोयतस्तव॥३४॥ तस्मात्वंश
कलीकृत्य घृतकुंभेषु यत्नतः॥ निक्षिप्य सपिधानेषु रक्षणीयं पृथक्पृथक्॥३५॥ एवं ते षष्टिसाहस्रं पुत्राणां ज्ञाप्य
तेनृप॥ राजा च तत्तथा चक्रे यथौर्वेन समारितं॥३६॥ ततः संवत्सरे पूर्णे घृतकुंभात्क्रमेणते॥ भित्वा भित्वा पुन
र्जग्मुः सहस्रैवानुवत्सरं॥ एवं क्रमेण संजाता स्तनयास्ते महीतले॥ ववृधुः सहसा राजन षष्टिसाहस्रसंख्यया॥३८
अपृथक्धर्मचरणा महाबलपराक्रमाः॥ बभूवुस्ते सुदुर्धर्षाः क्रूरात्मानो विशेषतः॥३९॥ स नातिप्रीतिमांस्तेषु
राजा मतिमतां वरः॥ केशिनी तनयं त्वेकं बहुमेने सुतं धिया॥४०॥ विवाहविधिवत्तस्मै कारयामास पार्थिवः॥ स
चाप्यानंदयामास स्वगुणैः सुधृतोखिलान्॥४१॥ एवं प्रवर्तमानस्य तस्य पुत्रो सुमानभृत्॥ स्वगुणैः प्रीणयामा
स बाल्ये पितृपितामहौ॥ एतस्मिन्नंतरे सोभूत् पिशाचावेषदूषितः॥ कश्चिद्द्विजः पिशाचोभूत्पूर्वजन्मानि धर्म
चित॥४३॥ स कदाचिदरण्ये तु विचरन्निधिमुत्तमं॥ दृष्ट्वा ग्रहीतुमारेभे तावत्तद्रक्षकोब्रवीत॥४४॥ पिशाचः क्षु
धितोस्मीति तन्मांसत्वागवामिषं॥ गृह्णीते तद्धनं कामं तथेत्युक्त्वाग्रहीतवान॥४५॥ न प्रादाच्चामिषं पूर्वं तिरस्ये
यत्प्रतिश्रुतं॥ तं प्रतीक्ष्य चिरंकालं क्षुधितो मृत्युमाप सः॥४६॥ वैश्योपि मरणं प्राप्य सगरस्य सुतोभवत्॥ अ
शरीरः पिशाचोपि पूर्ववैरमनुस्मरन्॥४७॥ वायुभूतो विशद्देहं राजपुत्रस्य दूषयन्॥ असमंजास्ततश्चावि
ष्टः क्रूरकर्माभवद्भृशं॥४८॥ हत्वा बालान्प्रचिक्षेप सरय्वां यामतिनिर्दयः॥ तदा पौरजना दृष्ट्वा तत्कर्मावेद
यन्नृपे॥४९॥ राजाप्यतदुपश्रुत्य वारयामास यत्नतः॥ बहुशः प्रतिषिद्धोपि नामन्यत स दुराशयः॥५०
तदा लोकापवादेन तं देशान्निरवापयत्॥ ॥ इति श्रीब्रह्मांडपुराणे मध्यमखंडे अष्टाशीतितमोध्यायः॥८८॥ ७॥

जैमिनिरु॰ त्यक्त्वापुत्रंसधर्मात्मासगरःप्रेमसंकुलं॥ धर्मशीलेनतद्बालेचकारांशमतिप्रभुः॥१॥एतस्मिन्नेवकालेतुस
मत्याःसनयान्नृप॥ववृधुः सगराः सर्वेपरमानमनुव्रता॥ वृत्तसंहननाक्रूरान्निर्दयानिरपत्रपाः॥अधर्मशीलानितरा
मीकधर्मणिएवच॥३॥एककार्यांतरगताक्रोधनामूढचेतसः॥अध्यासर्वभूतानांजनोपद्रवकारिणः॥४॥विनयाचा
रसंसर्गनिरपेक्षासमंततः॥बबाधिरेजगत्सर्वमसकृदुग्रकामतः॥५॥विध्वस्तकृतसंमार्गंभुवनंसमपद्यत॥निःस्वाध्या
यवषट्कारंबभूवाभिविशेषतः॥६॥विधस्यमानेजगतिमार्गेसगरैःसर्वदर्पितैः॥प्रक्षोभंपरमंजग्मुःदेवासुरमहोरगाः॥धा
रातुतद्गुराक्रांताचचालचतदाचला॥तपःसमाधिरोधश्चप्रबभूवतपस्विनां॥८॥हव्यकव्यपरिभ्रष्टास्त्रिदशापितृभिः
सह॥दुःखेनमहताविष्टाविचरंभवनंययुः॥९॥तत्रगत्वायथान्यायंदेवाःसर्वेसरोगवा॥सशंससकलंतस्मैसागराणां
विचेष्टितं॥१०॥ततबुध्वावचनंतेषांब्रह्मलोकपितामहः॥क्षणमंतर्मनाभूत्वाजगादसुरसत्तमान्॥११॥सर्वैर्भवद्भिरध
नातत्कर्तव्यमतंद्रितैः॥विष्णोरंशेनभगवान्कपिलस्तपतांवरः॥१२॥जातोजगद्धितार्थाययोगींद्रप्रवरोभुवि॥अध
स्तपति---दिव्यवर्षशतावधिः॥१३॥ध्यानमास्तेधुनाध्येयेकांतेस्वांतिश्चकुत्रचित॥गत्वायूयंमनादिशान्न्नप
लंमुनिपुंगवं॥१४॥ध्यानावसानमिछंततस्मिंस्तुहंतुतद्गुरे॥समाधेर्विरतौतस्यस्वाभिप्रायमशेषतः॥१५॥नत्वातस्मै
वक्ष्येदंसर्वःश्रेयोविधास्यति॥समाधिभंगश्चसकृतेयथास्यासागरैःकृतः॥१६॥कुरुध्वंचयथायूयंप्रछन्नाविबु
धोत्तमाः॥जैमिनिरु॰ इत्युक्त्वालेनविधिनातंप्रणम्यततोनृप॥कपिलंस्यांतिकंसर्वेप्रययुस्त्वरयान्विता॥१७॥
समाध्यंतेसमासीनंस्वधिष्ण्यइवपावकं॥प्रणम्यविबुधाःश्रेष्ठाःसत्कृतांजलयोब्रुवन॥१८॥देवाऊचुः॥प्रसीदनो
मुनिश्रेष्ठवयंत्वांशरणंगताः॥उपद्रुतंजगत्सर्वंसागरैःसंप्रणश्यति॥१९॥त्वंकिलाखिललोकानांस्थितिसंहार
कारणं॥विष्णोरंशेनयोगींद्रस्वरूपीभुविसंस्थितः॥२०॥पुंसांतापत्रयार्तानांआर्तिनाशायकेवलं॥स्वेच्छायांध्रि
यतेदेहोत्वयायतिपतांवर॥२१॥मनसैवजगत्सर्वंस्रष्टुंसंहर्तुमेवच॥पातुंवास्वेच्छयाब्रह्मन्त्वंशक्तोत्यसंशयः॥२२
त्वंनोधाताविधाताचत्वंगुरुस्त्वंपरायणं॥परित्रातात्वमस्माकंविनिहंतातथायके॥२३॥शरणंभवविप्रेंद्रविषाणा

DR. BHAU DAJI MEMORIAL

भ्यांविशेषत॥सागरैरुध्यमानानांलोकत्रयनिवासिनां॥२४॥परोपकारैकरसःसर्वाविरुद्धासुदेहिनां॥नूननैःसार्ग
कीचेष्टाभवत्येवभवादृशां॥२५॥त्रातुमर्हसितस्मात्वंलोकांसांश्चसम्प्रत॥नचेदकालेभगवान्विनश्यत्यखि
लंजगत॥२६॥जैमिनिरु॰॥ इत्युक्तःसकृपान्देवैरुन्मील्यनयनेशनैः॥विलोक्यतानुवाचेदंकपिलःप्रस्तुतंवचः
॥२७॥सकर्मणैवनिर्दग्धाप्रविनश्यतिसागराः॥कालेप्राप्तेतुयुष्माभिसतावत्परिपाल्यतां॥अहंतुकारणं
तेषांविनासेतुदुरात्मनां॥ भविष्यामिसुरश्रेष्ठाभवतामर्थसिद्धये॥२९॥ममक्रोधाग्निविप्लुष्टासागरायायचे
तसः॥विनश्यंत्यचिरेणैवकालोपहतबुद्धयः॥३०॥तस्माद्गतज्वरादेवालोकाश्चैवाकुतोभयाः॥भवंतुतेनरा
त्मानःक्षिप्रयास्यतिसंक्षयं॥३१॥तेयूयंनिर्भयास्तत्रव्रजध्वंस्वपदंप्रति॥कालंकंचितप्रतीक्षध्वंततोभीष्टमवा
प्स्यथ॥३२॥कपिलेनैवमुक्तास्तेदेवाःसर्वेसवासवाः॥तंप्रणम्यततोजग्मुःप्रतीतास्त्रिदिवंप्रति॥३३॥एत
स्मिन्नंतरेराजासगरःपृथिवीपतिः॥वाजिमेधंमहायज्ञंकर्तुंचक्रेमनोरथं॥३४॥आरुह्यसर्वसंभारान्वसि
ष्ठानुमतेतदा॥और्वाद्यैःससितोविप्रैर्यथावद्दीक्षितोभवत॥३५॥दीक्षांप्रविष्टोनृपतिर्हयसंरक्षणाय
वै॥पुत्रान्सर्वान्समाहूयप्रत्युवाचमहायशाः॥३६॥संचारयित्वातुरगंपरीत्यपृथिवीतलं॥क्षिप्रंममहांतिकं
पुत्रापुनरागंतुमर्हथ॥३७॥जैमिनिरु॰ ततस्तेपितुरादेशातमाद्दायतुरंगमं॥परिचक्रमयामासुःसकलंक्षि
तिमंडलं॥३८॥ययुःसहस्राःसर्वेपितुरादेशवर्तिनः॥नतुदिग्विजयार्थायकरदानार्थमेवच॥३९॥पृथिवी
भूभुजातेनपूर्वमेवविनिर्जिताः॥नृपाश्चोदारवीर्येणएकदासमयेकृताः॥४०॥ततस्तेराजतनयोनिस्तोयेलव
णांबुधि॥निर्वैरमाश्रितुर्देसापरिचार्यतुरंगमं॥४१॥ ॥इतिश्रीब्रह्मांडपुराणेमध्यमखंडेएकोननवतितमोध्या
यः॥८९॥ ॥जैमिनिरुवाच॥तेषुतत्रविनिष्टेषुवासवेनप्रचोदितः॥जहारतुरंगंवायुस्तत्क्षणेनधरात
ले॥१॥अदृष्टमश्वंतेसर्वेरपहृत्यसदागतिः॥अपन्यत्वरयाराजन्कपिलस्यांतिकंमुने॥२॥ततःसमाकु

सर्वैर्विनिश्चेन्नृपात्मज॥परीत्यवसुधांसर्वामिमार्गेनतुरंगमं॥३॥विचिंत्यपृथिवींतेतुसपुराचलकाननं॥
अपश्यंतोयज्ञपशुंदुःखमस्त्वाप्नुयात॥४॥तेप्यध्यांसमासाद्यवृक्षलिगभिःपरिवारितां॥दृष्ट्वाप्रणम्य
पितरंतस्मैसर्वंन्यवेदयन्॥५॥परीत्यपृथिवींसमाभिर्निर्वेष्टेर्वरुणालये॥रक्षमाणोप्यपश्यद्भिःकेनापि
तुरगोहृतः॥६॥इत्युक्तस्तेसुधाविष्टस्तामुवाचनृपोत्तम॥प्रयास्यथमधर्मिष्ठाःसर्वेनाख्येपुनःपुनः॥७॥कथं
भवद्भिर्जीवद्भिर्यद्बुर्नष्टोदुरात्मभिः॥तुरंगेनविनासत्यंनेहागमनमस्तिवः॥८॥ततःसमेत्यतेतस्मात्संप्रयाता
परस्परं॥नुदर्नहृश्यतेक्वापितुरंगःकिंप्रकुर्महे॥९॥वसुधाविजितास्माभिःसशैलवनकानना॥नचापिदृश्य
तेवाजीनतद्वृत्तंवापिकुत्रचित्॥१०॥अस्मादूर्ध्वःसमारभ्यपातालावधिमेदिनीं॥विभज्यसान्वापातालोद्वि
चेष्यामस्तुरंगमं॥इतिकृत्वामतिंसर्वेसागराकृतनिश्चयाः॥तेषालाममिमंभोधेस्तटादारभ्यसर्वशः॥१२॥
तैःखन्यमानावसुधाररामभृशविह्वला॥चुक्रुशुःश्चापिभूतानिहन्यातेषांविचेष्टितं॥१३॥ततस्तेभारतं
खंडंखात्वासंक्षिप्यभूतलं॥भूमिर्योजनसाहस्रंयाजयामासुरंबुधौ॥१४॥आपातालतलंतेतुखनंतोमेदिनी
तलं॥चरंतमश्वंपातालेददृशुर्नृपनंदनः॥१५॥संप्रहृष्टाततःसर्वेसमेत्यचसमंततः॥प्रक्रोशनन्नूहतुःके
चितनन्नृतुश्चमुदान्विताः॥१६॥ददृशुश्चमहात्मानंकपिलंदीप्ततेजसं॥रथ्यांपन्नासनासीनंनासाग्रन्यस्त
लोचनं॥१७॥ऋज्वायतशिरोग्रीवंपुरोविष्टायसंक्षयं॥स्वतेजसाविस्फुरतापरिपूर्णेनसर्वतः॥चकारमानंपरि
तोनिर्वातस्थप्रदीपवत्॥स्वांतःप्रकाशिताशेषाविज्ञानमतविग्रहं॥१९॥समाधिगतचित्तंतंनिभृतांभोधिसं
निभं॥आरूढयोगविधिवद्ध्यायसंनीलमानसं॥२०॥योगींद्रंप्रचरंशांतंशांतज्वालमिवानलं॥विलोक्यतम
तिहृतंविमृशंतःपरस्परं॥२१॥मुहूर्तमिवतेराजन्साध्वसंपरमंगताः॥ततोपमर्यहृत्यस्ताःसागराःकाल
चोदिताः॥२२॥परिवव्रुर्दुरात्मानःकपिलंमुनिसत्तमं॥आसंनमृत्यवःप्रोचुश्चौरोयंनात्रसंशयः॥२३॥अ

श्वहर्तानतोवध्यएषोस्माभिर्दुरात्मवान्॥२४॥जैमिनिरु० ततोमुनिरदीनात्माध्यानभंगप्रधर्षितः॥क्रोधेनमहता
विष्टश्चक्षुभेककिलस्ततः॥२५॥प्रचचालदुराधर्षोवपुषाक्रोधमानसः॥दिदृक्षुरिवपातालोकान्संकर्षणो
नलः॥२६॥सतोविवर्तनेत्राभ्यांसहसापावकार्चिषः॥निश्चेरुरभितोदिक्षुकालाग्नेरिवसंततं॥२७॥क्रोधाग्निः
समहान्राजन्ज्वालाव्याप्तदिगंतरः॥अंतश्चकारतान्सर्वान्वावृण्वन्स्वेनतेजसा॥२८॥भृशंसमुद्भूतमरुत्प्रकोपावि
वर्णमानानलधूमजालैः॥महारजोभिश्चनितांतमुक्तैःसमावृतंलोकमभूद्भृशातुरं॥२९॥मिषतःसर्वलोकस्य
क्रोधाग्निस्तमहोदयं॥सागरांस्तानशेषेणभस्मसादकरोत्क्षणात्॥३०॥एवंक्रोधाग्निनातेनसागराःपापचे
तसः॥जज्वलुस्तरसादीवेतरवोनीरसाइव॥३१॥दृष्ट्वातेषांतुनिधनंसागराणांदुरात्मनां॥अन्योन्यमब्रुवान्देवा
विस्मिताऋषिभिःसह॥३२॥अहोदारुणपापस्यविपाकःसमभूदितः॥यदिमेसर्वशोदुष्टानृशंसाःक्रूरबुद्ध
यः॥युगपद्विलयंप्राप्ताःसहसेवतृणाग्निवत्॥उद्वेजनीयाभूतानांसद्भिरत्यंतगर्हिताः॥३४॥आजीवांतमिमे
हंतहिश्चासंक्षयमागताः॥इहकृत्वाशुभंकर्मकःपुमान्विंदतेसुखं॥३५॥विक्रोश्यसर्वभूतानिसंप्रयातास्व
कर्मभिः॥ब्रह्मदंडहताःपापानिरयंशाश्वतीसमाः॥३६॥तस्मात्सदैवकर्तव्यंकर्मपुंसामनीषिणा॥नकुर्यात्क
स्यचिद्द्रोहमनित्यंजीवितेयतः॥३७॥अनित्यंसंसदादेहःसंपदश्चातिचंचलाः॥संसारश्चातिनिःसारस्तत्कथं
विश्वसेद्बुधः॥३८॥एवंसुरमुनींद्रेषुकथयत्सुपरस्परं॥मुनिक्रोधेंधनीभूताविनेशुःसगरात्मजाः॥३९॥निर्द
ग्धदेहाःसहसाभुवंविष्टभ्यभस्मना॥अवापुर्निरृतिंसद्यःसागरास्तेस्वकर्मभिः॥४०॥सागरांस्तानशेषेणद
ग्ध्वातत्क्रोधजोनलः॥क्षणेनलोकानखिलानलंधदग्धुमंजसा॥४१॥भयभीतास्ततोदेवाःसमेत्यदिवि
संस्थिताः॥तुष्टुवुस्तंमहात्मानंक्रोधाग्निशमनार्थिनः॥४२॥ ॥इतिश्रीब्रह्मांडपुराणेमध्यमखंडेनवतितमो
ध्यायः ९० ॥ ॥देवाऊचुः॥क्रोधाग्निमेनंविप्रर्षेसद्यःसंहर्तुमर्हसि॥नोचेत्कालेनलोकोयंसकलस्तेनदह्यते १

ब्रह्मांडपु० दृष्टंतेनमहिम्नास्यव्याप्तमासीच्चराचरं॥ शमस्वसंहरक्रोधंनमस्तेविप्रपुंगव॥२॥एवंसंस्तूयमानस्तुभगवान्कपि
लोमुनिः॥आत्मन्येवक्षयंनिन्येक्रोधाग्निंभैरवंततः॥३॥प्रशांतमभवज्ज्ञगमुजगत्सर्वंचराचरं॥ देवास्तपस्वि
नःसर्वेबभूवुर्विगतज्वराः॥४॥एतस्मिन्नेवकालेतुभगवान्नारदोमुनिः॥अयोध्यामगमद्राजन्देवलोकाद्दिदृक्ष
३४ या॥५॥तमागतमभिप्रेक्ष्यनारदंसगरस्तदा॥अर्घ्यपाद्यादिभिःसम्यक्पूजयामासनित्यदा॥६॥परिगृ
ह्यततोपूजामासीनःपरमासने॥नारदोराजशार्दूलमिदंवचनमब्रवीत॥७॥हयसंचारणार्थायसंप्रयाता
स्तवात्मजाः॥ब्रह्मदंडहताःसर्वेविनिष्टान्नृपसत्तम॥८॥संरक्षमाणास्तैःसर्वैर्हयस्तेयाज्ञियोनृप॥केना
प्यलक्षितःक्वापिनीतोविधिवशाद्दिव॥९॥ततोविचिन्वंतुरगंविचिन्वंतोमहीतले॥अलभंतनतेक्वापियज्ञि
यंतंचिरान्नृप॥१०॥ततोवनेरधस्तोयेविचेरुःकृतनिश्चयाः॥सागरांतेसमारभ्यचख्नुस्तेवसुधातलं॥११॥ख
नंतोवसुधामश्वंपातालेददृशुर्नृप॥समर्पिताश्वंयोगींद्रंकपिलंचमहामुनिं॥१२॥तंदृष्ट्वापापकर्माणस्तेसर्वे
कालचोदिताः॥कपिलंकोपयामासुरश्वहर्तायमित्यलं॥१३॥ततस्तत्क्रोधसंभूतोनेत्राग्निर्दहतेदिवं॥इंधनी
भूतदेहास्तेपुत्राःसंक्षयमागताः॥१४॥क्रूराःपापसमाचाराःसर्वलोकापराधकाः॥सत्वंधैर्यधनोभूत्वाभ
वितव्यतयात्मनः॥१५॥नष्टंमृतमतीतंचनार्थेशोचंतिपंडिताः॥तस्मात्पौत्रमिमंबालमंशुमंतंमहामतिं॥१६
तुरंगानयनार्थायनियुंक्ष्वनृपसत्तम॥१७॥जैमिनिरु०॥इत्युक्त्वापश्यतस्तस्यनारदोंतरधीयत॥तच्छ्रुत्वाव
चनंराजादध्यौदुःखसमन्वितः॥१८॥ततोवसिष्ठस्तंप्राहसांत्वयंदेशकालवित्॥किमिदंधैर्यसाराणामव
काशंभवादृशां॥१९॥लभतेयदिचेल्लोकःप्राप्तंधीरतयानलं॥दौर्मनस्यंशिथिलयन्सर्वंदिग्वशार्थगं॥म
न्यानोनंतरंकृत्यंकर्तुमर्हस्यसंशयं॥वसिष्ठेनैवमुक्तस्तुराजाकार्यार्थसाधकः॥२१॥धृतिंसद्यःसमालंब्य
तथेतिप्रत्यभाषत॥अंशुमंतंसमाहूयपौत्रंविनयशालिनं॥२२॥ब्रह्मक्षत्रसभामध्येप्रानेरिदमभाषत॥

ब्रह्मदंडहताःसर्वेपितरस्तवपुत्रक॥२३॥पतिताःपापकर्माणोनिरयंसशाश्वतीःसमाः॥त्वयायत्नमशेषंमेश्रेयोह्य
त्रपरत्रच॥२४॥सत्वंगच्छममादेशात्पातालेकपिलाश्रमं॥तुरंगानयनार्थायतंप्रसादयत्नतः॥२५॥आदा
यतुरगंतंचशीघ्रमागंतुमर्हसि॥एतच्छ्रुत्वांशुमान्सद्योनमस्कृत्यपितामहं॥२६॥तथेत्युक्त्वाथकपिलंगत्वातु
ष्टावसादरं॥प्रसीदविप्रवर्यांशुमानहंशरणंगतः॥२७॥क्रोधंचसंहररक्षेमंलोकंसंत्रददकारकं॥त्वयिक्रुद्धे
जगत्सर्वंप्रणाशमुपयास्यति॥२८॥प्रसन्नोस्मान्महाभागपश्यसौम्येनचक्षुषा॥यत्वत्क्रोधेंधनीभूता
स्तदपत्यमवाधुना॥मामंशुमंतंनप्तारंसगरस्यमहीपतेः॥सोहंतस्यनियोगेनत्वत्प्रसादाभिकांक्षया॥३०॥
प्राप्तोस्म्यस्यसिद्ध्यैतुरंगानयनायच॥इतितद्वचनंश्रुत्वाप्रसन्नःकपिलोब्रवीत्॥३१॥स्वागतंतेमहा
भागतुरंगोनीयतामयं॥व्रियतांचवरोमत्तस्त्वयायस्तेमनोगतः॥३२॥एषांतुसंप्रणाशेहंगतःकारणता
मिह॥पापानांमरणंतेषांनत्वंशोचितुमर्हसि॥३३॥ततःप्रणम्ययोगींद्रमंशुमानिदमब्रवीत॥त्वद्रोषपा
वकप्लुष्टाःपितरोयेममाखिलाः॥३४॥संप्रयास्यंतितेब्रह्मन्निरयंशाश्वतीःसमाः॥ब्रह्मदंडहतानांतुनहि
पिंडोदकक्रियाः॥३५॥अक्षयःस्वर्गवासोस्तुतेषांतुत्वत्प्रसादतः॥वरेणानेनभगवन्कृतकृत्योभवाम्य
हं॥त्वत्प्रसादात्मेवैषांसुगतेर्भवकारणं॥ततस्तमाहयोगींद्रःसुप्रसन्नेनचेतसा॥३७॥निरयोद्धारणंते
षांत्वयाकर्तुंनशक्यते॥तेश्चापिनरकेयावद्धस्तव्यंपापकर्मभिः॥३८॥कालःप्रतीक्षतांतस्माद्यावत्वत्पौत्र
